## सुसङ्ग्राह्याणि अभिनवप्रकाशनानि

१. वास्तुसौख्यम्—श्रीटोडरमल्लविरचितं ज्योतिषशास्त्रस्य वास्तुसम्बन्धिग्रन्थमिदम् आचार्यश्रीकमलाकान्तशुक्लकृतया हिन्दी-व्याख्यया समलङ्कृत्य प्रकाशितम्—१२०-००

२. सङ्ग्रहशिरोमणि: —ज्यौतिषशास्त्रस्यापूर्वोऽयं सङ्ग्रहग्रन्थ आचार्यश्रीकमलाकान्त-शुक्लप्रणीतया हिन्दी-व्याख्यया समलङ्कृत्य प्रकाशित: — प्रथमो भाग: २५०-००

३. काशीखण्ड: —महर्षिव्यासप्रणीत: स्कन्दपुराणान्तर्गतोऽयं ग्रन्थ आचार्यश्रीरामा-नन्दकृतया 'रामानन्दी'-संस्कृतव्याख्यया, अथ च पण्डितश्रीनारायणपतित्रिपाठि-कृतया 'नारायणी'-हिन्दीव्याख्यया च समलङ्कृत्य प्रकाशित:—प्रथमो भाग: २००-००
द्वितीयो भाग। २००-०० तृतीयो भाग। ३००-००

४. रामायण ककविन्—रामचरितवर्णनात्मकोऽयं काव्यग्रन्थ। जावीलिपितो देवनागर्यां लिप्यन्तरीकृत्य अभिराज-डॉ० राजेन्द्रमिश्रकृतेन हिन्दीभाषानुवादेन समलङ्कृत्य प्रकाशित: — ३००-००

५. त्रिकदर्शनम्—ग्रन्थोऽयं बहुशास्त्रमर्मज्ञै: प्रो० रामचन्द्रद्विवेदिमहोदयै: स्वोपज्ञ-तया प्रणीत: — १००-००

६. श्रीस्वच्छन्दतन्त्रम्—तन्त्रशास्त्रस्याधारभूतमिदं ग्रन्थरत्नं महामाहेश्वराचार्य-श्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतं सत् प्रकाशितम्—

प्रथमो भाग: १००-०० द्वितीयो भाग: ५०-००
तृतीयो भाग: ५०-०० चतुर्थो भाग: ६०-००
पञ्चमो भाग: ५०-००

७. श्रीतन्त्रालोक: —ग्रन्थोऽयं महामाहेश्वराचार्यश्रीमदभिनवगुप्तविरचित:। अशेषागमोपनिषदालोकोऽयं ग्रन्थ आचार्यश्रीजयरथकृतया 'विवेक'-व्याख्यया, अथ च डॉ० परमहंसमिश्रकृतया 'नीर-क्षीर-विवेक'हिन्दी-व्याख्यया समलङ्कृत्य प्रकाशित: — प्रथमो भाग: १२४-००
द्वितीयो भाग: १३२-००
तृतीयो भाग। १६०-००

८. भास्करराय भारती दीक्षित—व्यक्तित्व एवं कृतित्व—तन्त्रशास्त्रस्यापूर्वोऽयं ग्रन्थ आचार्यश्रीबटुकनाथशास्त्रिखिस्तेमहोदयै: प्रणीत:। ग्रन्थेऽस्मिन् भास्कर-रायभारतीदीक्षितस्य जीवनचरितं कृतयश्च हिन्दीभाषया सम्यगालोचिता:—३००-००

९. नीतिविधिविमर्श: —भारतीयनीतिशास्त्रस्यापूर्वोऽयं ग्रन्थ: डॉ० हरिहरनाथ-त्रिपाठिमहोदयै: स्वोपज्ञतया प्रणीत: — प्रथमो भाग: ८५-००

Library IIAS, Shimla
S 181.43 M 277 A
00098484

१०. धर्मसमुच्चय: —श्री-अवलोकितसिंहभिक्षुप्रणीतमिदं
अनुसन्धानात्मकपरिशिष्टै:, अथ च गभीरया भूमि

११. विश्व-दृष्टि—डॉ० सम्पूर्णानन्द स्मृति-ग्रन्थ—ग्रन्थोऽ
दर्शन-ज्योतिष-इतिहास-राजनीति-साहित्यप्रभृतिविषयसम्बद्धान् निबन्धान् सङ्कलय्य सुसम्पाद्य च भागद्वयात्मक: प्रकाशित: — ३५०-००

१२. डॉ० सम्पूर्णानन्द—जीवन एवं चिन्तन—ग्रन्थरत्नेऽस्मिन् डॉ० सम्पूर्णानन्दस्य समग्रं जीवनचरितं विवेचितम्, विचारा:, कृतयश्च निरूपिता: — ५०-००

पत्रव्यवहारसङ्केत:—प्रकाशनाधिकारी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी—२२१००२

लघु-ग्रन्थमाला

[ ५२ ]

आचार्यमहादेवपुण्यस्तम्भकरविरचितः

# अनुमितिपरामर्शकार्यकारणभावविचारः

सम्पादकः


डॉ० राजारामशुक्लः

प्राध्यापकः,

न्यायवैशेषिकदर्शनविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्



S
181.43
M 277 A



सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वि० सं० २०५१



S
181.43
M 277 A

LAGHU-GRANTHAMĀLĀ

[ Vol. 52 ]

# ANUMITIPARĀMARŚAKĀRYAKĀRAṆA-BHĀVAVICĀRAḤ

OF

ĀCĀRYA MAHĀDEVAPUṆYASTAMBHAKARA

EDITED BY

DR. RĀJĀRĀMA ŚUKLA

*Lecturer,*

Nyāya Vaiśeṣika Philosophy Deptt.

Sampurnanand Sanskrit University

Varanasi

VARANASI

1994

**Research Publication Supervisor—**
**Director, Research Institute,**
Sampurnanand Sanskrit University
Varanasi.

**Published by—**
**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi-221 002.

Available at--
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi-221 002.

First Edition, 500 Copies
Price Rs. 10-00

Printed by—
**VIJAYA PRESS,**
Sarasauli, Bhojubeer
Varanasi.

लघु-ग्रन्थमाला

[ ५२ ]

आचार्यमहादेवपुण्यस्तम्भकरविरचितः

# अनुमितिपरामर्शकार्यकारणभावविचारः

सम्पादकः

डॉ० राजारामशुक्लः

प्राध्यापकः,

न्यायवैशेषिकदर्शनविभागस्य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

वाराणस्याम्

वाराणस्याम्

०५१ तमे वैक्रमाब्दे    १९१६ तमे शकाब्दे    १९९४ तमे खैस्ताब्दे

अनुसन्धान-प्रकाशन-पर्यवेक्षकः —
निदेशकः, अनुसन्धान-संस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

□

प्रकाशकः —
डॉ० हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

□

प्राप्तिस्थानम्—
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी–२२१ ००२.

Library IIAS, Shimla
S 181.43 M 277 A
00098484

□

प्रथमं संस्करणम्, ५०० प्रतिरूपाणि
मूल्यम्— १० = ०० रूप्यकाणि

S
181.43
M277A

□

Acc. No. 98484
Date 20-9-2002

मुद्रकः —
विजय- प्रेस,
सरसौली, भोजूबीर
वाराणसी ।

# नैवेद्यम्

शुण्डादण्डोऽपि दोर्दण्डखण्डितोद्दण्डमण्डलः ।
विघ्नक्षयविधौ वक्षः पातु दक्षात्मजात्मजः ॥

वन्दे तान् परमोदारान् तार्किकाग्रेसरान् गुरून् ।
वेदाविरुद्धमर्थं ये तर्केण प्रत्यपीपदन् ॥

अथ प्रथितयशसः पुणतामकरोपाह्वश्रीमहादेवपण्डितस्य कृतिमिमामनुमितिपरामर्शकार्यकारणभावविचाराख्यामख्यातामद्यावधि सुविचारितामप्यापरितोषाद्विदुषामित्यादि रचयितुर्हार्दं विज्ञाय न्यायविद्यावतां सतां पुरस्तात्समर्पयितुकामो कामप्यनिर्वचनीयां सुखसन्ततिमनुभवामि । नैयायिकाग्रेसरोऽयं महादेवपण्डितो नाविदितो विदितनैयायिकपरम्परस्य कस्यापि । नैकेषां न्यायग्रन्थानां रचयिता चायं काशीवास्तव्यमहाराष्ट्रियं पुणतामकरकुलं व्यभूषयत् । वंशेऽस्मिन् गृहीतजन्मानः शास्त्रपारम्परीमनुतिष्ठन्तः केचन केचन चाननुतिष्ठन्तोऽपि विराजन्तेऽद्यापि 'सूतटोला' इति ख्याते काशीनगरैकदेशे । डॉ० बलिरामशुक्लस्य मतानुसारेण महाराष्ट्रप्रान्ते गोदावरीतीरे वर्तमानादत्यन्तमैतिहासिकात् 'पुण्यस्तम्भ' इति स्थानात् केनापि कारणविशेषेण काशीं समागतास्तत्रैव च वसतिमुरीकृतवन्तः खल्वैतद्वंशीयाः[1] । कथनमिदं तात्त्विकं प्रतिभाति । यतो नैकेऽपि महाराष्ट्रिया वंशास्तदा तदा तेन तेन कारणेन तस्मात्तस्मात् स्थानात्समागत्य काश्यां वासमङ्गीकृतवन्तो येषामिदानीं महाराष्ट्रमण्डलमहाराष्ट्रसमाज–महाराष्ट्रभवन-प्रभृतयो नैकाः संस्था अपि जीवन्ति समेधमानाः । अन्यच्च पुणतामकर इति शब्दः पुण्यस्तम्भकर इत्यस्यापभ्रंश इव प्रतीयते । अत एव Catalogus Catalogarum इत्यत्र महादेवपण्डितस्योपनामविषये पुणतामकरः, अथवा पुण्यस्तम्भकर इति स्पष्टतया लिखितं वर्तते[2] । इदानीं तद्वंशीयैः प्रयुक्त उपाधिस्ततोऽप्यपभ्रष्टः पुणताम्बेकर इति । डॉ० बलिरामशुक्लेनेदमेवोपनाम व्यवहृतम्[3]; किन्तु नैतदन्यत्र कुत्रापि हस्तलिखितग्रन्थेषु ग्रन्थ-ग्रन्थकारसूच्यां वोपलभ्यते ।

---

१. आत्मतत्त्वजातिविचारः —सं० डॉ० बलिरामशुक्लः, ( शोधप्रभा—पञ्चमविश्वसंस्कृतसम्मेलनविशेषाङ्कः—१९८१ ) ।

२. Catalogus Catalogarum—by–Theodoraufrecht, Part-1, पृ० 437.

३. आत्मतत्त्वजातिविचारः (भूमिकायाम्) सं० डॉ० बलिरामशुक्लः ( शोधप्रभा, पञ्चमविश्व-संस्कृत-सम्मेलन-विशेषाङ्कः १९८१ ) ।

श्रीशुक्लेन वर्तमानप्रचलितोपनामानुसारेण व्यवहारः कृतः स्यात् कस्मिंश्चिद् हस्तलेख-विशेषे तथा प्राप्तं वा स्यात्। श्रीमता उमेशमिश्रेणापि स्वसम्पादिते न्यायकौस्तुभे पुणतामकर इत्येव व्यवहृतम्[१]। एतद्वंशीयानां पन्त इत्यप्युपाधिर्वर्तते।

महादेवस्य पिता मुकुन्दः, मुकुन्दपण्डित इत्यादिनाम्ना विख्यात आसीत्। तं स्वतो महादेवः षट्शास्त्रतत्त्वदर्शीत्युक्तवान्; किन्तु स महादेवस्य विद्यागुरुर्नासीदिति तद्वचसैव प्रतीयते—

मुकुन्दं पितरं नौमि षट्शास्त्रीतत्त्वदर्शिनम्[२]।
यत्पुण्यपरिपाकेन शास्त्रे गतिरभून्मम[३] ॥ इति।

तथा हि—पितुः पुण्यपरिपाको महादेवस्य शास्त्रे गतौ हेतुः। पितुः सत्कर्मणः पुण्यस्य वा फलमुपभुञ्जत एव पुत्राः। गुरुविषये प्रायशः 'यत्कृपातः, यत्प्रसादात्,' इत्यादिशब्दा ग्रन्थकृद्भिर्व्यवहृताः समुपलभ्यन्ते। किञ्च 'स्मार स्मारं गुरोर्गिरः' इति मनोरमाव्याख्यानक्रमे 'एकस्मादेव गुरोः सर्वा विद्या अधिगता इत्येकवचनेन लभ्यते' इति शब्दरत्नवदत्रापि बोध्यम्। यतो महादेवोऽपि गुरुनमस्कारावसरे 'एकत्वन्न प्रयोक्तव्यं गुरावात्मनि चेश्वरे' इति निषेधे वर्तमानेऽप्येकवचनमेव प्रयुङ्क्ते—

पुरुहूतपुरोहितं सभायां कवितायां किल कालिदासमन्यम्।
निखिलाखिलशास्त्रविद्धुरीणां[४] शितिकण्ठाभिधसद्गुरुं नमामि[५] ॥

सम्भवतो महादेवस्य विद्याध्ययनावसरे मुकुन्दपण्डितो जीवितो न स्यात्। कोऽन्यथा षट्शास्त्रतत्त्वदर्शिनि पितरि वर्तमानेऽन्यमुपसर्पेत्; किन्त्वेतत्सर्वं कल्पनामात्रम्। वस्तुस्थितिस्तु महताऽनुसन्धानेनावगन्तुं शक्या। इदन्तु सत्यं यद् मुकुन्दपण्डितस्य काऽपि कृतिर्नोपलभ्यते; किन्तु उमेशमिश्रानुसारेण सत्पद्यमुक्तावल्याः कर्ता महादेवस्य पिता मुकुन्दपण्डित एव[६]।

---

१. न्यायकौस्तुभः—सं० उमेशमिश्रः (वाराणसेय-संस्कृत-विश्वविद्यालयः —१९३०)।

२. अत्र 'षट्शास्त्रतत्त्वदर्शिनम्' इति उमेशमिश्रसम्मतः पाठः ( न्या० कौ०, शुद्धिपत्रम्, पृ० सं० १ )। 'षट्शास्त्रितत्त्वदर्शिनम्' इति डॉ० बलिरामशुक्लसम्मतः पाठः ( आ० जा० वि०, भूमिका, पृ० सं० १ )।

३. न्या० कौ०, पृ० सं० १।


४. 'धुरीणम्' इति युक्तः पाठः प्रतीयते।

५. न्या० कौ०, पृ० सं० १।

६ Catalogus Catalogarum–पृ० सं० 437, तथा न्या० कौ० भूमिका, पृ० सं० १।

गुरुः शितिकण्ठदीक्षितः क्वचित् श्रीकान्तदीक्षित इति नाम्नाऽपि ज्ञायते[१] । अयं सम्भवतस्तत्त्वचिन्तामणेः शितिकण्ठीयटीकायाः कर्ता स्यात्[२] ।

महादेवस्य वंशवृक्षो निम्नलिखितरूपेण चित्रयितुं शक्यः —




१. न्या० कौ० भूमिका, पृ० सं० ६ ।

2. Catalogus Catalogarum, पृ० 646.

महादेवरचितानां हस्तलेखानामाधारेण पं० गोपीनाथकविराजप्रभृतयो विद्वांसो महादेवस्य कालं ख्रिष्टीय-सप्तदशशतकस्यान्तं निर्धारयन्ति[१]। इदं युक्तमेव। यतः महादेवस्य कृतिष्वत्यन्तं महत्त्वपूर्णोऽस्ति भवानन्दोप्रकाशः। इयं हि कृतिस्तत्त्वचिन्तामणेर्भवानन्दसिद्धान्तवागीशकृतभवानन्दीटीकाया व्याख्यानरूपा। भवानन्दस्य कार्यकालो विविधैः प्रमाणैः १६२५ ईशव्याः समीपे मन्यते। अयमेव जगदीशस्य जन्मकालोऽपि मन्यते। महादेवस्य लेखनशैल्यां रघुनाथशिरोमणेः पर्याप्तं प्रभावो दृश्यते, न तु जगदीशस्य नापि गदाधरस्य। इमौ तेन न कुत्रापि विशेषतोऽस्मिन् ग्रन्थे चर्चितौ यथा पक्षधरमिश्ररघुनाथशिरोमणिप्रभृतयश्चर्चिताः। अतो भवानन्दादुत्तरं गदाधरात् पूर्वं जगदीशस्य समकालं किञ्चिदुत्तरं वा महादेवस्य कालो निर्धारयितुं शक्यः। किञ्च, महादेवस्य पितामहस्य अनन्तपन्तस्य कालः १६५० ईशव्याः समीपे निर्धार्यते। तथैव तत्प्रपौत्रस्य सोमनाथपन्तस्य कालः १७३० ईशव्याः समीपे ज्ञायते[२]। अतस्तन्मध्ये वर्तमानः कालो महादेवस्यावश्यमेव भवेत्।

प्रस्तुतग्रन्थातिरिक्तं महादेवस्य नैके ग्रन्थाः समुपलभ्यन्ते। तेषु भवानन्दीप्रकाशः (दीधितिगूढार्थप्रकाशिका), न्यायकौस्तुभः, सर्वोपकरणी च[३] प्रामुख्यंभजन्ते। तत्र न्यायकौस्तुभः स्वतन्त्रो ग्रन्थः। भवानन्दोप्रकाशस्तु तत्त्वचिन्तामणेर्भवानन्दसिद्धान्तवागीशकृत-भवानन्दीटीकाया व्याख्यानम्। तथैव सर्वोपकरणी अपि भवानन्दीटीकाया एव व्याख्यानम्; किन्तु प्रकाशो विस्तृतः सर्वोपकरणी च संक्षिप्ता[४]।

एतदतिरिक्तमपि तासु तासु ग्रन्थ-ग्रन्थकारसूचीषु महादेवनाम्ना निम्नलिखिता ग्रन्थाः समुपलभ्यन्ते—

१. अवच्छेदकत्वलक्षणप्रकाशः, २. उपाधिवादप्रकाशः, ३. ज्ञप्तिरहस्यम्, ४. तर्कग्रन्थप्रकाशः, ५. व्याप्तिग्रहोपायपूर्वपक्षप्रकाशः, ६. व्याप्तिपूर्वपक्षप्रकाशः, ७. व्याप्त्यनुगमप्रकाशः, ८. सहचारग्रन्थप्रकाशः, ९. सामान्यलक्षणापूर्वपक्षप्रकाशः, १०. सामान्याभावप्रकाशः, ११. पदार्थप्रकाशभाष्यम् (लौगाक्षिभास्करकृतपदार्थप्रकाशस्य), १२. मितभाषिणी न्यायवृत्तिः, १३. अनुमानलक्षणम्, १४. अनुमानस्वरूप-

---

१. न्या० कौ० भूमिका, पृ० सं० ४।

२. तत्रैव।

३. प्रकाशकौस्तुभौ पुत्रावात्मजामुपकारिणीम्।
बुद्धिपत्न्यामलौकिक्यां महादेवो ह्यभावयत्॥ (सर्वोपकरण्याः समाप्तौ)

४. भवानन्दीप्रकाशस्तु विस्तृतो रचितो मया।
अतः संक्षेपतः कुर्वे व्याख्यां सर्वोपकारिणीम्॥ (तत्रैव)

निर्णयः, १५. अनुमितिप्रकाशः, १६. अनुमितिलक्षणप्रकाशः, १७. अनुमितिमितिपरामर्श-विचारः, १८. अनुमितिसङ्गतिप्रकाशः, १९. अवयवग्रन्थटीका, २०. अवयवग्रन्थरहस्यटीका, २१. असिद्धिपूर्वपक्षप्रकाशः, २२. असिद्धसिद्धान्तग्रन्थप्रकाशः, २३. आत्मत्वजातिविचारः, २४. आत्मवादः २५. ईश्वरवादः, २६. उपनयलक्षणप्रकाशः, २७. उपाधिग्रन्थटीका, २८. उपाधिपूर्वपक्षप्रकाशः, २९ उपाधिसिद्धान्तग्रन्थप्रकाशः, ३०. कूटघटितलक्षणप्रकाशः ३१. कूटघटितकूटाघटितलक्षणप्रकाशः, ३२. कूटाघटितलक्षणप्रकाशः, २३ केवलान्वयिग्रन्थप्रकाशः, ३४. चक्रवर्तिलक्षणप्रकाशः, ३५. तृतीयप्रगल्भलक्षणप्रकाशः, ३६. तृतीयमिश्रलक्षणप्रकाशः, ३७. द्वितीयचक्रवर्तिलक्षणप्रकाशः, ३८. द्वितीयमिश्रलक्षणप्रकाशः, ३९. नव्यानुमितिकार्यकारणभावविचारः, ४०. पक्षताग्रन्थः, ४१. पक्षतापूर्वपक्षप्रकाशः, ४२. पक्षताविचारः, ४३. पक्षतासिद्धान्तग्रन्थप्रकाशः, ४४. पञ्चलक्षणीप्रकाशः, ४५. परामर्शपूर्वपक्षप्रकाशः, ४६. परामर्शसिद्धान्तग्रन्थप्रकाशः, ४७. पुच्छलक्षणविचारः, ४८. पूर्वपक्षग्रन्थः, ४९. पूर्वपक्ष ग्रन्थप्रकाशः, ५०. प्रगल्भलक्षणप्रकाशः, ५१. प्रतिज्ञालक्षणटीका, ५२. बाधपूर्वपक्षग्रन्थप्रकाशः, ५३. बाधसिद्धान्तग्रन्थप्रकाशः, ५४. विधिवादः, ५५. विशेषनिरूपणप्रकाशः, ५६. व्यधिकरणधर्मावच्छिन्नाभावप्रकाशः, ५७. व्याप्तिवादप्रकाशः, ५८. सङ्गतिप्रकाशः, ५९. सत्प्रतिपक्षपूर्वपक्षग्रन्थप्रकाशः, ६०. सव्यभिचारसिद्धान्तग्रन्थप्रकाशः, ६१. सहचारग्रन्थप्रकाशः, ६२. साजात्यलक्षणप्रकाशः, ६३. सादृश्यवादः, ६४. सिंहव्याघ्रलक्षणप्रकाशः, ६५. सिद्धान्तलक्षणप्रकाशः, ६६. स्वलक्षणप्रकाशः, ६७ हेतुलक्षणटोका, ६८ हेतुलक्षणप्रकाशः।

एषु केचन स्वतन्त्रा ग्रन्थाः, केचन च भवानन्दीप्रकाशस्यांशभूताः सन्तोति प्रतीयते।

प्रस्तुतश्च ग्रन्थो महादेवस्य स्वतन्त्रग्रन्थेष्वन्यतमोऽत्यन्तं महत्त्वपूर्णोऽस्ति। न ह्ययं भवानन्दीप्रकाशस्यांशभूतः। यतः स्वयं रचयित्राऽस्य ग्रन्थस्यैकस्मिन् स्थलविशेषे प्रोक्तम्—"प्रकारान्तरञ्चास्मत्कृतभवानन्दीप्रकाशेऽनुसन्धेयम्" (पृ० ६) इति। एतेनायं ग्रन्थो भवानन्दीप्रकाशानन्तरं रचितस्तद्भिन्न एवेति प्रतीयते। ग्रन्थोऽयमनुमितिपरामर्शयोः कार्यकारणभावं वैशद्येन चर्चयन्नत्यन्तं गभीरो विवेचनापरो गभीरविषयोऽपि विवेचनपद्धतिमहिम्ना सारल्यमुपगतो नैकत्र नोक्तपूर्वामपि विचारसन्तति प्रस्तुवन् नव्यन्यायक्षेत्रे किमपि वैशिष्ट्यपूर्णं स्थानमावहति। शैलो खल्वस्य सरला स्पष्टा च। वाक्यप्रयोगे विशेषतो गोर्वाणगुरूणामप्यशक्यमित्यादिगर्वोक्तोः प्रयुञ्जानो ग्रन्थकारो यद्यपि दोधितिकारमनुसिसृक्षति, तथापि संक्षिप्तोक्तित आत्मानं दूरे स्थापयितुं प्रयतते। आद्यन्तं निसर्गतः स्पष्टः स्थलविशेषेषु लेखकटिप्पणी-सम्पादकटिप्पणी—समुचितपाठसंयोजनादिना स्पष्टतरः कृतोऽयं ग्रन्थः। अतो गौरवभियाऽपि चात्र ग्रन्थस्य सारांशो नोपस्थाप्यते।

नैके विद्वांसस्तांस्तान् ग्रन्थान् सम्पादयन्तो यशो लभन्ते, तत्कुतो न मादृक्षोऽत्र प्रवर्तताम् ? इति धिया सम्पादनं नाम कर्म बालकौतूहलं मन्यमानो ग्रन्थस्यास्य सम्पादने प्रवृत्तस्तत्र तत्र नैकत्र वा नैकान् नैकशास्त्रीयान् विषयान् साक्षात्कृत्यात्मनोऽज्ञानतायामुच्चैररुदम्। नूनमेव कर्मैतदनेकविधाध्यवसायवत एव साध्यम्, न तु मादृक्षस्य क्षोदीयसः। न हि परिमितमतयोऽत्र प्रवर्तन्तामिति मे सादरं परामर्शः। तथाप्यारब्धस्यान्तगमनमिति धिया, पूर्वमप्रकाशितोऽयं ग्रन्थः कथञ्चित् प्राकाश्यं नीयतां येन बहूनामस्य परिचयो भवेदिति वा धियाऽत्रात्मानं व्यापारयम्।

अत्रास्मत्पक्षतः प्रयुक्तानि कानिचिच्चिह्नानीत्थं वेदितव्यानि, यथा—१. भ्यां ( भ्या ) पृ० सं० १, अर्थात् 'भ्यां' इत्यस्य स्थाने 'भ्या' इति पठनीयम्। २. श[ता]त्वे पृ० सं० १९ अर्थात् ताकारः मूलप्रतौ नास्ति किन्त्वावश्यकः। ३. टि(क ?)भा पृ० सं० १०, अर्थात् मूलप्रतौ किकारोऽस्ति किन्त्वनावश्यकः।

ग्रन्थस्यास्य संशोधनं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सरस्वतीभवनस्थपाण्डुलिपितः कृतमस्ति। अस्या लेखकः क इति न ज्ञायते; किन्तु तत्र तत्र स्थलविशेषे तद्दत्तटिप्पणीभिस्तदीयं न्यायवैदुष्यं ज्ञातुं शक्यते। ताष्टिप्पणयः क्वचिदस्पष्टा अपि यथावत्स्थापिताः ले० टि० इति सङ्केतेन ज्ञातव्याः। मूलग्रन्थोऽपि लेखनदोषवशादस्मदज्ञानवशाद्वा क्वचिदस्पष्टो यथावत्स्थापितः, क्वचिच्च टिप्पण्या स्पष्टतां निनीषितो विद्वद्भिः संशोध्य ग्राह्यः। ग्रन्थस्यान्ते परिशिष्टचतुष्टयं संयोजितम्। तत्र प्रथमे—ग्रन्थे समागतानां नियमविशेषाणां सूची, द्वितीये विवादास्पदनियमानां सूची, तृतीये च प्रकीर्णा विषयाः स्थापिताः। तत्र ग्रन्थे समुद्धृतानां न्यायानां सूची, ग्रन्थान्ते लेखककृतश्लोकौ, लेखकस्य कानिचन विशिष्टाक्षराणि, लेखे वर्तमानानि कानिचन चिह्नानि, ग्रन्थे चर्चिताः केचन विचारकाश्चेति विषयाः सन्ति। चतुर्थे मुद्रणानवधानादिदोषजनिताः काश्चनाशुद्धयो यथासम्भवं शुद्धीकृत्य स्थापिताः। सत्यप्येवं विदुषां विवेक एवान्तिमं प्रमाणम्।

ग्रन्थस्यास्य सम्पादने सस्नेहमस्मानुपकृतवती भगवती शारदाम्बा ग्रन्थस्य यशस्वितायै समभ्यर्थ्यते।

ये खलु विदितनिखिलस्वारस्या अपि प्रयासेनानेन सदुत्साहं विवर्धयिषयैव किञ्चिद्विविदिषन्ति तद्व्याजेनैव च किञ्चिन्नामापि कृतिमालोचयन्ति ते विरला अप्यविरलयशस्का नमस्यन्ते। ये तु परेषां पाण्डित्यमकिञ्चिदिव मन्यमानाः पण्डितम्मन्याः सप्रश्रयं समर्पितमपि ग्रन्थरत्नं मनागपि न पिस्पृक्षन्ति, ते कस्य नमस्याः स्युरिति न जानीमहे।

सादरभरम्

**राजारामशुक्लः**

# विषयानुक्रमणिका


| विषयाः | पृष्ठाङ्काः |
|---|---|
| १. नैवेद्यम् | १–६ |
| २. मङ्गलम् ( ग्रन्थकारकृतम् ) | १ |
| ३. अनुमितिपरामर्शकार्यकारणभावत्रैविध्यकथनम् | १ |
| ४. तत्र 'केचित्'-मतम् | १–२ |
| ५. तन्मतखण्डनम् | २ |
| ६. पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिनाऽनुमितिहेतुत्वकथनम् | २ |
| ७. 'यत्तु'-मतम् | २ |
| ८. तत्खण्डनम् | २–३ |
| ९. परामर्शत्वस्य जातित्वप्रतिपादनम् | ३–४ |
| १०. 'केचित्तु'-मतम् | ४ |
| ११. नव्यमतम् | ४ |
| १२. साङ्कर्यदूषकताबीजनिरूपणम् | ४–५ |
| १३. अनुमितित्वस्य जातित्वप्रतिपादनम् | ५ |
| १४. अनुमितिकरणनिरूपणे प्राचीनमतम् | ५ |
| १५. तत्र 'केचित्तु'-मतम् | ५ |
| १६. नव्यमतम् | ५–६ |
| १७. 'अपरे तु'-मतम् | ६–७ |
| १८. अनुमितिनिष्ठकार्यतावच्छेदकत्वनिरूपणम् | ७–८ |
| १९. तत्र 'केचित्तु'-मतम् | ८ |
| २०. 'अन्ये तु-मतम् | ८–९ |
| २१. निश्चयत्वविचार | ९–१० |
| २२. 'केचित्'-मतम् | १० |
| २३. तत्खण्डनम् | १० |
| २४. 'यत्तु'-मतम् | १० |
| २५. तत्खण्डनम् | १० |
| २६. 'एतेन'-कल्पः | १०–१२ |
| २७. तत्खण्डनम् | १२ |
| २८. 'केचित्तु'-मतम् | १२ |

२९. नव्यमतम् १२–१३
३०. 'अपरे तु'-मतम् १३
३१. तत्खण्डनम् १३
३२. अतिनवीनमतम् १३–१४
३३. सिद्धान्तप्रतिपादनम् १४–१५
३४. संशयनिश्चयात्मकसमूहालम्बनविचारः १५–१६
३५. अनुमितिकारणतावच्छेदकत्वविचारः १६–१७
३६. अप्रामाण्यज्ञानाभावविचारः १७–२३
३७. प्रामाण्यनिश्चयस्य कारणतावच्छेदकत्वविचारः २३–२६
३८. अनाहार्यत्वस्य कारणतावच्छेदकत्वविचारः २६
३९. तत्र 'केचित्'-मतम् २६–२८
४०. 'अपरे तु'-मतम् २८–२९
४१. स्वमतप्रतिपादनम् २९–३१
४२. पक्षविशेष्यतायां मुख्यत्वविचारः ३१
४३. तत्र 'केचित्तु'-मतम् ३१
४४. तत्खण्डनम् ३१
४५. 'एतेन'-मतम् ३१–३२
४६. तत्खण्डनम् ३२
४७. 'केचित्तु'-मतेन पक्षधरमिश्राशयप्रतिपादनम् ३२
४८. तत्खण्डनम् ३२
४९. केषाञ्चिन्नवीनानां मतम् ३२–३३
५०. तत्खण्डनम् ३३
५१. द्विविधपरामर्शकारणताविचारः ३४–३७
५२. केन रूपेण परामर्शकारणतेति प्रतिपादनम् ३७–३८
५३. तत्र 'केचित्'-मतम् ३८–३९
५४. दीधितिकारानुयायिमतम् ४०
५५. 'केचित्तु-मतम् ४०–४१
५६. 'अपरे तु'-मतम् ४१–४५
५७. 'अन्ये तु'-मतम् ४५
५८. तत्र जीवनयोनियत्नविचारः ४५–४९
५९. लिङ्गोपधानमतम् ४९–५३
६०. परामर्शस्य कार्यसहभावेन कारणत्वविचारः ५३–५७
६१. विभिन्नलिङ्गकपरामर्शानामेकरूपेण कारणत्वविचारः ५७–६१

| | | |
|---|---|---|
| ६२. | जात्यतिरिक्तपदार्थानां किञ्चिद्धर्मपुरस्कारेण भानमिति नियमविचारः | ६१–६३ |
| ६३. | भ्रमत्वविचारः | ६३–६५ |
| ६४. | निष्कर्षः | ६५–६६ |
| ६५. | परिशिष्टम्—'क'—ग्रन्थे समुद्धृतानां नियमविशेषाणां सूची | ६७–६८ |
| | परिशिष्टम्—'ख'—ग्रन्थे समुद्धृतानां विवादास्पदनियमानां सूची | ६९ |
| | परिशिष्टम्—'ग'—प्रकीर्णानि (ग्रन्थे समुद्धृतानां न्यायानां सूची, ग्रन्थान्ते लेखककृतौ श्लोकौ, लेखकस्य कानिचन विशिष्टाक्षराणि, लेखे वर्तमानानि कानिचन चिह्नानि, ग्रन्थे चर्चिताः केचन विचारकाः) | ७० |
| | परिशिष्टम्—'घ'—शुद्धिपत्रम् | ७१–७३ |

## आचार्यमहादेवपुण्यस्तम्भकरविरचितः

# अनुमितिपरामर्शकार्यकारणभावविचारः

❀ ❀ ❀

नत्वा शिवपदाम्भोजं महादेवः सतां मुदे ।
विचारयत्यनुमितौ परामर्शस्य हेतुता(ताम्) ॥ १ ॥

यद्यपीह बहुभिर्विचारितं, पण्डितैस्तदपि नूतनमत्र ।
यद्यदस्ति तदिहावलोक्यतां सूक्ष्मदृष्टिमवलम्ब्य सज्जनाः ॥ २ ॥

प्रसिद्धार्थविशेषस्तु द्रुतमेव प्रसि[द्]ध्यति ।
अतोऽ(तः) प्रसिद्धं[१] संत्यज्य प्रवृत्तिरिति मे बुधाः ॥ ३ ॥

स्वीयं यो ग्रन्थमन्यस्य तदीयं चान्यकतृ(र्तृ)कम् ।
वक्ति शीघ्रं तयोर्नाशस्तावुभौ[२] जारजातकौ ॥ ४ ॥

तत्रान्वयव्यतिरेकाभ्यां(भ्या)मनुमितौ परामर्शस्य हेतुत्वमिति सिद्धान्तः । तच्च सामान्यतोऽनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिना तत्तद्व्यक्तित्वावच्छिन्नं प्रति[३] तत्तद्व्यक्तित्वादिना चेति त्रिविधम् ।

**अत्र केचित्**—व्यक्तिपौर्वापर्यनिर्वाहाय तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुत्वस्य यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपीति निर्वाहाय सामान्यतोऽनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन हेतुत्वस्य चावश्यकत्वेऽपि पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिना हेतुत्वे मानाभावः । न चैतादृशहेतुत्वानुपगमे पर्वतोद्देश्यकवह्निविधेयकानुमितित्वादेः कस्य कार्यतावच्छेदकत्वं[४] कार्यमात्रवृति(त्ति)धर्मस्य कार्यतावच्छेद-

---

१. प्रसिद्धे तावन्नैसर्गिकी प्रवृत्तिः पुरुषाणां न त्वप्रसिद्धे; किन्तु परामर्शस्यानुमितिहेतुतायां किमपि नूतनं विचारयन्नयं ग्रन्थकारः प्रसिद्धं सन्त्यज्य प्रवर्तते । वस्तुतोऽनुमितिपरामर्शकारणत्वे एतावान् विचारराशिर्नान्यत्रोपलभ्यते ।

२. उभौ ग्रन्थक्रेता ग्रन्थविक्रेता च । द्विविधाः प्राप्यन्ते जनाः । एके तावदन्यकर्तृकं ग्रन्थं स्वीयं वदन्ति । अन्ये च तदीयं स्वीयं ग्रन्थमन्यकर्तृकं वदन्ति । प्रथमा ग्रन्थक्रेतारः । द्वितीया विक्रेतारः । उभावपि तौ ( जातिगतैकत्वमादाय द्विवचनप्रयोगः ) जारजातकाविति । कर्मेदमत्यन्तं विगर्ह्यमित्याशयः ।

३. अत्र तद्व्यक्तिपदेन यत्किञ्चिद्व्याप्यवत्ताज्ञानव्यक्तिर्लभ्यते ।

४. यादृशानुमितिनिष्ठकार्यताया अवच्छेदकं किमिति जिज्ञासा ।

करत्वनियमादिति वाच्यम्, तस्य तत्प्रकारकेच्छाविरहविशिष्टविरोधिसामग्र्यभावादीनामेव कार्यतावच्छेदकत्वात् । न चैवं घटव्याप्यवत्तानिश्चयकाल उक्तविरोधिसामग्र्यभावरूपसामग्रीबलात् पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नापत्तिरिति तादृशहेतुत्वमावश्यकमिति वाच्यम्, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलजनकत्वेन तत्तद्व्यक्तित्वावच्छिन्नान्यतमरूपविशेषसामग्रीसहिताया एवोक्तसामग्र्यास्तत्तद्धर्मावच्छिन्नप्रयोजकत्वेनोक्तापत्त्यभावात् । अत एव **दीधितिकारेणा**प्यनुमितेर्वह्निव्याप्यवत्पर्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताया अवच्छेदिका ज्ञानवृति(त्ति)र्या जातिस्तद्वत्त्वमिति मूलस्वरससिद्धं लक्षणमसम्भवग्रस्तमित्यभिप्रेत्य यां[1] काञ्चिदनुमितिव्यक्तीत्यनेन लक्षणान्तरं स्वयमभिहितमिति वदन्ति, तदसत्, तथा सति सामान्यतोऽनुमितित्वावच्छिन्नं प्रति परामर्शत्वेनाप्यहेतुत्वप्रसङ्गात् । न च यद्विशेषयोरिति नियमनिर्वाहाय तथा हेतुत्वमावश्यकमिति वाच्यम् तादृशनियमे मानाभावाद् अनुमितित्वावच्छिन्नं प्रति ज्ञानत्वेनापि तादृशनियमनिर्वाहाच्च ।

अथ कार्योत्पत्त्यभावाधिकरणत्वस्य कारणाभावाधिकरणत्वप्रयुक्ततया परामर्शसामान्यशून्यकालवृत्त्यनुमितित्वावच्छिन्नोत्पत्त्यभावाधिकरणत्वे तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावकूटाधिकरणत्वस्य प्रयोजकत्वे गौरवात् लाघवेन परामर्शत्वावच्छिन्नप्रतियोगिताकाभावाधिकरणत्वस्य प्रयोजकत्वमित्युक्त्याऽनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन हेतुत्वसिद्धिरिति चेत्, तर्हि पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयशून्यकालवृत्त्यनुमितित्वावच्छिन्नोत्पत्त्यभावाधिकरणत्वे तत्तद्व्यक्तित्वावच्छिन्नाभावकूटाधिकरणत्वस्य प्रयोजकत्वे गौरव[ा]ल्लाघवेन पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वाद्यवच्छिन्नप्रतियोगिताकाभावाधिकरणत्वस्य प्रयोजकत्वमिति युक्तितौल्येन पर्वतोद्देश्यकवह्निविधेयकानुमितित्वाद्यवच्छिन्नं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिना हेतुत्वस्याप्यावश्यकत्वात् ।

यत्तूक्तयुक्तिर्न हेतुत्वसाधिका तथा सति पर्वतो वह्निमानित्याद्यनुमित्यव्यवहितोत्तरकालवृत्तितादृशानुमित्युत्पत्त्यभावाधिकरणत्वे गुरुनिश्चयघटितसिषाधयिषाविरहविशिष्टसिद्ध्यभावाभावाधिकरणत्वस्य प्रयोजकत्वे गौरवाल्लाघवेनानुमित्साविरहविशिष्टतादृशानुमित्यभावाभावाधिकरणत्वस्य प्रयोजकत्वमिति युक्त्याऽनुमितिं प्रत्यनुमित्साविरहविशिष्टतादृशानुमित्यभावत्वेनाप्यतिरिक्तहेतुतापत्तेरिति, तन्न, लाघवबलेन सि[द्]ध्यतस्तादृशातिरिक्तहेतुत्वस्याङ्गीकारे बाधकाभावात् । अन्यथोक्तयुक्तेर्हेतुत्वासाधकत्वे सर्वत्र विशेषतयैवोपपत्तौ सामान्यहेतुत्वोच्छेदप्रसङ्गात् । पक्षताहेतुत्वाङ्गी-

१. द्रष्टव्यम्—अनुमानगादाधरी, पृ० सं० ९६ ।

कतृ(र्तृ)नवीनैरुत्पन्नानुमितिव्यक्तेः पुनरुत्पादवारणाय तत्तदनुमितिव्यक्तिं प्रत्यनन्तानां तत्तदनुमितिप्राग्(ग)भावव्यक्तीनामनन्तहेतुत्वापेक्षया लाघवेन तादृशातिरिक्तहेतुत्वस्याङ्गीकर्तृत्वाच्च ।

वस्तुतस्तु पक्षताहेतुत्वमतेऽपि प्रत्यक्षाद्यात्मकतत्तत्सि[द्]ध्यभावस्य पृथक् पृथग् हेतुत्वेन तादृशानुमितिं प्रत्यनुमित्साविरहविशिष्टतादृशानुमित्यभावत्वेनातिरिक्तहेतुत्वमेवोचितम् । न च तत्तत्सि[द्]ध्यभावस्य पृथग् हेतुत्वे लाघवेनैकरूपेणैव हेतुत्वमुचितमिति वाच्यम्, एकरूपेण हेतुत्वे प्रत्यक्षत्वादिधर्मितावच्छेदकाप्रामाण्यज्ञानाभावादीनामेकत्र निवेशापत्त्या[त्त्या]तेषां परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेणानेकहेतुत्वापत्त्या गौरवेण तदपेक्षया प्रत्यक्षत्वादिधर्मितावच्छेदकाप्रामाण्यग्रहाभावविशिष्टप्रत्यक्षाद्यभावत्वेन पृथग् हेतुत्वस्यैवोचितत्वात् । एकरूपेण हेतुत्वे प्रत्यक्षानुमित्याद्यात्मकतत्तत्सिद्धिकालीनानन्ताननुगतानुमित्साभावानामेकत्र निवेशप्रसङ्गेन तेषां परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेणानन्तहेतुतापत्तेः । पृथग् हेतुत्वे च तत्तत्सिद्धिकालीनानुमित्साभावानां तत्तत्सिद्ध्यभावहेतुतायामेव निवेशादेकत्रानिवेशेनैकत्रनिवेशप्रयुक्तानन्तहेतुत्वाभावेन लाघवाच्च । किञ्चैकरूपेण हेतुत्व आहार्यसिद्धेरविरोधितयाऽनाहार्यसिद्ध्यभावत्वेन हेतुतयाऽनाहार्यत्वस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटरूपतयाऽनन्तानां भेदानामनुमित्साद्यात्मकसिद्धिकालीनानन्तानुगतानुमित्साभावानाञ्च विशेषणविशेष्यभावे विनिगमनाविरहेणानन्तहेतुतापत्तिः । पृथग् हेतुत्वे चानाहार्यत्वस्य प्रत्यक्षाभावत्वेन हेतुतायां निवेशो न त्वनुमित्यभावत्वेन हेतुतायामनुमित्यादावाहार्यत्वाभावादिति । तेषाञ्चैकत्र निवेशान्नैकत्र निवेशप्रयुक्तानन्तहेतुतापत्तिरिति प्रत्यक्षाभावत्वादिना सिद्ध्यभावस्य पृथग् हेतुत्वे लाघवम् ।

अथैवं पर्वतोद्देश्यकवह्निविधेयकत्वावच्छिन्नं प्रति पर्वतविशेष्यकवह्निव्याप्यवत्तानिश्चयत्वादिना ध्रौव्ये दीधितिकारस्य मूलोक्तानुमितिलक्षणं विहाय यां काञ्चिदिति लक्षणकरणे किं बीजमिति चेत्, न मूलोक्तलक्षणस्य गुरुतया लाघवेनैकरीत्या प्रमाचतुष्टयस्य लक्षणकरणे सामञ्जस्यमित्याशयेन वा लक्षणान्तरकरणादिति दिक् ।

अथ तथापि परामर्शत्वस्या[न]नुगतस्य दुर्वचतया कथमनुमितित्वावच्छिन्नं प्रति परामर्शनेन सामान्यतो हेतुत्वसम्भव इति चेत्, न, परामर्शत्वस्य जातित्वेनानुगतत्वात् । न च तत्र मानाभाव इति वाच्यम्, अनुमितित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकतयैव तत्सिद्धेः[१] । न च चाक्षुषत्वादिना तत्साङ्कर्यान्न तत्सिद्धिरिति

१. अनुमितित्वावच्छिन्नजन्यतानिरूपितजनकता किञ्चिदवच्छिन्ना जनकतात्वाद् घटत्वावच्छिन्नजन्यतानिरूपितदण्डनिष्ठजनकतावदित्यनुमानमत्र बोध्यम् ।

२. परामर्शत्वं विहाय चाक्षुषत्वं परामर्शनात्मके चाक्षुषज्ञाने । चाक्षुषत्वं विहाय परामर्शत्वमचाक्षुषे परामर्शे । उभयोः समावेशश्चाक्षुषपरामर्श इति साङ्कर्यम् ।

वाच्यम्, तस्य मानसत्वव्याप्यत्वोपगमात् । न चैवं चाक्षुषादिपरामर्शोत्तरमनुमित्यनापत्तिरिति वाच्यम्, तदनन्तरं मानसपरामर्शादेवानुमित्यङ्गीकारात् । अन्यथानुपपत्त्या क्षणविलम्बाङ्गीकारे बाधकाभावाच्चाक्षुषादिपरामर्शद्वितीयक्षण एवानुमितिरुत्पद्यत इत्यस्य तु शपथनिर्णेयत्वात् । अथ तस्य मानसत्वव्याप्यत्वोपगमे स्मृतित्वव्याप्यत्वमादाय विनिगमनाविरह इति चेत्, न, तस्य स्मृतित्वव्याप्यत्वोपगमे स्मृत्यात्मकपरामर्शोत्पत्तिकाले मानस[परामर्श]सामग्र्याः सत्त्वेन तदापत्तिवारणाय तत्रोद्बोधघटितगुरुभूतस्मृतिसामग्र्याः प्रतिबन्धकत्वं कल्प्यमिति गौरवम् । मानसव्याप्यत्वोपगमे च मानसपरामर्शोत्पत्तिकाले स्मृतिवारणाय तत्र लघुभूतमानससामग्र्याः प्रतिबन्धकत्वं कल्प्यमुद्बोधकस्य फलबलकल्प्यत्वेन तदभावादेव स्मृतिवारणात् । प्रतिबन्धकत्वमेव वा न कल्प्यमिति लाघवमिति तस्यैव मानसत्वव्याप्यत्वे विनिगमकत्वात् ।

**केचित्तु** परामर्शत्वस्य स्मृतित्वव्याप्यत्वोपगम उपेक्षात्मकपरामर्शादनुमित्यनुपपत्तिः, उपेक्षात्मकज्ञानात्स्मरणानुदयेन स्मरणात्मकपरामर्शं कल्पयित्वाऽनुमित्युपपादनासम्भवादिति मानसत्वव्याप्यत्वं परामर्शस्येत्याहुः ।

**नव्यास्तु** परामर्शत्वस्य मानसत्वव्याप्यत्वोपगमं विनाऽपि जनकतावच्छेदकतया जातिसिद्धौ बाधकाभावः । उपाधिसाङ्कर्यस्यै(स्ये)व जातिसाङ्कर्यस्यापि दूषकताबीजाभावेनादोषतया चाक्षुषत्वादिना साङ्कर्यस्याकिञ्चित्करत्वात् ।

अथ जातित्वाभावोन्नायकत्वमेव साङ्कर्यस्य दूषकताबीजम् । तथा हि—तज्जातिसमानाधिकरणत्वे सति, तज्जात्यभावसमानाधिकरणत्वे सति तज्जातिसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमेव तज्जातिसाङ्कर्यम् । अस्ति चेदं मूर्तत्वादिसङ्कीर्णे भूतत्वादौ । एवञ्च विवादास्पदं भूतत्वं न जातिः, मूर्तत्वसमानाधिकरणत्वे सति, मूर्तत्वाभावसमानाधिकरणत्वे सति मूर्तत्व( त्व ? )समानाधिकरणभेदप्रतियोगितावच्छेदकत्वात् । यन्निरुक्तहेतुमत् तज्जातित्वाभाववत् । यथा पृथिव्याकाशान्यतरत्वादि । यज्जातित्वाभावरूपसाध्यभाववत् तन्निरुक्तहेत्वभाववत् । यथा द्रव्यत्वादीत्यन्वयव्यतिरेकानुमानेन भूतत्वे जातित्वाभावसिद्धिः ।

अत्र हेतुतावच्छेदककोटौ प्रथमसत्यन्तमात्मत्वादौ व्यभिचारवारणाय । द्वितीयं सत्यन्तं पृथिव्या(वीत्वा)दौ व्यभिचारवारणाय । द्रव्यत्वादौ व्यभिचारवारणाय विशेष्यदलम् । न च मूर्तत्वाभावसमानाधिकरणस्य सत्ताऽऽत्मत्वोभयवद्भेदप्रतियोगितावच्छेदकत्वस्य सत्तादौ सत्वाद् व्यभिचारतादवस्थ्यमिति वाच्यम्, अवच्छेदकत्वे व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशनीयतयोभयवद्भेदादिप्रतियोगी(गि)तावच्छेदकत्वस्य चोभयत्वावच्छिन्नतया व्यभिचारवारणात् । एवमेवान्यत्रापि साङ्कर्यस्य जातिबाधकत्वमवसेयमिति चेत्, न, व्याप्तिग्राहकदृढतरकार्यकारणभावादिरूपानुकूलतर्कविरहेणोप-

दर्शितानुमानस्याप्रयोजकत्वात् । न च निरुपाधिकसहचार एवात्रानुकूलस्तर्कः । तस्यानुकूलतर्कत्वानङ्गीकारे तन्मात्रबलप्रवृत्तानां घटत्वाभाववान् पटत्वादित्यादिसदनुमानानां विलयापत्तेरिति वाच्यम्, तथा सत्युपाधिसाङ्कर्यस्यापि दोषत्वाभ्युपगमापत्तेः । पृथिवीत्वं न जातिः, घटजलान्यतरत्वसमानाधिकरणत्वे सति घटप्रलयान्यतरत्वाभावसमानाधिकरणत्वे सति घटजलान्यतरत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वादित्याद्यनुमानसम्भवेन[1] तस्यापि जाति(त्वा)भावोन्नायकत्वसम्भवात्, निरुपाधिसहचारस्यैवानुकूलतर्कतयाऽप्रयोजकत्वशङ्काया अभावात् । यदि चानुगताकारप्रतीत्यादिना प्रकारान्तरेण पृथिवीत्वस्य जातित्वसिद्ध्योपदर्शितानुमानस्य बाधग्रस्ततयोपाधिसाङ्कर्यस्य जातित्वाभावोन्नायकत्वाभावान्न दोषत्वमिति विभाव्यते, तदा प्रकृतेऽपि तुल्यं भूतत्वस्याप्यनुगताकारप्रतीत्यादिना प्रकारान्तरेण जातित्वसिद्ध्यापूर्वोपदर्शितानुमानस्य बाधग्रस्ततया जातिसाङ्कर्यस्यापि जातित्वाभावोन्नायकत्वासम्भवेनादोषत्वादिति प्राहुः ।

ननु तथाप्यनुमितित्वस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वरूपस्याननुगततया कथमनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन जनकत्वमिति चेत्, न, परामर्शत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकतयाऽनुमितित्वस्यापि जातिरूपत्वाज्जनकतावच्छेदकतए(यै)व जन्यतावच्छेदकतयाऽपि जाति(त्व)सिद्धेर्युक्तितौल्येन सर्वसम्मतत्वात् । नन्वनुमितौ परामर्शस्य हेतुतायामेव मानाभावः । न चान्वयव्यतिरेकाभ्यां तत्सिद्धिरित्युक्तमेवेति वाच्यम्, अनन्यथासिद्धावन्वयव्यतिरेकयोरेव[2] हेतुत्वसाधकतया प्रकृते च करणेन तयोरन्यथासिद्धत्वात् ।

अथ किमनुमितिकरणं येनान्यथासिद्धिरिति चेदत्र **प्राञ्चो** व्याप्तिज्ञानमेवानुमितिकरणमिति वदन्ति ।

**केचित्तु** व्याप्तिज्ञानस्यानुमितिकरणत्वे विशकलितव्याप्तिघटकीभूतपदार्थोपस्थितिमूलकाद् विशेष्ये विशेषणमिति न्यायेन विषयताशालिनः परामर्शादनुमित्यनापत्तिरित्यभावज्ञानमेवानुमितिकरणमित्याहुः ।

**नव्यास्त्व**त्राप्यभावविषयकत्वज्ञानत्वयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणताबाहुल्यमवच्छेदकगौरवञ्चेति मन एवानुमितिकरणमित्यूचुः । अन्यथा-

---

१. लेo टिo यत्साध्याभाववत्तद्धेत्वभाववद् यथा द्रव्यत्वादि । प्रथमं सत्यन्तमात्मा-(त्मत्वा)दौ व्यभिचारवारणाय । द्वितीयं सत्यन्तं घटत्वे व्यभिचारवारणाय विशेष्यदलञ्च द्रव्यत्वादौ व्यभिचारवारणाय ।

२. अत्र 'एव'कारः 'अनन्यथासिद्धावेव' इत्यत्र योजयितुं युक्तो न तु यथाश्रुतः ।

सिद्धत्वमेव कथमिति चेत्तदवेहि मतत्रयेऽपि स्वजन्यपरामर्शस्य कारणताघटकसम्बन्धत्वेन परामर्शसत्त्वे कारणताघटकसम्बन्धेन व्याप्तिज्ञानादिरूपकरणाभावादेवानुमित्यभावोपपत्तेरनुमितौ परामर्शहेतुतां विनैवोपपत्तिरिति चेत्, न, अनन्तपदार्थघटितस्य गुरोः स्वजन्यपरामर्शस्य सम्बन्धत्वाभावाद् भावे वा तस्य गुरुतया तदपेक्षया मतद्वये समवायस्य तृतीयमते च संयोगस्य लाघवेन कारणताघटकत्वेनान्यथासिद्धत्वाभावात्। समवायादिसम्बन्धेन व्याप्तिज्ञानादिरूपकरणासत्त्वेऽपि परामर्शासत्त्वसम्भवेन तदानीमनुमित्यापत्तिवारणायानुमितौ परामर्शहेतुताया आवश्यकत्वात्।

न चैवं करणस्य व्यापारासम्बन्धेन फलजनकत्वमिति नियमभङ्गापत्तिरिति वाच्यम्, तादृशनियमे मानाभावात्। न च स्वजन्यपर(रा)मर्शस्य करणताघटकसम्बन्धत्वेऽनुमितौ परामर्शस्य हेतुत्वाकल्पनेन लाघवं समवायादिसम्बन्धस्य करणताघटकत्वे च तत्कल्पनप्रयुक्तगौरवमिति वाच्यम्, लाघवात् समवायसम्बन्धेन करणत्वे सिद्धेऽनुमितौ परामर्शस्य हेतुत्वकल्पनप्रयुक्तगौरवस्योत्तरकालीनत्वेन फलमुखतयाऽदोषत्वात्। अत एव **एतयैव निषादस्थपतिं याजयेदि**त्यत्र लाघवात् कर्मधारये सिद्धे निषादस्य यागोपयुक्तविद्याध्ययनकल्पनागौरवस्य **स्त्रीशूद्रौ नाधीयाता**मित्यध्ययननिषेधवाक्यस्याधीयातामित्यस्य तत्तदध्ययनेतराध्ययनपरत्वरूपसंकोचकल्पनागौरवस्य चोत्तरकालिकत्वेन फलमुखतयाऽदोषत्वम्। एवं **वर्षासु रथकारोऽग्नि(ग्नी)नादधीते**त्यत्र रथकारशब्दस्य लाघवात् प्रतिलोमजातीये रूढिसिद्धौ तस्याग्न्याधानोपयुक्तविद्याध्ययनकल्पनागौरवस्योदीच्यत्वेन फलमुखतयाऽदोषत्वमिति निषादस्थपत्यधिकरण-रथकाराधिकरणसङ्गतिः, अन्यथा तदुच्छेदप्रसङ्गात्।

**अपरे** तु व्याप्तिज्ञानादीनामनुमितिकरणत्व एव स्वजन्यपरामर्शसम्बन्धस्य करणताघटकत्वसम्भावना। तदेव (तु) न; किन्त्वात्मैवानुमितिकरणम्। एवञ्च स्वजन्यपरामर्शसम्बन्धस्य न करणतावच्छेदकत्वं सम्भवति, आत्माऽऽत्मवानिति प्रतीत्यभावेन तेन सम्बन्धेनात्मन्यात्मनोऽसम्भवेन तादात्म्यसम्बन्धेन तस्यानुमितिकरणत्वात्। न चोक्तयुक्त्या व्याप्तिज्ञानाभावज्ञानयोरनुमित्यकरणत्वेऽपि मनसोऽनुमितिकरणत्वे किं बाधकमिति वाच्यम्, तत्रापि गौरवस्यैव बाधकत्वात्। तथा हि—तादात्म्यसम्बधेनात्मनः करणत्वे कार्योपधायकव्यापाराव्यवहितपूर्वक्षणावच्छिन्नतदधिकरणभेदस्यैव करणताघटकत्वेन भेदस्य नानासम्बन्धावच्छिन्नप्रतियोगिताकत्वाभावात् करणताशरीरेऽभावप्रतियोगितायाः सम्बन्धविशेषावच्छिन्नत्वानिवेशाल्लाघवम्। संयोगेन मनसः करणत्वे तु करणताघटकीभूताभावप्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वनिवेशनमावश्यकम्। अन्यथा तथाविधव्यापाराधिकरणात्मनि कालिकादिसम्बन्धेन मनसोऽभावसत्त्वेन मनस्त्वस्य तथाविधाभावप्रतियोगितानवच्छेदकत्वविरहेण मनसः करणत्वानुपपत्तेरिति तत्र प्रतियोगितायां सम्बन्धविशेषावच्छिन्नत्वनिवेशाद्गौरवमिति न

मनसोऽनुमितिकरणत्वं किन्त्वात्मन एव। तथा चोक्तरीत्याऽन्यथासिद्धत्वाभावादनुमितौ परामर्शहेतुतासिद्धिर्निष्प्रत्यूहैवेति प्राहुः। प्रकारान्तरञ्चास्मत्कृतभवानन्दीप्रकाशेऽनुसन्धेयम्। तस्मादनुमितौ परामर्शहेतुतायास्त्रैविध्यं निराबाधमेवेति सिद्धम्।

द्वितीयहेतुतायां कार्यतावच्छेदककोटौ पर्वतोद्देश्यकत्वनिवेशाद् भूतलं वह्निमदित्याद्यनुमितौ वह्निविधेयकत्वनिवेशाच्च पर्वतो घटवानित्यनुमितौ न व्यभिचारः। न चैवमपि द्रव्यं वह्निमत्, पर्वतो द्रव्यवानित्याद्यनुमितौ पर्वतोद्देश्यकत्ववह्निविधेयकत्वयोः सत्त्वाद् व्यभिचारः, पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नव्याप्यप्रकारताशालिनिश्चयत्वादेरेव हेतुतावच्छेदकतया तदवच्छिन्नस्य पूर्वमसत्त्वादिति वाच्यम्, पर्वतत्वावच्छिन्नोद्देश्यकत्ववह्नित्वावच्छिन्नविधेयकत्वयोर्निवेशतयाऽदोषात्। न च तथापि भूतलं वह्निमत् पर्वतो घटवानित्यादिसमूहालम्बनानुमितौ व्यभिचारस्तदवस्थ एवेति वाच्यम्, पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितित्वस्यैव कार्यतावच्छेदकत्वोपगमात्।

अथ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताकानुमितित्वमेव कार्यतावच्छेदकमस्तु किमुद्देश्यताविधेयतयोर्निवेशेन? न च विधेयताया अनिवेशे वह्निमान् पर्वतो घटवानित्याद्यनुमितौ व्यभिचार इति वाच्यम्, विधेयताया निवेशेऽप्युद्देश्यताया निवेशे प्रयोजनाभावादिति चेत्, न, व्यापकतानवच्छेदकरूपस्येव पक्षतानवच्छेदकरूपस्यापि तुल्ययुक्त्येतरबाधकालीनानुमितौ[1] भानेन नीलेतरो न वह्निमानित्यादिपरामर्शादुत्पन्नाया नीलपर्वतो वह्निमानित्याद्यनुमितेरसङ्ग्रहप्रसङ्गात्। तथा हि—पर्वतत्वावच्छिन्न[त्व]मत्र[2] शुद्धपर्वतत्वावच्छिन्नत्वं पर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वपर्यवसितमवश्यं वाच्यम्। अन्यथा वह्निव्याप्यधूमवान् नीलपर्वत इत्यादिपरामर्शजन्यायां नीलपर्वतो वह्निमानित्याद्यनुमितौ व्यभिचारप्रसङ्गात्। न च तत्पूर्वं पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यप्रकारताशालिनिश्चयसत्त्वान्न व्यभिचारप्रसङ्ग इति वाच्यम्, हेतुतावच्छेदककोटिप्रविष्टपर्वतत्वावच्छिन्नत्वस्यापि शुद्धपर्वतत्वावच्छिन्नत्वरूपेण विवक्षणीयतया तद्घटितहेतुतावच्छेदकावच्छिन्नस्य पूर्वमसत्त्वेन व्यभिचारसम्भवात्। न च तद्विवक्षणे किं बीजमिति वाच्यम्, वह्निव्याप्यधूमाभाववान् नीलपर्वतो वह्निव्याप्यधूमवान् पर्वत इति परामर्शसङ्ग्रहाय शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्याभावप्रकारताशून्यत्वस्यैव निश्चय[त्व]घटितया वह्निव्याप्यधूमवान्न वा नीलपर्वत

---

१. ले० टि० पर्वतः पर्वतीयवह्नीतरवह्न्यभाववानिति बाधकालीनपरामर्शाज्जातायां पर्वतः पर्वतीयवह्निमानित्याद्यनुमितौ।

२. ले० टि० कार्यतावच्छेदककोटौ।

इत्यादिसंशयवारणस्यैव तद्विवक्षणबीजत्वात्[१]। एवञ्चोपदर्शितेतरबाधकालीनानुमितेः पर्वतत्वातिरिक्तनीलावच्छिन्नविशेष्यताकत्वेनासङ्ग्रहः स्फुट एव। उद्देश्यतायां निवेशे कथं सङ्ग्रह इति चेत् ? शृणु—इतरबाधकालीनानुमितौ व्यापकतावच्छेदकरूपस्यैव विधेयतावच्छेदकतापर्याप्त्यधिकरणत्वमिति नियमवत् पक्षतावच्छेदकस्यैवोद्देश्यतावच्छेदकतापर्याप्त्यधिकरणत्वमिति नियमः। तथा चोपदर्शितबाधकालीननीलपर्वतो वह्निमानित्याद्यनुमितावुद्देश्यतावच्छेदकतायाः परामर्शविशेष्यतावच्छेदकपर्वतत्वरूपपक्षतावच्छेदकमात्रपर्याप्ततया पर्वतत्वातिरिक्तधर्मावच्छिन्नोद्देश्यताकतया सङ्ग्रहसम्भवात्।

किञ्च विशेष्यभेदेन भिन्नानां प्रत्यक्षसाधारणानन्तविशेष्यतानां कार्यतावच्छेदककोटौ प्रवेशगौरवम्। प्रत्यक्षव्यावृत्तोद्देश्यतानिवेशे तु लाघवमित्युद्देश्यतानिवेश एव समीचीन इति ध्येयम्।

**केचित्तु** विशेष्यतानिवेशे पर्वतो वह्निमानित्याद्यनुमितेरेवासङ्ग्रहः प्रकारतायाः समनियतविशेष्यतानिरूपितत्वेन विधेयतायाः [२]समनियतोद्देश्यतानिरूपितत्वेन च विधेयतायाऽ(अ)तिप्रसक्तविशेष्यतानिरूपितत्वाभावादित्युद्देश्यतानिवेश इत्याहुः।

**अन्ये** तु वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शात्पर्वतो वह्निमानित्याद्यनुमितिः। वह्निव्याप्यधूमः पर्वत इत्यादिपरामर्शाच्च पर्वते वह्निरित्याद्यनुमितिः। जनकीभूतज्ञान उपसर्जनतया[३] भातस्य जन्यज्ञानेऽप्युपसर्जनतया भानमिति नियमादुभयविधानुमित्युभयविधपरामर्शयोरेक एव कार्यकारणभावः। तत्र कारणतावच्छेदकं पर्वतत्वावच्छिन्नविषयतानिरूपितवह्निव्याप्यत्वावच्छिन्नविषयताशालिनिश्चयत्वं कार्यतावच्छेदकञ्च पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताकानुमितित्वम्। अत्र चोद्देश्यतां विहाय विशेष्यतानिवेशे पर्वते वह्निरित्याद्यनुमितेरसङ्ग्रहः। तत्र पर्वतादेः प्रकारत्वादुद्देश्यतानिवेश इति वदन्ति।

पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशालिशाब्दबोधादौ व्यभिचारवारणायानुमितित्वनिवेशः। वह्निव्याप्यधूमवद् भूतलम्, घटव्याप्यवान् पर्वत इत्यादिपरामर्शात् पर्वतो वह्निमानित्याद्यनुमितेरनुदयात् कारणतावच्छेदककोटौ

---

१. ले० टि० निपचयत्वघटकविशेष्यदलीयशुद्धत्वविवक्षणबीजत्वात्।

२. ले० टि० (समनियतत्वं) =स्वनिरूपकनिरूप्यत्वम्।

३. ले० टि० विशेषणतया।

पर्वतविशेष्यकत्व-वह्निव्याप्त्यादेर्निवेशः[1]। न च तथापि वह्निव्याप्यधूमव[द्] द्रव्यम्, द्रव्यव्याप्यवान् पर्वत इत्यादिपरामर्शात् पर्वतो वह्निमानित्याद्यनुमित्यापत्तिरिति वाच्यम्, पर्वतत्वावच्छिन्नविशेष्यकत्व-वह्नित्वावच्छिन्ननिरूपितव्याप्त्यादे[2]र्निवेशनीयतयाऽदोषात्। न चैवमपि घटव्याप्यवान् पर्वतो वह्निव्याप्यधूमवद्भूतलमित्यादिसमूहालम्बनपरामर्शात् पर्वतो वह्निमानित्याद्यनुमित्यापत्तिस्तदवस्थैवेति वाच्यम्, पर्वतत्वावच्छिन्नविशेष्यतानिरूपिता या वह्नित्वावच्छिन्ननिरूपितव्याप्यत्वावच्छिन्नप्रकारता[3], तच्छालिनिश्चयत्वस्य हेतुतावच्छेदकतयोक्तापत्त्यभावात्। वह्निव्याप्यधूमवान् (न वा) पर्वत इत्यादिसंशयात् पर्वतो वह्निमानित्याद्यनुमितेरनुदयान्निश्चयत्वनिवेशः।

अत्रेदं विचार्यते—किमिदं निश्चयत्वम्? न तावज्जातिश्चाक्षुषत्वादिना सङ्करप्रसङ्गात्[4]। न च चाक्षुषत्वादिव्याप्यविरुद्ध[5]भेदेन निश्चयत्वस्य नानात्वान्न साङ्कर्यम्। चाक्षुषत्वादीनां निश्चयत्वव्याप्यविरुद्धभेदेन नानात्वमादाय विनिगमनाविरहस्तु न सम्भवति चाक्षुषत्वादिनानात्वे बहुतरजातिकल्पनम्। निश्चयत्वनानात्वे चाक्षुषत्वादिव्याप्यस्यैव तस्य स्पार्शनत्वादिविरुद्धतेत्यल्पजातिकल्पनमिति विनिगमनायाः सत्त्वादिति वाच्यम्, निश्चयत्वस्य नानात्वे व्यभिचारकारणतावच्छेदकत्वासम्भवात्, नानात्वोपगमेन साङ्कर्यवारणेऽप्यांशिकत्वेनाव्याप्यवृत्तितया तस्य जातित्वासम्भवाच्च।

अथ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकाभावप्रकारताशून्यत्वे सति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यत्वावच्छिन्नप्रकारताशालिज्ञानत्वादिकमेव प्रकृते निश्चयत्वमिति चेत्, न, वह्निव्याप्यधूमवद्भेदादिकोटिकसंशयस्य वह्निव्याप्यत्वावच्छिन्नप्रतियोगितावच्छेदकताकाभावप्रकारकत्वेऽपि वह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकाभावप्रकारताशून्यत्वेन सङ्ग्रहापत्तेः। वह्निव्याप्य-

---

१. वह्निव्याप्यधूमवद्भूतलमिति परामर्शाद् वह्निमान् पर्वत इत्यनुमितिवारणाय पर्वतविशेष्यकत्वस्य, घटव्याप्यवान् पर्वत इति परामर्शाद् वह्निमान्पर्वत इत्यनुमितिवारणाय वह्निव्याप्यप्रकारकत्वस्य च निवेशः। वह्निव्याप्त्यादेरिति—वह्निव्याप्यप्रकारकत्वस्येत्यर्थः।

२. वह्नित्वावच्छिन्ननिरूपितव्याप्तिविशिष्टप्रकारकत्वस्येत्यर्थः।

३. वह्नित्वावच्छिन्ननिरूपितं यद्व्याप्यत्वं=व्याप्तिः, तदवच्छिन्ना प्रकारतेत्यर्थः।

४. निश्चयत्वं विहाय चाक्षुषत्वं निश्चयानात्मके चाक्षुषज्ञाने। चाक्षुषत्वं विहाय निश्चयत्वमचाक्षुषे निश्चये। उभयोः समाहारश्चाक्षुषनिश्चय इति साङ्कर्यम्।

५. ले० टि० चाक्षुषत्वविरुद्धेत्यर्थः।

भिन्नः पर्वतो वह्निव्याप्यधूमवानित्यादिनिश्चयस्य वह्निव्याप्यत्वावच्छिन्न-प्रतियोगिताकभेदरूपाभावप्रकारकत्वेनासङ्ग्रहापत्तेश्च । न च पर्वतत्वावच्छिन्न-विशेष्यतानिरूपितवह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रकारताशून्यत्वे सति, पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यत्वावच्छिन्नप्रतियोगितावच्छेदकताकान्यो-न्याभावप्रकारताशून्यत्वे च सति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यत्वाव-च्छिन्नप्रकारताशालिज्ञानत्वमेव निश्चयत्वमिति नोक्तदोषद्वयमिति वाच्यम्, तथापि वह्निव्याप्यधूमाभाववान् वह्निव्याप्यधूमवांश्च पर्वत इति समुच्चयात्मकपरामर्शा-सङ्ग्रहापत्तेः ।

**अत्र केचित्**—अवच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानं संशयः । सामाना-धिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः । अयमेव संशयसमुच्चययोभे(र्भे)दः । एवञ्चावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणतावच्छेदकनिश्चयत्वं पूर्वोक्तमेव । सामानाधिकरण्येन हेतुमत्ताज्ञानकारणतावच्छेदकपूर्वोक्तनिश्चय[त्व]शरीरे चात्यन्ता-[भावा]न्योन्याभावप्रकारतायामवच्छिन्नविशेषणतासंसर्गावच्छिन्नत्वमधिकं निवेशनीयम् । समुच्चयस्यावच्छिन्नविशेषणतासंसर्गावच्छिन्नाभावप्रकारताशून्यत्वेन सामानाधिकर-ण्येन हेतुमत्ताज्ञानकारणतावच्छेदकाक्रान्तत्वान्नासंग्रह इत्याहुः । तन्न, तथापि वह्नि-व्याप्यधूमवान् जलत्ववान् वा इत्यादि भावद्वयकोटिकसंशयस्यात्यन्ताभावान्योन्याभाव-प्रकारताशून्यत्वेन सङ्ग्रहापत्तेः ।

यत्तु भावद्वयकोटिकः संशय एव नाभ्युपेयते । स्थाणुर्वा पुरुषो वाऽयमि(ति ?) त्यादिसंशयश्च स्थाणुत्वतदभाव-पुरुषत्वतदभावादिरूपचतुष्कोटिक एवेति, तदज्ञान-विलसितम्, भावद्वयकोटिकत्वेनानुभवसिद्धस्य संशय[स्य] चतुष्कोटिकतयोपपादनस्य वचनमात्रेणासम्भवात् । तदुक्तमभियुक्तैः—**तदेतन्महत्कौशलं यदनुभवोऽपि व्याख्यायते नामेति** । अभावकोटि(क ?)-भासकसामग्र्या असत्त्वे प्रत्येकाभासकसामग्रीसमाजाद् भावद्वयकोटिकसंशयस्थले चतुष्कोटिकत्वासम्भवाच्च । न च तदानीं न जायते संशय इति वाच्यम्, अनुभवविरोधात् । अनुभवानादरे संशयादनुमितिर्जायत इत्यस्यापि सुवचतया निश्चयत्वनिर्वचनायासवैयर्थ्यात् ।

एतेन [1]'वह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रकारत्वानिरूपितत्वे सति वह्निव्याप्यत्वावच्छिन्नप्रतियोगितावच्छेदकताकान्योन्याभावप्रकारत्वानिरूपितत्वे च सति यावद्वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्न[न्ना या]विशेष्यता तच्छालिज्ञानत्वमेव निश्चयत्वम् । संशये च भावाभावोभयप्रकारतानिरूपित

---

१. अपास्तमित्यनेनान्वयः ।

ए( ता+ए=तै )कैव विशेष्यता। समुच्चये च विशेष्यताद्वयम्। अयमेव संशयसमुच्च-[य]योर्भेदः। समुच्चयीयभावकोटिप्रकारतानिरूपितविशेष्यताया अभावकोटिप्रकारत्वा-निरूपितत्वान्नासङ्ग्रहः। न च संशये भावाभावोभयप्रकारतानिरूपितविशेष्यताद्वयम्। समुच्चये त्वेकविशेष्यतेत्येव किन्न स्यात्। तावताऽपि संशयसमुच्च[य]योर्वैलक्षण्य निर्वाहा-दिति वाच्यम्, तथा सति वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्न-विशेष्यताभिन्ना या वह्निव्याप्यत्वावच्छिन्नप्रतियोगिताकात्यन्ताभावप्रकारतानिरूपित-पर्वतत्वावच्छिन्नविशेष्यता, या च वह्निव्याप्यत्वावच्छिन्नप्रतियोगितावच्छेदकता-कान्योन्याभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता तच्छून्यत्वे सति, वह्निव्याप्य-त्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वरूपस्यैव निश्चय-त्वस्य वक्तव्यतया गौरवापत्तेः।

यत्तु संशये भावाभावोभयप्रकारतानिरूपितैकविशेष्यतासत्त्वेऽपि प्रत्येकप्रकारता-निरूपितविशेष्यताद्वयसत्त्वे(ऽपि ?) बाधकाभावः। एवञ्च वह्निव्याप्यधूमवान्न वा पर्वत इत्यादिसंशयानामभावप्रकारत्वानिरूपितभावकोटिप्रकारतानिरूपितपर्वतत्वावच्छिन्न-विशेष्यताशालित्वेन वारणसम्भवः। न च प्रत्येकप्रकारतानिरूपितविशेष्यताद्वयशालि-ज्ञानं प्रति संशयसामग्र्याः प्रतिबन्धकत्वकल्पनान्न दोष इति वाच्यम्, तादृशप्रतिबध्य-प्रतिबन्धकभावकल्पने गौरवापत्तेरिति, तन्न, अनन्तसंशयात्मकविशेष्यताद्वयकल्पनाम-पेक्ष्य(या ?) तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनायामेव लाघवात्।

अथवा वह्निव्याप्यवह्निव्याप्यात्यन्ताभावोभयप्रकारतानिरूपितपर्वतत्वावच्छिन्न-विशेष्यताशून्यत्वे सति, वह्निव( म )दन्योन्याभावोभयप्रकारतानिरूपित-पर्वतत्वावच्छिन्नविशेष्यताशून्यत्वे च सति वह्निव्याप्यत्वावच्छिन्नप्रकारता-निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वमेव निश्चयत्वम्। एवञ्च संशयस्य प्रत्येकप्रकारतानिरूपितविशेष्यताद्वयवत्त्वेऽपि बाधकाभावः। भावाभावोभयप्रकारता-निरूपितैकविशेष्यताया अपि सत्त्वेन तद्वारणसम्भवात्। अस्मिन् कल्प उभय-प्रकारतानिरूपितैकविशेष्यतासंशये समुच्चये वा स्वीक्रियत इति पूर्वोक्तविनिगमना-विरहशङ्काऽपि न सम्भवति समुच्चय एकविशेष्यताङ्गीकारेऽपि तुल्ययुक्त्या विशेष्यता-द्वयसत्त्वेऽपि बाधकाभावेन गुरुणो( रोर )पि पूर्वोक्तनिश्चयत्वस्य तत्रासत्त्वेन तदसङ्ग्रहापत्तेः।

न च वह्निव्याप्यवह्निव्याप्यात्यन्ताभावोभयप्रकारतानिरूपितपर्वतत्वावच्छिन्न-विशेष्यत्वाभावविशिष्टा या वह्निव्याप्यात्यन्ताभावप्रकारतानिरूपितपर्वतत्वावच्छिन्न-विशेष्यता, या च वह्निव्याप्यवदन्योन्याभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता तच्छून्यत्वे सति, या वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता, तच्छालिज्ञानत्वरूपनिश्चयत्वस्य समुच्चये सत्त्वान्न तदसङ्ग्रह इति। असत्त्वे च

विनिगमनाविरह इति वाच्यम् तथाप्येतादृशनिश्चयत्वस्यापि गुरुतया संशय एकविशेष्यत्वाङ्गीकारे लाघवस्य विनिगमकताया ब्रह्मणाऽपि वारयितुमशक्यत्वादिति निष्कर्षसहमपि केषाञ्चिन्मतमपास्तं वह्निव्याप्यवान् जलत्ववान् वा पर्वत इत्यादि भावद्वयकोटिकसन्देहानामत्यन्ताभावान्योन्याभावप्रकारकतया वारणासम्भवात् ।

**केचित्तु** वह्निव्याप्यनिरूपितविरोधसंसर्गावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशून्यत्वे सति, वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वमेव निश्चयत्वम् । सर्वसंशये कोट्यो (ट्योः) संसर्गतया परस्परं विरोधो भासते, न तु समुच्चये । अयमेव संशयसमुच्चययोर्भेदः । विरोधसंसर्गावच्छिन्नप्रकारतात्वेनात्यन्ताभावान्योन्याभावा(व)प्रकारतानां भावरूपसंशयविरुद्धधर्मप्रकारतानाञ्चानुगमात् । वह्निव्याप्यधूमवान्न वा पर्वत इत्याद्यत्यन्ताभावान्योन्याभावकोटिकसंशयानां वह्निव्याप्यधूमवान् जलत्ववान् वा पर्वत इत्यादिविरुद्धजलत्वादिकोटिकसंशयानां व्युदासः समुच्चयस्य च सङ्ग्रहः ।

यत्तु यादृशसंशये विरोधो न भातस्तादृशसंशयवारणासम्भवः । न च तादृशसंशये मानाभाव इति वाच्यम्, तादृशसंशयानङ्गीकारे **"क्वचिद्विरोधभानस्य सामग्रीसमाजाधीनत्वात्[१]"** इति सत्प्रतिपक्षग्रन्थीय**दीधितिकार**लिखनस्यासङ्गतेः । क्वचिदित्यस्य संशयविशेष इत्यर्थकतया तादृशसंशयाङ्गीकारस्य **दीधितिकार**सम्मतत्वादिति, तन्न, **दीधितिकार**ग्रन्थस्यान्याभिप्रायकत्वात् । तथा हि—**दीधितिकार**ग्रन्थे क्वाचित्कत्वं न संशयापेक्षं किन्तु ज्ञानापेक्षम् । तथा च क्वचिदित्यस्य संशयविशेष इति नार्थः; किन्तु ज्ञानविशेषः, संशयात्मकज्ञानमिति यावत् । प्रकरणपर्यालोचनया तथैवार्थलाभात् । यद्वा प्रकारतया विरोधभानाभिप्रायेण स ग्रन्थः । क्वचित्=संशयविशेषे, विरोधभानस्य= प्रकारतया विरोधभानस्य, सामग्रीसमाजाधीनत्वात् =विरोधोपस्थित्याद्यधीनत्वादित्यर्थः । एवञ्च सर्वत्र संशये विरोधस्य संसर्गतया भानात् सर्वेषां संशयानां वारणमिति न कोऽपि दोष इत्याहुः ।

**नव्यास्तु** नियमतो विरोधसांसर्गिकविषयतायाः कुत्राप्यक्लृप्तत्वात् सकलसंशयस्य नियमतो विरोधसांसर्गिकत्वे प्रमाणाभावः । न च समुच्चयवैलक्षण्यनिर्वाहायाक्लृप्ताऽपि सा[२] संशये कल्प्यत इति वाच्यम्, संशये कोटिताख्यविलक्षणविषयताङ्गीकारेणैव समुच्चयवैलक्षण्यनिर्वाहात् । तथा च कोटिताख्यविषयताभिन्ना या वह्निव्याप्यत्वा-

१. "क्वचिद्विरोधभानस्य तत्प्रयोजकाधीनत्वात्" इति पाठः ( गा०, पृ० सं० १८०४ चौखम्भा-संस्कृत-सीरीज, १९१९ ) उपलभ्यते ।

२. सा विरोधसांसर्गिकविषयता ।

वच्छिन्नप्रकारता, तन्निरूपितपर्वतत्वावच्छिन्नविषयता-(विशेष्यता)शालिज्ञानत्वमेव निश्चयत्वम् । एवञ्च पूर्वमतापेक्षया कारणतावच्छेदकलाघवमपि । अत एव[1] संशये समुच्चयवैलक्षण्यनिवार्हाय कोटितारूयविषयताकल्पने विरोधसांसर्गिकविषयता वा (या) अक्लृप्तत्वस्योभयत्रापि सत्वादिति विनिगमनाविरह इत्यपि परास्तम्, लाघवस्यैव विनिगमकत्वादित्याहुः ।

**अपरे** तु संशये कोटितारूयविषयतायामपि मानाभावः । समुच्चयवैलक्षण्यस्य कोटिद्वयप्रकारतयोरवच्छेद्यावच्छेदकभावोपगमेनैव निर्वाहात् । एवञ्च किञ्चित्प्रकारत्वानवच्छिन्ना या वह्निव्याप्यत्वावच्छिन्नप्रकारता, तन्निरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिज्ञानत्वं निश्चयत्वं (त्वमिति)संशयव्युदासः ।

अथ संशये कोटिद्वयप्रकारतानिरूपितविशेष्यतयोरव[च्छेद्या]वच्छेदकभावोऽस्तु, तावताऽपि समुच्चयवैलक्षण्यनिर्वाहात् । किञ्चिद्विशेष्यत्वानवच्छिन्ना या वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यता, तच्छालिज्ञानत्वरूपनिश्चयत्वस्यापि सुवचत्वादिति चेत्, न, विशेष्यतयोरवच्छेद्यावच्छेदकभावस्य[2] क्वचित्समुच्चयेऽपि सत्त्वेन तस्य वैलक्षण्यानिर्वाहकत्वात् । न च क्वापि समुच्चये विशेष्यतयोरवच्छेद्यावच्छेदकभावानङ्गीकारान्न दोष इति वाच्यम्, तथा सति संयोगतदभावाधिकरणं भूतलमिति द्वन्द्वगर्भतत्पुरुषस्थले द्वन्द्वोपस्थापितसंयोगतदभावोभयप्रकारतानिरूपितविशेष्यताकसमुच्चयात्मकज्ञाने विशेष्यतयोरवच्छेद्यावच्छेदकभावविरहे विशृङ्खलधर्मिविषयताद्वयोपगमे ज्ञानस्य समूहालम्बनतापत्त्यैकवाक्यतारूपसामर्थ्याभावेन समासानुपपत्तेरित्याहुः । तदपि चिन्त्यम्, कोटिद्वयप्रकारतयोरवच्छेद्यावछेदकभावस्यापि घटो घटाभावो वा भूतले इति कोटिद्वयविशेष्यकसंशयसाधारण्याभावेन संशयसमुच्चययोर्वैलक्षण्यानिर्वाहकत्वात् । न च कोटिविशेष्यक एव संशयो नास्तीति वाच्यम्, कोटिप्रकारकस्येव तस्यानुभवसिद्धस्य दुरपह्नवत्वात् प्रामाणिकग्रन्थकारसम्मतत्वात् (च ?), वक्ष्यमाणरीत्यैवोपपत्तावुपदर्शितप्रकारस्य गौरवग्रस्तत्वाच्च ।

**अत्रातिनवीनाः**—सन्देह्मीत्यनुभवसिद्धं संशयत्वं जातिरूपरूपम् । तदवच्छिन्नेतरज्ञानत्वरूपं निश्चयत्वं कारणतावच्छेदकम् । न च चाक्षुषत्वादिना[3] सङ्करात्कथं संशयत्वं जातिरिति वाच्यम्, चाक्षुषत्वादिव्याप्यविरुद्धभेदेन तस्य नानात्वात् तदभावकूटवत्त्वस्यैव निश्चयत्वघटकत्वात् । न च संशयत्वस्याव्याप्यवृत्तित्वात्कथं जातित्वमिति

१. परास्तमित्यनेनान्वयः ।

२. समानाधिकरणविषयतयोरवच्छेद्यावच्छेदकभाव इति सिद्धान्तः ।

३ चाक्षुषत्वं विहाय संशयत्वमचाक्षुषे संशये । संशयत्वं विहाय चाक्षुषत्वं चाक्षुषनिश्चये । उभयोः समावेशश्चाक्षुषसंशय इति साङ्कर्यम् ।

वाच्यम्, अव्याप्यवृत्तेरपि जातित्वे बाधकाभावात् । अथवा संशयत्वं जातिर्व्याप्यवृत्तेरेव । संशयत्वविशिष्टनिरूपितत्वमेवाव्याप्यवृत्ति । तच्च संशयीयकोटिविषयतायामेवाभ्युपेयते । न चैवं संशयनिश्चययोर्विषयताभेदप्रसङ्ग इति वाच्यम्, उक्तसंशयसमुच्चययोर्वैलक्षण्यानुपपत्त्या तस्येष्टत्वात् । तथा च संशयत्वविशिष्टनिरूपिता या वह्निव्याप्यत्वावच्छिन्नविषयता, तन्निरूपितपर्वतत्वावच्छिन्नविषयताशालिज्ञानत्वमेव निश्चयत्वमिति सर्वं समञ्जसमिति प्राहुः ।

अत्रेदमवधेयम्—वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वरूपकारणतावच्छेदकघटकं निश्चयत्वं जातिरूपमेव । न च तस्य जातित्वे मानाभाव इति वाच्यम्, निश्चिनोमीत्यनुगताकारप्रतीत्या कारणतावच्छेदकतया च तस्य जातित्वसिद्धेः । न च चाक्षुषत्वादिना सङ्कर इति वाच्यम्, चाक्षुषत्वादिव्याप्यविरुद्धभेदेन तस्य नानात्वात् । न च नानात्वे व्यभिचारेण कथं कारणतावच्छेदकत्वमिति वाच्यम्, नानात्वेऽपि मानसत्वव्याप्यनिश्चयत्वस्यैव कारणतावच्छेदकत्वात् । न चैवं वह्निव्याप्यधूमवान् पर्वत इत्यादिचाक्षुषादिनिर्णयादनुमितिर्न स्यादिति वाच्यम्, तदानीमनुमितिसामान्यकारणतावच्छेदकमानसत्वव्याप्यजातिविशेषपरामर्शत्वावच्छिन्नरूपसामान्यसामग्र्यभावेनानुमित्यनुदयस्येष्टत्वात् । न चाव्याप्यवृत्तेर्निश्चयत्वस्य कथं जातित्वमिति वाच्यमव्याप्यवृत्तेरपि जातित्वे बाधकाभावात् । यद्वोक्तरीत्या[1] निश्चयत्वं व्याप्यवृत्तेरे(त्ये) व । निश्चयत्वविशिष्टनिरूपितत्वमेवा(एव ?)व्याप्यवृत्ति । तथा च निश्चयत्वविशिष्टनिरूपितत्वस्य वह्निव्याप्यत्वावच्छिन्नविषयतायां निवेशान्न दोषः । अथवा निश्चयत्वं विषयताविशेष एव । विषयताविशेषे च [न] साङ्कर्यं न चा(नाप्य) व्याप्यवृत्तित्वं बाधकम्[2] ।

न चैवमपि वह्निव्याप्यधूमवान् न वा पर्वतो भूतलं घटवदित्यादिसमूहालम्बनसंशयादनुमित्यापत्तिस्तस्यापि वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालित्वाद् भूतलं घटवदित्याद्यंशे निश्चयत्वाक्रान्तत्वाच्चेति वाच्यम्, वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकत्वावच्छिन्ननिश्चयत्वादेरेव कारणतावच्छेदकत्वेनोक्तसंशयादनुमित्यसम्भवात् । तत्र घटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वाववच्छिन्नविशेष्यताकत्वावच्छिन्ननिश्चयत्वस्यैव सत्त्वात् । अत एव प्राचीनग्रन्थेषु **निश्चयत्वञ्चाव्याप्यवृत्तिर्जा(जा)तिविशेषो विषयताविशेषो वेत्यन्यदेतदित्युक्तम्** ।

---

१. उक्तरीत्या संशयत्वमिव ।

२. उभयमपि न बाधकमित्याशय। ।

वस्तुतस्त्वनुमितिसामान्यकारणतावच्छेदकपरामर्शत्वजातिमन्तर्भाव्यैव वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिपरामर्शत्वादिनैव पर्वतोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्नं प्रति हेतुतया हेतुतावच्छेदककोटौ निश्चयत्वनिवेशे मानाभावः। वह्निव्याप्यधूमवान् न वा पर्वत इत्यादिसंशये परामर्शत्वजात्यनङ्गीकारेण[1] तस्मादनुमित्यापत्तेरसम्भवात्।

यत्तु वह्निव्याप्यधूमवान्न वा पर्वतो घटव्याप्यवानित्यादिसंशयनिश्चयात्मकसमूहालम्बने परामर्शत्वजातिरभ्युपेयते न वा ? आद्ये वह्न्यनुमित्यापत्तिः। अन्त्ये घटानुमित्यनापत्तिः। न च तादृशज्ञानाद् घटानुमितिर्न जायत एव; किन्तु तदुत्तरोत्पन्नाद् वह्निव्याप्यतदभावाविषयकाद्घटव्याप्यवात्प(न् प)र्वत इत्यादिपरामर्शादेवेति वाच्यम्, तादृशज्ञानेऽपि पूर्वोपस्थितवह्निव्याप्यतदभावयोर्भानसम्भवेन[2] पूर्वोक्तविकल्पतादवस्थ्यात्[3]। न चातिरिक्तप्रतिबध्यप्रतिबन्धकभावं[4] कल्पयित्वा तादृशज्ञानस्य वह्निव्याप्यतदभावाविषयकत्वमुपपादनीयमिति वाच्यम्, तादृशातिरिक्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवात्। तस्मात्परामर्शत्वनिवेशासम्भवेन निश्चयत्वनिवेश आवश्यक इति, तदसत्, सर्वत्र क्षणविलम्बेन संशयनिश्चयात्मकज्ञानद्वयस्यैवाभ्युपगमे संशयनिश्चयात्मकसमूहालम्बनैकज्ञानाभावेनोक्तविकल्पासम्भवात्। अत एव संशयत्वनिश्चयत्वयोर्जातित्वं तत्र तत्रोक्तं स्वरसत एव सङ्गच्छते।

अथ संशयनिश्चयात्मकैकसमूहालम्बनोत्पत्तौ बाधकाभावः संशयनिश्चयसामग्र्योरेकदा समाजसम्भवादिति चेत्, न, संशयसामग्रीसत्त्वे समानविषयकनिश्चयवारणाय

---

१. अनुमितिकरणत्वाभावात्।

२. प्रतिबन्धकासत्त्वे वह्निव्याप्यतदभावाविषयकत्वमुत्तरज्ञाने नानुभवसिद्धमित्याशयः।

३. किञ्चोक्तसंशयनिश्चयात्मकसमूहालम्बनज्ञानस्य घटव्याप्यवान् पर्वत इत्यात्मकत्वमप्यस्ति। तथा च तादृशज्ञानोत्तरं घटव्याप्यवान् पर्वत इति परामर्शोत्पादे मानाभावः। यतस्तद्विषयकं ज्ञानं यदि तद्विषयकज्ञानं प्रति कारणं तदा तद्विषयकानुव्यवसायं प्रत्येव। तादृशपरामर्शश्च नानुव्यवसाय इति। अन्यच्च घटव्याप्यवान् पर्वत इति परामर्शसामग्र्या उक्तसंशयनिश्चयात्मकसमूहालम्बनकाल एव नाशात्तदुत्तरं परामर्शोत्पत्त्यसम्भवः।

४. निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वेनोक्तसमूहालम्बनज्ञानस्य न निश्चयात्मक(परामर्शात्मक)त्वम्। संशयकाले च संशयसामग्र्या अभावेन तदुत्तरं जायमानज्ञानस्य न संशयात्मकत्वमिति तादृशज्ञानस्य वह्निव्याप्यतदभावाविषयकत्वं सम्भवतीति भावः।

विषयविशेषमन्तर्भाव्य[1] संशयसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवेण सामान्यतो निश्चयमात्रे[2] एव संशयसामग्र्याः प्रतिबन्धकत्वेनान्यांशे संशयात्मकस्यान्यांशे निश्चयात्मकस्याप्येक(एक ?)[3]समूहालम्बनस्यासम्भवात् । सामान्यतस्तादृशप्रतिबध्य-प्रतिबन्धकभावकल्पनेऽनुमितिकारणतावच्छेदलाघवादिरूपबहुविधलाघवान्त(त्त)स्यापि[4] सम्भवात् । यद्वा सर्वत्र समूहालम्बनस्थल एकस्मिन्नेव क्षणे ज्ञानद्वयमुत्पद्यते, बाधका-भावात् ।

ज्ञानयौगपद्यानभ्युपगमप्रवादस्तु प्रत्यक्षानुमित्यादिविरुद्धजातीयज्ञानद्वयस्य युग-पदनुत्पत्तिपरः । न च व्यक्तिद्वयकल्पने गौरवं तथा सत्युपदर्शितरीत्या बहुतरस्थले लाघवसम्भवात् ।

वस्तुतस्तु परामर्शत्वस्याव्याप्यवृत्तित्वोपगमादव्याप्यवृत्तिपरामर्शत्वविशिष्ट-निरूपितत्वस्य वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायां निवेशाद्वा (वा ?) नोक्तविकल्पावसर इति ध्येयम् ।

न च तथापि निश्चयत्वस्य जातित्वकल्पने तस्य कारणतावच्छेदकत्वं परामर्शत्वस्य वेत्यत्र विनिगमनाविरह इति वाच्यम्, सामान्यकारणतावच्छेदकतया क्लृप्तस्य परामर्श-त्वस्य विशेषणतावच्छेदकत्वे सम्भवति तं (तद्) विहायोदासीननिश्चयत्वस्य कारण-तावच्छेदकतानौचित्यात् निश्चयत्वस्य [5]व्यापकधर्मतयाऽन्यथासिद्धत्वेन[6] व्याप्यस्य परामर्शत्वस्यैव कारणतावच्छेदकत्वौचित्याच्चेति संक्षेपः ।

वह्निव्याप्यधूमवात्(न्) पर्वत इति परामर्शादिदं ज्ञानं वह्निव्याप्यधूमाभाववति पर्वते वह्निव्याप्यधूमप्रकारकमित्याद्याकारकाप्रामाण्यग्रहसत्त्वेऽनुमित्यनुदयेना[7]प्रामाण्य-ग्रहाभावोऽपि कारणतावच्छेदककोटौ निवेशनीयः । अथाप्रामाण्यज्ञानास्कन्दितपरामर्शेऽनु-

---

१. तद्विषयकसंशयसामग्र्यास्तद्विषयकनिश्चयं प्रति प्रतिबन्धकत्वम् । अन्यथा वह्निमान्न वेति संशयसामग्रीसत्त्वे न कोऽपि निश्चय उत्पद्येतेति विषयविशेषमन्तर्भाव्येत्यस्याशयः ।

२. ले० टि० ( सामान्यतो निश्चयमात्रे )–सर्वमितावच्छेदक–( निश्चयमात्रे ) ।

३. ज्ञानद्वयस्यैकात्मतैव नाम ज्ञानस्य समूहालम्बनत्वम् ।

४. तस्यापि –अन्यांशे संशयात्मकस्यान्यांशे निश्चयात्मकस्य समूहालम्बनज्ञानस्य ।

५. परामर्शापेक्षयेति भावः ।

६. निश्चयत्वस्यान्यथासिद्धत्वे परामर्शत्वव्यापकत्वं हेतुः, अतिप्रसङ्गाद्यनापादके सम्भवति लघौ धर्मे गुरौ प्रतियोगितावच्छेदकत्वस्येव कारणतावच्छेदकत्वस्याप्यनङ्गीकारात् ।

७. अनुमित्यनुदयेन –अप्रामाण्यज्ञानानास्कन्दितस्यैव परामर्शस्यानुमितिहेतुत्वादिति भावः ।

मितिकारणतावच्छेदकपरामर्शत्वानङ्गीकारादेव[1] तस्मादनुमितिवारणसम्भवेऽप्रामाण्यज्ञानाभावस्य कारणतावच्छेदककोटिनिवेशो निरर्थकः। न च वह्निव्याप्यधूमांशेऽप्रामाण्यग्रहकालीनवह्निव्याप्यधूमवान् घटव्याप्यवांश्च पर्वत इति समूहालम्बनपरामर्शे घटानुमित्यनुरोधेन परामर्शत्वस्यावश्यमुपेयतया तस्माद्वह्नयनुमितिवारणायाप्रामाण्यज्ञानाभावस्य कारणतावच्छेदककोटौ निवेश इति वाच्यमुक्तरीत्या तत्र ज्ञानद्वयस्यैवाभ्युपगमेन समूहालम्बनात्मकैकज्ञानानभ्युपगमादिति चेत्, न, यत्र वह्निव्याप्यवान् पर्वत इत्यादिरपेक्षाबुद्ध्यात्मकः परामर्शस्ततोऽनुमितिस्ततस्तत्परामर्शेऽनुमितौ चाप्रामाण्यज्ञानं तत्राप्रामाण्यज्ञानात्पूर्वमनुमित्यनुदयेन तत्परामर्शे परामर्शत्वस्यावश्यमुपेयतया तस्मादप्रामाण्यज्ञानोत्तरमप्यनुमितिवारणाय कारणतावच्छेदककोटावप्रामाण्यज्ञानाभावनिवेशस्य सार्थकत्वात्। एवञ्चात्रावच्छेदकावच्छेदेन हेतुमत्तावगाहिपरामर्शद्वितीयक्षणे प्रथमक्षणोत्पन्नसामानाधिकरण्यमात्रावगाहिबाधवशात् सामानाधिकरण्येन वह्नयनुमितिः परामर्शाप्रामाण्यानुमितिश्च जाता तत्र सामानाधिकरण्येन सिद्धेरवच्छेदकावच्छेदेनानुमितौ प्रतिबन्धकत्वाभावेन पुनरनुमित्यापत्तिवारणायाप्रामाण्यज्ञानाभावस्य कारणतावच्छेदककोटाववश्यं निवेशनीयत्वाच्च।

अत्रेदं विचार्यते—सम्बन्धसामान्यावच्छिन्नप्रतियोगिताकोऽप्रामाण्यग्रहाभावः परामर्शे निवेश्यते, यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताको वा? आद्ये चैत्रस्य परामर्शसत्त्वे मैत्रस्य तत्राप्रामाण्यग्रहसत्त्वे चैत्रस्यानुमित्युदयप्रसङ्गः, मैत्रीयाप्रामाण्यग्रहस्य कालिकादिसम्बन्धेन चैत्रीयपरामर्शे सत्त्वात्। अन्त्येऽप्रामाण्यज्ञानास्कन्दितपरामर्शकालेऽप्यनुमित्यापत्तिः समवायसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य परामर्शे सत्त्वात्। न च सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽप्रामाण्यज्ञानाभावो निवेशनीय इति वाच्यम्, ज्ञानान्तरविशेष्यकाप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यापत्तेः। न च स्वविशेष्यत्व-स्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताकाभावो निवेशनीय इति वाच्यम्, यत्र ज्ञानान्तरविशेष्यकाप्रामाण्यग्रह एव प्रमेयत्वादिना परामर्शभानं तत्र-( त ? )त्यपरामर्शादनुमित्यनापत्तेः।

अथ स्वीयाप्रामाण्यप्रकारतानिरूपितविशेष्यत्वस्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावो निवेशनीयः। उक्तस्थले प्रमेयत्वप्रकारतानिरूपितविशेष्यत्वस्य परामर्शे सत्त्वेऽप्युक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य तत्र सत्त्वान्नोक्त दोष इति चेत्, न, वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वेन विषयतासम्बन्धस्य वृत्त्यनियामकतया तद्विशेषस्य विशेष्यत्वसम्बन्धस्य

---

१. सामानाधिकरण्यसम्बन्धेनानुमितिकारणतावच्छेदकविशिष्टपरामर्शत्वानङ्गीकारादित्यर्थः। अत्र विशेषणाभावप्रयुक्तो विशिष्टाभावः। अन्यथाऽनुमितिकारणतावच्छेदकपरामर्शत्वजातेरप्रामाण्यज्ञानास्कन्दितज्ञानसाधारणतयोक्तग्रन्थासङ्गतिः स्यात्।

प्रतियोगितावच्छेदकत्वासम्भवात् । सामानाधिकरण्यस्यापि परम्परासम्बन्धात्मकस्य सम्बन्धत्व एव मानाभावेन[1] सम्बन्धत्वे वा वृत्त्यनियामकतया प्रतियोगितावच्छेदकसम्बन्धत्वासम्भवात् ।

अत्रोच्यते—शास्त्रे ज्ञानमित्यादिप्रतीतिव्यवहाराभ्यां विषयतासम्बन्धस्य वृत्तिनियामकत्वेन तद्विशेषणविशेष्यत्वसम्बन्धस्यापि वृत्तिनियामकत्वसिद्धिः । सामानाधिकरण्यस्यापि गच्छद्गजारूढे राजादौ राजाऽयं गच्छतीति विशिष्टप्रतीतिव्यवहाराभ्यां रूप एकत्वमित्यादिप्रतीतिव्यवहाराभ्याञ्च वृत्तिनियामकसम्बन्धत्वसिद्धिः ।

वस्तुतस्तु वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वे बाधकाभावः । तथा चोक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य विशेषणताविशेषसम्बन्धेन वैशिष्ट्यस्य परामर्शे निवेशनीयतया न कोऽपि दोष इति ।

केचित्तूक्तोभयसम्बन्धेनाप्रामाण्यज्ञानवद्भेद एव परामर्शे निवेशनीयः । न चोत्तरभाव्यप्रामाण्यज्ञानकपरामर्शादनुमित्यनुदयापत्तिस्तस्योभयसम्बन्धेनाप्रामाण्यज्ञानवत्त्वादिति वाच्यम्, पाकरक्ते घटादौ न श्याम इत्यादिप्रतीत्या भेदस्य कालिकाव्याप्यवृति-(त्ति) त्वेनादोषादित्याहुः[2] ।

[3]अन्ये त्वप्रामाण्यज्ञानविशेष्यत्व-[4]सामानाधिकरण्योभयाभाववत्परामर्शत्वेन हेतुतेत्याहुः ।

तदुभयमप्यसदुक्तरीत्यैवोपपत्तावेतादृशगुरुतररीतेरसामञ्जस्यात् । ननु तथापि प्रमेयमप्रमेत्याद्याकारकप्रमेयत्वाद्यवच्छिन्नपरामर्शविशेष्यताकाप्रामाण्यग्रहदशायामनुमित्यनुपपत्तिस्तदानीमुक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य परामर्शेऽभावादिति चेत्, न, स्वीयाप्रामाण्यप्रकारतानिरूपितपरामर्शत्वावच्छिन्नविशेष्यत्वस्यैवोक्तोभयसम्बन्धघटकतयाऽदोषात् । उपदर्शितस्थले प्रमेयत्वावच्छिन्नविशेष्यत्वस्य परामर्शे सत्त्वेऽपि परामर्शत्वावच्छिन्नविशेष्यत्वस्य तत्राभावेन तद्घटितोक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य तत्र सत्त्वात् । न चैवं तज्ज्ञानमप्रमेत्याकारकतत्तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यापति(त्ति)रिति वाच्यम्, तत(त्त)द्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाभावस्यापि पृथक् कारणतावच्छेदककोटौ निवेशात् । न चैवमननुगम उभयावृत्तिधर्मत्वेन तत्तद्व्यक्तित्वान्यनुगमय्य

---

१. मानाभावेन प्रतियोगितावच्छेदकत्वासम्भव इत्यनेनान्वयः ।

२ भेदस्य व्याप्यवृत्तिताया बहुवादिसम्मततयोक्तापत्तिस्तदवस्थैवेत्यस्वरसोऽत्रास्तीति आहुरित्यनेन सूच्यते ।

३. स्वविशेष्यत्वादेः सम्बन्धत्वेऽव्याप्यवृत्तित्वशङ्कोदयः । तयोः प्रकारमुद्रया निवेशे नोक्तशङ्कावसर इत्याशयेनाह—अन्ये त्विति ।

४. अप्रामाण्यज्ञानसामानाधिकरण्येत्यर्थः ।

स्वीयाप्रामाण्यप्रकारतानिरूपितोभयावृत्तिधर्मावच्छिन्नविशेष्यत्वस्वसामानाधिकरण्योभय सम्बन्धावच्छिन्नप्रतियोगिताकस्यैकविधस्यैवाप्रामाण्यग्रहाभावस्य निवेशनीयतयाऽननुगमविरहात्। न चोभयावृत्तित्वस्यानुगतस्य निर्वक्तुमशक्यतया नोक्तरीतिः सम्भवतीति वाच्यम्, स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसम्बन्धेन भेदवदन्यत्वस्यैवोभयावृत्तित्वरूपत्वात्। तत्तद्व्यक्तित्वस्यैकमात्रवृत्तितया तत्रोक्तोभयसम्बन्धेन भेदाभावात्तद्वदन्यत्वं सुघटम्[1]। प्रमेयत्वज्ञानत्वादिन(दोनां) तूक्तोभयसम्बन्धेन घटघटज्ञानादिभेदवत्तया न भेदवदन्यत्वमिति तदवच्छिन्नविशेष्यताकाप्रामाण्यज्ञानकालेऽनुमितिप्रसङ्गः[2]।

न च तथापि प्रमेयमप्रमेत्याकारकप्रमेयत्वाद्यवच्छिन्नपरामर्शत्व(त्वे) तत्तद्व्यक्तित्वनिष्ठविशेष्यतावच्छेदकताकाप्रामाण्यज्ञानदशायामनुमित्यनुपपत्तिरिति वाच्यम्, निरवच्छिन्नावच्छेदकत्वस्यैव सम्बन्धघटकतयोक्तजातीयपरामर्शत्वादिनिष्ठविशेष्यतावच्छेदकतायाश्च प्रमेयत्वाद्यवच्छिन्नतयाऽनुपपत्त्यभावात्। न चैवं[3] धूमविशेष्यकपरामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानदशायामप्यनुमित्यापत्तिस्तज्ज्ञानीयपरामर्शत्वनिष्ठ-विशेष्यतावच्छेदकतायाः सामानाधिकरण्यसम्बन्धेन धूमविशेष्यकत्वावच्छिन्नत्वावच्छिन्नत्वादिति वाच्यम्, धूमविषयकपरामर्शत्वावच्छिन्नविशेष्यताघटितोक्तोभयसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्यापि पृथक् कारणतावच्छेदकत्वात्। एवं यादृशायादृशधर्मावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानदशायामनुमित्यनुदयोऽनुभवसिद्धस्तादृशधर्मावच्छिन्नविशेष्यताघटितोभयसम्बन्धावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानाभावाः कारणतावच्छेदककोटौ निवेशनीयाः। नातस्तादृशधर्मावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानदशायामनुमित्यापत्तिः। अत्राप्रामाण्यप्रकारतायाः सम्बन्धघटकताऽप्रामाण्यत्वनिष्ठनिरवच्छिन्नावच्छेदकताकप्रकार[ता]त्वेन बोध्या। तेन प्रमेयत्वादिनाऽप्रामाण्यप्रकार[क]स्याप्रामाण्यत्वनिष्ठप्रकारतावच्छेदकताकस्य च ज्ञानस्य सत्त्वदशायां नानुमित्यनुपपत्तिर्न वाऽ[4]प्रामाण्यत्वेन घटाद्यवगाहिज्ञानदशायामनुमित्यापत्तिः। एवञ्च स्वीयाप्रामाण्यत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्रकारतानिरूपितपरामर्शत्वादिनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकविशेष्यत्वस्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताको ज्ञानत्वावच्छिन्न(प्रतियोगिताक)ाभावः परामर्शनिष्ठानुमितिकारणतावच्छेदकमि(इ)ति फलितम्।

---

१. ले० टि० तत्तद्व्यक्तित्वावच्छिन्नेत्यस्य फलमाह।

२. अत्र 'प्रसङ्गः' इत्यस्य स्थाने 'सम्भवः' इति, 'प्रसङ्गसम्भवः' इति वा पाठो लेखकाभिमत इव प्रतीयते।

३. ले० टि० विशेष्यतावच्छेदकतायां निरवच्छिन्नत्वनिवेशे।

४. ले० टि० अप्रामाण्यप्रकारताया अप्रामाण्यनिष्ठप्रकारतात्वेन सम्बन्धघटकत्वेन निषेधति।

ननु परामर्शत्वादिना घटादावप्रामाण्यज्ञानदशायामप्यनुमित्यनुदयोऽनुभवसिद्धः। स चानुपपन्नस्तज्ज्ञानीयपरामर्शत्वाद्यवच्छिन्नविशेष्यताया घटादावेव सत्त्वेन परामर्शेऽभावादिति चेदत्र केचित्—केवलसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकानां परामर्शत्वाद्यवच्छिन्नविशेष्यताकाप्रामाण्यत्वाद्यवच्छिन्नप्रकारताशालिग्रहत्वावच्छिन्न-(प्रतियोगिताक)ाभावानामेव कारणतावच्छेदकत्व उपदर्शितस्थले च परामर्शे केवलसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकस्य परामर्शत्वाद्यवच्छिन्नविशेष्यताकाप्रामाण्यग्रहत्वावच्छिन्न(प्रतियोगिताक)ाभावस्य सत्त्वेनानुपपत्त्यभावात्।

अथैवमेकपरामर्शव्यक्ति[1]निष्ठतद्व्यक्तित्वाद्यवच्छिन्नविशेष्यताकाप्रामाण्यज्ञान-दशायां[2] व्यक्त्यन्तरादप्यनुमितिर्न स्याद् व्यक्त्यन्तरे केवलसामानाधिकरण्य-सम्बन्धावच्छिन्नप्रतियोगिताकस्य तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहत्वा-वच्छिन्न(प्रतियोगिताक)ाभावस्यासत्त्वादिति चेत्, न, केवलसामानाधिकरण्यसम्बन्धा-वच्छिन्नप्रतियोगिताकस्य तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहाणामभावस्य तत्तद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहत्वावच्छिन्न(प्रतियोगिताक)ाभावत्वेन न निवेशोऽपि तु तत्तद्व्यक्तित्वावच्छिन्न(प्रतियोगिताक)ाभात्वेनैव। एवञ्चान्यपरामर्श-कालीनपरामर्शत्वेन तद्व्यक्तिनिष्ठतद्व्यक्तित्वावच्छिन्नविशेष्यताकाप्रामाण्यग्रहव्यक्त्य-भावस्य कारणतावच्छेदके निवेशान्नान्यपरामर्शादनुमित्यनुपपत्तिः।

अथ प्रथमपरामर्शे[3] तद्व्यक्तित्वेनाप्रामाण्यज्ञाने तदुत्तरोत्पन्न[4]-द्वितीयपरामर्शा-दनुमितिर्न स्यात्, तत्र केवलसामानाधिकरण्यसम्बन्धेन तदप्रामाण्यग्रहव्यक्तिसत्त्वात्। प्रथमपरामर्शादनुमित्यनुदयानुरोधेन तदप्रामाण्यग्रहव्यक्तित्वावच्छिन्न[प्रतियोगिताक]ा-भावस्यावश्यं कारणतावच्छेदककोटौ निवेशादिति चेत्, न, द्वितीयपरामर्शस्य तदप्रामाण्य-ग्रहव्यक्तावुत्तेजकत्वेन केवलसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकस्य द्वितीय-परामर्शाभावविशिष्टतदप्रामाण्यग्रहव्यक्तित्वावच्छिन्न[प्रतियोगिताक]ाभावस्य द्वितीय-परामर्शे सत्त्वात्। न च तत्तद्व्यक्तित्वावच्छिन्नाभावकूटस्य कारणतावच्छेदकत्वे तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकस्तदप्रामाण्यग्रहव्यक्त्यभावः (वा ?) तद्व्यक्तिसमान-कालीनवायुसंयोगादिव्यक्त्यभावो वा निवेश्यत इति विनिगमनाविरह इति वाच्यमनन्य-गत्या तादृशविनिगमनाविरहस्याकिञ्चित्करत्वादित्याहुः[5]।

---

१. ले० टि० (एकपरामर्शव्यक्ति)–धूमलिङ्गक–(परामर्शव्यक्ति)।
२. ले० टि० (व्यक्त्यन्तरात्)–आलोकलिङ्गक–(परामर्शात्)।
३. ले० टि० धूमपरामर्शे।
४. ले० टि० धूमपरामर्शात्।
५. केचिदिति शेषः।

वस्तुतस्तु स्वीयाप्रामाण्यत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्रकारता-निरूपितविशेष्यतानिरूपितनिरवच्छिन्नावच्छेदकताश्रयीभूतपरामर्शत्वाद्यधिकरणत्वसमानाधिकरणत्व-स्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नप्रतियोगिताको ज्ञानत्वावच्छिन्न-(प्रतियोगिताक)भाव एव कारणतावच्छेदकः। परामर्शत्वाद्यवच्छिन्नघटादिविशेष्यताकाप्रामाण्यज्ञानदशायाञ्च परामर्शे तज्ज्ञानीयपरामर्शत्वाद्यवच्छिन्नविशेष्यताया अभावेऽपि तज्ज्ञानीयविशेष्यतावच्छेदकीभूतपरामर्शत्वाद्यधिकरणत्वस्यैव सत्त्वेनानुमित्यनुदयोपपत्तिः। पूर्वोक्तमतन्तु न समीचीनं तथा सति परामर्शत्वा(वच्छिन्न)-विशेष्यत्वा(त्व)कत्वाप्रामाण्यत्वावच्छिन्नप्रकारताशालित्वज्ञानत्वानां मिथो विशेष्य-विशेषणभावे विनिगमनाविरहेणानन्ततत्तद्व्यक्तित्वावच्छिन्न[प्रतियोगिताक]भावानां (च ?) मिथो विशेषणविशेष्यभावे विनिगमनाविरहेणोत्तेजकीभूतद्वितीयपरामर्शाभावानन्ततत्तदप्रामाण्यज्ञानव्यक्तीनाञ्च परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेणानन्तकार्यकारणभावापत्तेरवच्छेदकगौरवापत्तेश्च।

किञ्च, यत्र प्रथममेकपरामर्शस्ततो भाविपरामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्यज्ञानम्, ततः परामर्शान्तरं तत्र द्वितीयपरामर्शादनुमितेरभावेन तादृशाप्रामाण्यज्ञानत्वावच्छिन्ना[न्नप्रतियोगिताका]भावस्य प्रथमपरामर्शेऽभावात्। न च भाविपरामर्शनिष्ठसामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकस्यैव तादृशाप्रामाण्यज्ञानत्वावच्छिन्ना(न्नप्रतियोगिताका)भावस्य कारणतावच्छेदकतया तस्य च प्रथमपरामर्शे सत्त्वान्नोक्तदोष इति वाच्यम्, सामानाधिकरण्यस्ये(स्यै)क(कं)रूपमित्यादिप्रतीतिव्यवहाराभ्यां सामानाधिकरण्यत्वेनैव सम्बन्धतया भाविपरामर्शनिष्ठसामानाधिकरण्यत्वेन सम्बन्धत्वे मानाभावात्।

केचित्तु समवायसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावः सामानाधिकरण्यसम्बन्धेन परामर्शनिष्ठकारणतावच्छेदकः। अथैवमप्रामाण्यज्ञानकालेऽप्यनुमित्यापत्तिस्तदानीमात्मनिष्ठघटाद्यवच्छिन्नायाः समवायसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावाधिकरणतायाः सत्त्वेन परामर्शे सामानाधिकरण्यसम्बन्धेनाप्रामाण्यज्ञानाभावसत्त्वात्। न च ज्ञानवत्यात्मनि घटाद्यवच्छेदेनापि कथं तदभावः प्रतियोग्यभावाधिकरणत्वयोर्विरोधादिति वाच्यम्, आत्मविशेषगुणानां समवायेनाव्याप्यवृत्तित्वात्[१]। प्रतियोग्यभावाधिकरणत्वयोरेकावच्छेदेनैव विरुद्धतया शरीरावच्छिन्नज्ञानाधिकरणत्वघटाद्यवच्छिन्नज्ञानाधिकरणत्वयोरविरोधादिति चेत्, न, प्रकृते निरवच्छिन्नाधिकरणताघटितस्यैव सामानाधिकरण्यस्य कारणतावच्छेदकताघटकसम्बन्धत्वोपगमेनाप्रामाण्यज्ञानकाले तादृशसामानाधिकरण्यसम्बन्धेन परामर्शे समवायसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्यासत्त्वात्। अन्यत्सर्वं पूव(र्व)वदित्याहुः।

---

१. अव्याप्यवृत्तित्वात्—शरीरावच्छेदेन विद्यमानत्वादिति भावः।

९८४८५

तदपि न समीचीनम्, पूर्वोक्तसकलदोषाणां दुर्वारत्वात्। एतन्मते सामानाधिकरण्य-सम्बन्धेनाप्रामाण्यज्ञानाभावविशिष्टपरामर्शस्य परामर्शविशिष्टाप्रामाण्यज्ञानाभावस्य वा हेतुत्वमिति विनिगमनाविरहस्य दुर्वारत्वाच्च।

किञ्चाप्रामाण्यज्ञानशून्य(त्व)कालेऽप्युक्त[1]सामानाधिकरण्यसम्बन्धेनाप्रामाण्य-ज्ञानाभावः परामर्शे न सम्भवत्यात्मनि शरीरे(रावच्छेदेन) नाप्रामाण्यज्ञानमिति प्रतीत्याऽऽत्मनिष्ठाया (अ)प्रामाण्यज्ञानाभावाधिकरणतायाः शरीरावच्छिन्नत्वा-त्प्रतीतिबलादव्याप्यवृत्तेरप्यवच्छेदकाङ्गीकारस्य सकलाभियुक्तसम्भवेनानुमानमात्र-स्यैवोच्छेदप्रसङ्ग इति कृतं परामर्शानुमितिकार्यकारणभावविचारेण।

[2]एतेनाप्रामाण्यज्ञानाभावस्य न परामर्शनिष्ठकारणतावच्छेदकत्वमितरता-वच्छेदकेन समं तस्य विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावबाहुल्या-वच्छेदकगौरवापत्तेः; किन्तु समवायसम्बन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञाना-भावस्य समवायसम्बन्धेनानुमितौ स्वातन्त्र्येण हेतुत्वम्। अत एव '**अथ विशिष्ट-स्मरणेऽतिव्याप्तिः**' इत्यादिग्रन्थेनानुमितिलक्षणस्य स्मरणेऽतिव्याप्त्याशङ्काऽपि दीधिति-कृतः सङ्गच्छते, अप्रामाण्यज्ञानाभावस्यानुमितिकारणतावच्छेदकेऽनिवेशेनानुमिति-स्मरणयोः कारणतावच्छेदकधर्मस्यैकत्वात्। अन्यथा गृहीताप्रामाण्यकज्ञानादपि स्मरणोदयेनाप्रामाण्यज्ञानाभावस्य स्मरणकारणतावच्छेदककोटावनिवेशेनानुमिति-कारणतावच्छेदककोटौ निवेशेन च तदसङ्गतिरेव स्यात्। अत्राप्यन्यत्सर्वं पूर्वोक्तरीत्या बोध्यमित्यपि केषाञ्चिन्मतमपास्तम्, अत्रापि पूर्वोक्तरीत्या सकलदोषाणां दुर्वारत्वेना-प्रामाण्यज्ञानाभावस्येतरकारणतावच्छेदकेन समं विशेष्यविशेषणभावविनिगमनाविरह-प्रयुक्तकतिपयकार्यकारणभावबाहुल्यावच्छेदकगौरवमङ्गीकृत्य परामर्श[त्व]निष्ठ[स्या]नु-मितिकारणतावच्छेदकत्वस्यैव समुचितत्वात्। न चैवं दीधितिकारस्य स्मरणेऽतिव्याप्ति-शङ्का कथं सङ्गमनीयेति वाच्यम्, संशयादिव गृहीताप्रामाण्यकज्ञानात् [अपि] स्मरणा-नुदयेनाप्रामाण्यज्ञानाभावस्य स्मरणकारणतावच्छेदककोटावपि निवेश इत्याशयेन दीधितिकारस्य स्मरणेऽतिव्याप्तिशङ्कायाः सङ्गमयितुं शक्यत्वादिति दिक्।

ननु भवन्मते विनिगमनाविरहप्रयुक्तानन्तकार्यकारणभावावच्छेदकगौरवरूपोक्त-दोषाभावेऽपि यत्र प्रथमं परामर्शस्ततो भाविपरामर्शत्वावच्छिन्नविशेष्यताकाप्रामाण्य-ज्ञानम्, ततः परामर्शान्तरं तत्र प्रथमपरामर्शादनुमित्यनुदयरूपोक्तदोषो भवन्मतेऽपि दुर्वारस्तज्ज्ञानीयविशेष्यताश्रयीभूतपरामर्शत्वाधिकरणत्वस्य प्रथमपरामर्शे सत्त्वादिति चेत्, न, सम्बध(न्ध)घटकतावच्छेदकतायां निरवच्छिन्नत्वस्य निवेशितत्वेन परामर्शत्व-

---

१. ले० टि० निरवच्छिन्नाधिकरणताघटितसामानाधिकरण्यसम्बन्धेन।

२. अपास्तमित्यनेनान्वयः।

निष्ठतज्ज्ञानीयविशेष्यतावच्छेदकतायाश्च सामानाधिकरण्यसम्बन्धेन भावित्वावच्छिन्न-तया निरवच्छिन्नत्वाभावेन प्रथमपरामर्शादनुमित्युदयोपपत्तेः। न चैवं द्वितीयपरामर्शा-दप्यनुमित्युदयापत्तिरिति वाच्यम्, सामानाधिकरण्येन भावित्वविशिष्टपरामर्शत्वाधिक-रणताघटितोक्तोभयसम्बन्धेनावच्छिन्न-ज्ञानत्वावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावा-न्तरस्यापि कारणतावच्छेदककोटौ निवेशेन तस्य [च] द्वितीयपरामर्शेऽभावेन तस्मा-दनुमित्यापत्त्यसम्भवात्।

अथ तथाप्येकत्र द्वयमिति न्यायेन भावित्वपरामर्शत्वोभयावच्छिन्नविशेष्यता-वच्छेदकताकाप्रामाण्यदशायां प्रथमपरामर्शादनुमित्यनुदयापत्तिर्दुर्वारा, तज्ज्ञानीय-परामर्शत्वनिष्ठविशेष्यतावच्छेदकताया निरवच्छिन्नत्वादिति चेत्, न, अवच्छेदकताया व्यासज्यवृत्तित्वानङ्गीकारेण तादृशज्ञानस्यैवाभावात्। अवच्छेदकताया व्यासज्यवृत्तित्वा-ङ्गीकारे तु सम्बन्धघटकावच्छेदकतायां निरवच्छिन्नत्वस्यैव[1] स्वनिरूपकविशेष्यता-निरूपितत्वसम्बन्धेन किञ्चिन्निष्ठावच्छेदकताविशिष्टान्यत्वस्यापि निवेशेनानुपपत्तिः, परामर्शत्वनिष्ठतज्ज्ञानीयविशेष्यतावच्छेदकताया निरुक्तसम्बन्धेन भावित्वनिष्ठा-वच्छेदकविशिष्टत्वेन तदन्यावच्छेदकताघटितोक्तोभयसम्बन्धावच्छिन्न-ज्ञानत्वावच्छिन्न-प्रतियोगिताकाप्रामाण्यज्ञानाभावस्य प्रथमपरामर्शे सत्त्वात्। न च द्वितीयपरामर्शाद-प्यनुमित्यापत्तिरिति वाच्यम्, भावित्वपरामर्शत्वोभयाधिकरणत्वघटितोक्तोभयसम्बन्धा-वच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानान्तराभावस्यापि कारणतावच्छेदकतया तस्य द्वितीयपरामर्शे सत्त्वेन तस्मादनुमित्यापत्तेरसम्भवादिति। एवञ्च स्वीयाप्रामाण्यत्व-निष्ठनिरवच्छिन्नावच्छेदकतानिरूपकप्रकारतानिरूपितविशेष्यतानिरूपितस्वनिरूपक-विशेष्यतानिरूपितत्वसम्बन्धेनावच्छेदकताविशिष्टान्यनिरवच्छिन्नावच्छेदकताश्रयीभूत-परामर्शत्वाद्यधिकरणत्व-स्वसामानाधिकरण्योभयसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नप्रति-योगिताकाप्रामाण्यज्ञानाभावो विशेषणताविशेषेण परामर्शनिष्ठानुमितिकारणता-वच्छेदक इति फलितम्।

अत्र वदन्ति–उक्तरीत्याऽप्रामाण्यज्ञानाभावस्य कारणतावच्छेदकत्वापेक्षयाऽ-प्रामाण्यत्वस्थाने प्रामाण्यत्वं निवेश्योक्तोभयसम्बन्धेन निश्चयत्वरूपेण प्रामाण्यनिश्च-यस्य कारणतावच्छेदकत्वमेव लाघवात्समुचितम्[2], तावताप्यप्रामाण्यज्ञानास्कन्दित-परामर्शादनुमितिवारणसम्भवात्। न च प्रामाण्यग्रहेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यनुदयेन भवता प्रामाण्यग्रहेऽपि प्रामाण्यग्रहो निवेशनीयः। तत्रापि प्रामाण्यग्रह इत्यनवस्था-पत्तिरिति वाच्यम्, तवाप्यप्रामाण्यग्रहेऽप्रामाण्यग्रहसत्त्वेऽनुमित्यनुदये(त्युदये)ना-

---

१. (स्वं) भावित्वनिष्ठावच्छेदकता।

२. अप्रामाण्यज्ञानानास्कन्दितपरामर्शापेक्षया प्रमात्मकपरामर्शस्यानुमितिकारणतास्वीकारे लाघवमित्याशयः।

प्रामाण्यग्रहेऽप्यप्रामाण्यग्रहस्योत्तेजकत्वम् । तत्राप्यप्रामाण्यग्रहस्येत्येवमनवस्थाया दुर्वारत्वात् । यदि चाप्रामाण्यग्रहेऽप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यनङ्गीकारेणाप्रामाण्यज्ञाने न प्रामाण्यज्ञानस्योत्तेजकतेति नानवस्थेत्युच्यते, तदा ममापि प्रामाण्यग्रहेऽप्रामाण्यग्रहस्त(स)त्वेऽनुमित्यङ्गीकारेण प्रामाण्यग्रहे न प्रामाण्यज्ञानस्योत्तेजकतेति नानवस्थेति तुल्यम् ।

अथ संशयात्मकप्रामाण्यग्रहेऽनुमित्यनुदयेन प्रामाण्यनिश्चयनिवेशनम(मु)पेक्ष्य संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभावनिवेश एवोचितः इति चेत्, न, अप्रामाण्यज्ञानेऽप्रामाण्यसंशयेऽनुमित्यनुदयेन त्वयाऽप्रामाण्यज्ञानेऽप्रामाण्यनिश्चयस्योत्तेजकत्वं वाच्यम्, मया तु प्रामाण्यनिश्चयेऽप्रामाण्यसंशयेऽनुमितिवारणाय प्रामाण्यनिश्चये संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाव एव निवेश्यत इति लाघवात् (वम्)[1]। यदि चोक्तरीत्याऽप्रामाण्यज्ञाने नाप्रामाण्यज्ञानस्योत्तेजकत्वमिति, नोक्तलाघवं सम्भवतीत्युच्यते, तदापि न क्षतिः, अप्रामाण्यस्यात्यन्ता[भावा]न्योन्याभावघटितभ्रमत्वरूपतया प्रमात्वा[त्यन्ता]भाव–प्रमाभेदरूपतया च चातुर्विध्येन तादृशतादृशाप्रामाण्यग्रहकालेऽनुमित्यनुदयेन तावदप्रामाण्यज्ञानाभावनिवेशापेक्षया प्रामाण्यनिश्चयनिवेशे लाघवात् । न च प्रामाण्यस्यात्यन्ता[भावा]न्योन्याभावघटितभ्रमत्वाभावरूपतया तद्वति तत्प्रकारकत्वादिरूपतया च कीदृशप्रामाण्यनिश्चयो निवेश्यत इत्यत्र विनिगमनाविरह इति वाच्यम्, तद्वति तत्प्रकारकत्वरूपप्रामाण्यनिश्चयनिवेशे लाघवस्यैव विनिगमकत्वात् ।

[2] किञ्चाप्रामाण्यज्ञानसत्त्व इवाप्रामाण्यव्याप्यवत्ताज्ञानाप्रामाण्यावच्छेदकधर्मदर्शनसत्त्वेऽप्यनुमित्यनुदयस्यानुभवसिद्धतया तावदभावनिवेशापेक्षया लाघवात् प्रामाण्यनिश्चय[निवेश] एव सम्यक् ।

अपि चाप्रामाण्यज्ञानाभावनिवेशे वह्निव्याप्यधूमवान् पर्वत इति ज्ञानमप्रमेति प्रत्यक्षशाब्दबोधादौ पर्वतो वह्निमानित्याद्यनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवम्[3] । प्रामाण्यनिश्चयनिवेशे तादृशानुमितिसामग्रीकाले प्रामाण्यनिश्चयस्या-

---

१. ले० टि० एकत्राभावनिवेशाभावप्रयुक्तलाघवात् (वम्) ।

२. तद्वत्ताबुद्धिं प्रति—(१) तदभाववत्ताबुद्धेः, (२) तदभावव्याप्यवत्ताबुद्धेः, (३) अवच्छेदकधर्मदर्शनविधया च प्रतिबन्धकत्वमानुभविकम् । यथा—ह्रदो वह्निमानिति बुद्धिं प्रति क्रमशो वह्न्यभाववान् ह्रदः, वह्न्यभावव्याप्यवान् ह्रदः, वह्न्यभाववज्जलवद्वृत्तिजलवान् ह्रद इति बुद्धीनां प्रतिबन्धकत्वं तत्र तत्र हेत्वाभासग्रन्थेषु चर्चितम् ।

३. प्रत्यक्षसामग्र्या अनुमितिसामग्र्यपेक्षया बलीयस्त्वेन प्रत्यक्षादिकं प्रत्यनुमितिसामग्र्याः प्रतिबन्धकत्वकल्पनावसर एव नास्तीत्यत्र विचारणीयम् ।

प्रत्यक्षादावनुमितिसामग्र्या अप्रतिबन्धकत्वे सिद्ध एव गत्यन्तरविरहेण प्रतिबन्धकत्वकल्पनापेक्षा । तत्र च गौरवमित्याशयो मूलकृतः स्यात् ।

वश्यकत्वेन तस्य बाधमुद्रया[1] क्लृप्तप्रतिबन्धकत्वेनैवोपपत्तेस्तादृशानुमितिसामग्र्या अतिरिक्तप्रतिबन्धकत्वाकल्पनाल्लाघवम्।

एतेन प्रामाण्यनिश्चयनिवेशेऽत्यन्ता[भावा]न्योन्याभावघटितभ्रमत्वकोटिक-प्रामाण्याभावप्रमाभेदकोटिकचतुर्विधसंशयभेदघटितनिश्चयत्वनिवेशे गौरवमिति तद(दु)-पेक्ष्य संशयनिश्चयसाधारणोक्तचतुर्विधाप्रामाण्यज्ञानाभावनिवेश एव समीचीन इति परास्तम्, प्रामाण्यनिश्चयनिवेश उपदर्शितानन्तप्रतिबन्धकत्वाकल्पने[न] बहुतरलाघव-सत्वात्। न चैवं यत्राप्रामाण्यज्ञानाभावविशिष्टः परामर्शो न तु प्रामाण्यग्रहविशिष्ट-स्तत्रानुमित्यनुदयापत्तिरिति वाच्यम्, इष्टापत्तेः,[2] तत्र प्रामाण्यग्रहविशिष्टपरामर्शं कल्पयित्वाऽनुमित्यभ्युपगमात्। उक्तलाघवेन क्षणविलम्बादिकल्पनाया अदोषत्वात्। अत एव प्रवृति(त्ति)प्रति कृतिसाध्यतानिश्चयो हेतुरिति सिद्धान्तः सङ्गच्छते। अन्यथा तत्रापि कृत्यसाध्यताज्ञानकाले प्रवृत्तिवारणाय कृत्यसाध्यताज्ञानाभाव एव हेतुः स्यादिति, रीतेस्तुल्यत्वात्।

अथोक्तसिद्धान्तसङ्गमनं प्रकारान्तरेणैव(णापि) सम्भवति। तथा हि पाकः कृतिसाध्यत्वाभाववान् स्यादित्यापत्ति प्रत्यापाद्यव्यतिरेकनिर्णयमुद्रया कृतिसाध्यः पाक इति निर्णयः कृतिसाध्यत्वाभाववान् पाक इति निर्णयश्च हेतुः[3]। तत्र परस्परजन्यापत्तौ व्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वसम्बन्धेन कृतिसाध्यतानिश्चय-वैशिष्ट्यमवश्यं निवेशनीयमित्यापति(त्ति)त्वनिवेशे प्रयोजनविरहः। तथा च प्रकृतेऽपि कृतिसाध्यतादिनिश्चयविशिष्टत्वरूपं कृतिसाध्यतादिनिश्चयकार्यतावच्छेदकाक्रान्तत्व-मिति क्लृप्तहेतुतयैवोपपत्तौ नातिरिक्तं कृतिसाध्यतानिश्चयहेतुत्वं कल्पनीयमित्याशये-

१. तदभाववत्तामुद्रया।

२. प्रामाण्यग्रहमन्तराप्यप्रामाण्यग्रहाभावविशिष्टात्परामर्शादनुमित्युदयस्यानुभविकत्वादाह — तत्रेति। परामर्शे प्रामाण्यनिश्चयः कल्पयितुमुचितो न तु प्रामाण्यनिश्चय-विशिष्टपरामर्शान्तरं गौरवात्। तथा ह्यप्रामाण्यज्ञानाभावविशिष्टः परामर्शः प्रथमक्षणे, ततः परामर्शान्तरम्, ततः प्रामाण्यग्रहः। न पुनः परामर्शप्रामाण्यग्रहयोर्युगपदुत्पत्ति-र्ज्ञानयौगपद्यनिषेधात्। प्रत्यक्षानुमित्यादिविरुद्धजातीयज्ञानयोरेव युगपदनुत्पत्तिरिति मतन्तु न सर्वसम्मतम्। प्रथमपरामर्शं एव प्रामाण्यग्रहकल्पन एकक्षणलाघवमिति भावः।

३. कृतिजन्यः पाक इति निर्णयजन्यापत्तिजनकत्वं न कृतिसाध्यत्वाभाववान् पाक इति निर्णये इति व्यभिचारः। अतः कृतिजन्यः पाक इति निर्णयाव्यवहितोत्तरजायमानापत्ति प्रति कृतिसाध्यः पाक इति निर्णयो हेतुः। एवं कृतिसाध्यत्वाभाववान् पाक इति निर्णयाव्यवहितोत्तरजायमानापत्ति प्रति कृतिसाध्यत्वाभाववान् पाक इति निर्णयो हेतु-रिति ध्येयम्।

नोक्तसिद्धान्त इति चेद् (अयं) भवतैव दर्शितः पन्थाः। एकेनैव पथाऽऽवाभ्यां गन्तव्यम्। त्वयाऽप्रामाण्यज्ञानाभावो मया च प्रामाण्यनिश्चयो नैव हेतुतावच्छेदककोटौ निवेशनीयः। त्वदुक्तरीत्याऽऽपति(त्ति) [1]स्थलीयानुमितिसाधारणक्लृप्तप्रामाण्यनिश्चयहेतुतयैवाप्रामाण्यज्ञानास्कन्दितपरामर्शकालेऽनुमितिवारणसम्भवात्। एवञ्चातोवलाघवमनुमितिकारणतावच्छेदकस्यातिलघुत्वात्। अत एव दीधितिकारस्य **'अथ विशिष्टस्मरणेऽतिव्याप्तिः[2]'** इत्यादिनाऽनुमितिलाघवस्य[3] (लक्षणस्य) स्मृतावतिव्याप्तिशङ्कनं स्वरसत एव सङ्गच्छते। अन्यथाऽनुमितिजनकतावच्छेदककोटावप्रामाण्यज्ञानाभावस्य प्रामाण्यनिश्चयस्य वा निवेशेन स्मृतिजनकतावच्छेदककोटौ तदनिवेशेन तदत्यन्तासङ्गतमेव स्यात्। न च संशयादिव गृहीताप्रामाण्यकज्ञानात् स्मृत्यभावेनाप्रामाण्यज्ञानाभावस्य प्रामाण्यनिश्चयस्य वा स्मृतिजनकतावच्छेदकत्वमित्याशयेन पूर्वं तत्सङ्गमितप्रायमेवेति वाच्यम्, संशयादिव गृहीताप्रामाण्यकज्ञानास्मरणाभावस्योपेक्षान्यत्ववदप्रामाण्यज्ञानाभावप्रामाण्यनिश्चयान्यतरस्यापि संस्कारजनकतावच्छेदकत्वेनैवोपपन्नतयाऽप्रामाण्यज्ञानाभावस्य प्रामाण्यनिश्चयस्य वा स्मृतिजनकतावच्छेदकत्वमुपेत्यैतत्सङ्गमनस्यासम्भवादिति कृतं विस्तरेण।

[4]आहार्यपरामर्शादनुमित्यनुदयादनाहार्यत्वमपि कारणतावच्छेदककोटौ निवेशनीयम्। तच्च वस्तुगत्या य आहार्यपरामर्शस्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वम्, अनुगताहार्यत्वस्य निर्वक्तुमशक्यतयाऽऽहार्यत्वावच्छिन्नभिन्नत्वरूपस्य तस्य वक्तुमशक्यत्वात्।

अथाहार्यत्वं चाक्षुषादिव्याप्यविरुद्धनानाजातिर्विषयताविशेषो वा, तदवच्छिन्नभिन्नत्वमेवानाहार्यत्वे(त्वं), भेदकूटस्य कारणतावच्छेदकत्वे गौरवादिति चेत्, न, तथा सति वह्निव्याप्यधूमवान् पर्वतो घटवानित्यादिघटाद्यंश आहार्यपरामर्शव्यक्तिभेदानिवेशेन तस्मादनुमितिसम्भवात्।

अत्र केचित्—आहार्यपरामर्शादनुमितिवारणायाहार्यपरामर्शानां तत्तद्व्यक्तित्वेन पृथक् प्रतिबन्धकत्वमेव कल्प्यते। भेदकूटस्य कारणतावच्छेदकत्वे भेदानां परस्परं कारणतावच्छेदकघटकेतरपदार्थमादाय च विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकारणतावच्छेदकत्वे गौरवापत्तेः। न चैवमाहार्यपरामर्शोत्तरोत्पन्ना[ना]हार्यपरामर्शादप्यनु[मित्यनु]दयप्रसङ्ग इति वाच्यम्, लाघवेन क्षणविलय(म्ब)कल्पनाया अदोषत्वेन तत्राहार्य-

---

१. लि० टि० आपत्तिश्च परामर्शोऽप्रामाण्यनिश्चयाभाववान् स्यात्।

२. अ० गा०, पृ० ७२।

३. लाघवस्येति पाठो लेखकप्रमादात्।

४. स्वविरोधिधर्मितावच्छेदकत्वप्रकारकं ज्ञानमाहार्यम्।

परामर्शनाशानन्तरमेवानुमित्यभ्युपगमात्, तदाहार्यपरामर्शव्यक्तिप्रतिबन्धकतायां तदुत्तरोत्पन्ना[ना]हार्यपरामर्शव्यक्तेरुत्तेजकत्वकल्पनेन तत्राहार्यपरामर्शसत्त्वेऽप्यनुमितिसम्भवाच्च ।

यत्तु तत्तद्व्यक्तित्वेनाहार्यपरामर्शस्य न प्रतिबन्धकत्वम्; किन्तु तद्भेदस्य कारणतावच्छेदकत्वमेव, बाधकाभावात् । न च विनिगमनाविरहप्रयुक्तगौरवं बाधकमित्युक्तमेवेति वाच्यम्, तत्तद्व्यक्तित्वेनाहार्यपरामर्शानामेकैकभेदं पृथक् पृथक् निवेश्यैकैककारणताभ्युपगमेन भेदकूटस्यैव कारणतानवच्छेदकत्वात् । परस्परसहकारेण फलजनकत्वाभ्युपगमेनैकाहार्यपरामर्शव्यक्तिदशायामन्याहार्यपरामर्शव्यक्तिभिन्नपरामर्शसत्त्वेऽपि तदाहार्यपरामर्शव्यक्तिभिन्नपरामर्शरूपकारणान्तरविरहेणानुमित्यनुदयसम्भवात् । न चाहार्यपरामर्शद्वयसत्त्वेऽनुमित्यापत्तिस्तदानीं सकलकारणसत्त्वादिति वाच्यम्, कतिपयतादृशव्यक्तिभेदद्वयस्याप्येकत्र निवेशाङ्गीकारात् । न चेदमेव गौरवमिति वाच्यम्, प्रतिबन्धकतामतेऽपि क्षणविलम्बादिकल्पनेन तुल्यत्वादिति, तन्न, भेदकूटस्यैककारणतानवच्छेदकत्वेन भेदानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तगौरवाभावेऽपि तत्तदाहार्यपरामर्शव्यक्तिभेदस्य कारणतावच्छेदकघटकेतरपदार्थस्य च विशेष्यविशेषणभावे विनिगमनाविरहप्रयुक्तानन्तकारणतानवच्छेदकगौरवस्य दुष्परिहार्यत्वेनाहार्यपरामर्शव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकताकल्पनस्यैव समुचितत्वात् । न चाहार्यपरामर्शव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे तत्कालीनसंयोगादिव्यक्तीनामपि तत्तद्व्यक्तित्वेन प्रतिबन्धकतामादाय विनिगमनाविरह इति वाच्यम्, आहार्यपरामर्शभेदस्य कारणतावच्छेदकत्वेऽपि परामर्शस्यानाहार्यपरामर्शत्वेन कारणता, उत तत्कालीनसंयोगादिव्यक्तेः प्रतिबन्धकत्वं परामर्शस्य च परामर्शत्वेनैव कारणत्वमिति विनिगमनाविरहस्य दुःसमाधेयत्वात् । नन्वेवं निश्चयत्वस्यापि कारणतावच्छेदकत्वं न स्यात्, न स्याच्चाप्रामाण्यज्ञानस्याप्युत्तेजकत्वम्, संशयात्मकादप्रामाण्यज्ञानास्कन्दिताच्च परामर्शादनुमितिवारणायोपदर्शितरीत्या लाघवेन संशयस्याप्रामाण्यज्ञानस्य च प्रतिबन्धकताकल्पनस्यैवोचितत्वादिति चेत्, न, इष्टापत्तेः। एतेन दीधितिकारस्य विशिष्टस्मरणेऽनुमितिलक्षणातिव्याप्त्याशङ्कनमसङ्गतमनाहार्यत्वस्यानुमितिकारणतावच्छेदकत्वात्, स्मृतिकारणतानवच्छेदकत्वाच्चातिव्याप्तेरेवाभावात् । एवं विशिष्टवैशिष्ट्यबोधेऽनुमितिलक्षणातिव्याप्त्याशङ्कनमप्यसङ्गतं विशेषणतावच्छेदकप्रकारकसंशयकाले विशिष्टवैशिष्ट्यबोधापत्तिवारणाय विशेषणतावच्छेदकप्रकारकसंशयप्रतिबन्धकत्वस्यैवान्यत्र व्यवस्थापितत्वेन निश्चयत्वस्य विशिष्टवैशिष्ट्यस्य बोधजनकतानवच्छेदकत्वेनानुमितिजनकतानवच्छेदकत्वेन चातिव्याप्तेरभावादिति केषाञ्चित्प्रलपितमप्यपास्तम्, अनाहार्यत्वादीनामनुमितिकारणतावच्छेदकत्वस्याप्यभावेनोपदर्शितातिव्याप्त्याशङ्कनसङ्गतेरिति वदन्ति ।

वस्तुतस्त्वाहार्यत्वं जातिर्विषयताविषयो वा, तदवच्छिन्नभिन्नत्वमनाहार्यत्वम्। आहार्यत्वस्य जातित्वे साङ्कर्यभिया नानात्वेऽपि मानसत्वव्याप्याहार्यत्वावच्छिन्नभिन्नत्वमेव कारणतावच्छेदकम्। चाक्षुषाद्याहार्यज्ञानेऽनुमितिजनकतावच्छेदकमानसत्वव्याप्यपरामर्शत्वरूपजात्यभावेनैव न तस्मादनुमितिसम्भवात्। न च विषयान्तरांशे आहार्यपरामर्शादनुमित्यनुदयापत्तिरिति वाच्यम्, आहार्यानाहार्यांशिकसमूहालम्बनानभ्युपगमात्। न च तादृशसमूहालम्बनोत्पत्तौ बाधकाभाव इति वाच्यम्, अनाहार्यज्ञानमात्र आहार्यज्ञानसामग्र्याः प्रतिबन्धकत्वाभ्युपगमात्। न चैतादृशातिरिक्तप्रतिबन्धकत्वकल्पने गौरवमिति वाच्यम्, अनुमितिं प्रति परामर्शजनकतावच्छेदककोटौ भिन्नविषयकप्रत्यक्षादिकं प्रत्यनुमितिसामग्रीप्रतिबन्धकतावच्छेदककोटौ च तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकानन्तभेदकूटानिवेशप्रयुक्तबहुतरलाघवसत्त्वेन तादृशप्रतिबन्धकताकल्पने गौरवस्याकिञ्चित्करत्वात्। यद्वाऽव्याप्यवृत्त्याहार्यत्वविशिष्टनिरूपितत्वस्याभावो वह्निव्याप्यत्वावच्छिन्नविषयतायां निवेशनीय इत्युक्त[1]समूहालम्बनाभ्युपगमेऽपि न क्षतिरिति ध्येयम्।

अपरे तु वस्तुगत्या यान्याहार्यज्ञानानि तेषां तत्तद्व्यक्तित्वेनेच्छाजन्यत्वमुपगम्य जन्यतासम्बन्धेनेच्छावत्त्वमनुगतमाहार्यत्वम्, तदवच्छिन्नभिन्नत्वमनाहार्यत्वं कारणतावच्छेदकम्। न चाहार्यज्ञानानां तत्तद्व्यक्तित्वेनेच्छाजन्यत्वाभ्युपगमे गौरवमिति वाच्यम्, विषयभेदेन भिन्नायामनुमितिं प्रति परामर्शादेर्जनकताया भिन्नविषयकप्रत्यक्षादिकं प्रत्यनुमितिसामग्रीप्रतिबन्धकतायाश्चावच्छेदककोटौ भेदकूटनिवेशप्रयुक्तानन्तकार्यकारणभावाद्यभावेन लाघवात्।

यत्त्वत्रेच्छानामिच्छात्वेनोपादानम्, पर्वते वह्निव्याप्यवत्ताज्ञानं जायतामित्याकारकेच्छात्वेन वा? नाद्यः, तथा सति विषयान्तरांशाहार्यपरामर्शानामनुमित्यजनकतापत्तेः। नान्त्यः, पर्वते कस्यचिज्ज्ञानं जायतामितीच्छाधीनाहार्यपरामर्शानामनुमितिजनकतावारणाय तेषां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यानुमितिजनकतावच्छेदककोटौ निवेशापत्त्योक्तलाघवासम्भवादिति, तदसत्, पर्वते कस्यचिज्ञा(ज्ज्ञा)नं जायतामित्याकारकेच्छाधीनाहार्यपरामर्शानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यानुमितिजनकतावच्छेदककोटौ निवेशेऽपि पर्वते वह्निव्याप्यवत्ताज्ञानं जायतामित्याकारकेच्छाधीनानन्ताहार्यपरामर्शानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटानिवेशप्रयुक्तलाघवसत्त्वेनान्तिमकल्पे[2] बाधकाभावात्।

वस्तुतस्त्विच्छानामिच्छात्वेनोपादानेऽपि न दोषः। न चैवं विषयान्तरांशाहार्यपरामर्शस्यानुमित्यजनकतापत्तिरिति वाच्यम्, तत्तद्व्यक्तित्वरूपजन्यतावच्छेदकभिन्ना-

---

१. आहार्यानाहार्यसमूहालम्बनेत्यर्थः।

२. पर्वते वह्निव्याप्यवत्ताज्ञानं जायतामित्याकारकेच्छात्वेनेच्छोपादानकल्पे।

ननुगतजन्यतानामेव सम्बन्धतया विषयान्तरांशाहार्यपरामर्शीयतत्तद्व्यक्तित्वावच्छिन्नजन्यतानां प्रकृतानुमितिजनकतावच्छेदकभेदप्रतियोगितावच्छेदकतावच्छेदकसम्बन्धत्वानभ्युपगमेनेतरतत्तद्व्यक्तित्वावच्छिन्नजन्यतासम्बन्धेनेच्छावदन्यत्वस्य तत्रापि सत्त्वेन तस्यानुमितिजनकतासम्भवादिति प्राहुः ।

अत्रेदमवधेयम्—अनाहार्यत्वं नानुमितिजनकतावच्छेदकम्, आहार्यज्ञानं वा न पृथक् तत्तद्व्यक्तित्वेनानुमितिप्रतिबन्धकम् आहार्यपरामर्शस्य बाधादिकालीनत्वेन तत्रोपस्थितवह्निव्याप्यधूमाभावादेरपि भाने बाधकाभावेन तस्य संशयवारकवह्निव्याप्यधूमाभावाद्यप्रकारकत्वरूपनिश्चयत्वाभावात्तदुत्तरमनुमित्यनापत्तेः ।

वस्तुतस्तु तत्रानुमितिजनकतावच्छेदकपरामर्शत्वरूपजात्यनभ्युपगमेन[1] न तस्मादनुमित्यापत्तिशङ्काऽपि, विशेषकार्यकारणभावस्याप्यनुमितिसामान्यकारणतावच्छेदकपरामर्शत्वजातिमन्तर्भाव्यैवाङ्गीकारात् । न च वह्निव्याप्यवत्तांशे आहार्ये घटव्याप्यवत्तांशेऽनाहार्ये, घटव्याप्यवत्ताद्यंशेऽनाहार्ये समूहालम्बनज्ञाने यदि न परामर्शत्वं तदा घटानुमितिर्न स्यात् । यदि च परामर्शत्वं तदा वह्न्यनुमितिरपि स्यादिति वाच्यम्, उक्तरीत्याऽऽहार्यानाहार्यसमूहालम्बनानभ्युपगमेन वह्निव्याप्यत्वावच्छिन्नविषयतायामेवाव्याप्यवृत्तिपरामर्शत्वविशिष्टनिरूपितत्वनिवेशेन वाऽदोषात् ।

एतेन सर्वत्राहार्यपरामर्शे पूर्वोपस्थितस्यापि वह्निव्याप्यधूमाभावादेर्भानं न सम्भवति । तथा हि–यत्र वह्निव्याप्यधूमाभाववान्पर्वत इति निर्णयेऽप्रामाण्यज्ञानम्, ततो वह्निव्याप्यधूमाभाववान्पर्वत इत्यपेक्षाबु(द्)ध्यात्मको निर्णयस्ततः[2] [3]स्मरणात्मकाहार्यवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिर्णयेष्टसाधनत्वावगाहिवह्निव्याप्यधूमवान्पर्वत इत्यनाहार्यनिर्णयस्ततो वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिर्णयेच्छा, ततो वह्निव्याप्यधूमवान्पर्वत इत्याहार्यनिर्णयः परामर्शात्मकस्तत्राहार्यपरामर्शे वह्निव्याप्यधूमाभावस्य प्रकारतया न भानसम्भवः, तत्प्रतिबन्धकीभूतस्यानाहार्यबाधनिर्णयस्य सत्त्वात् । एवं यत्र वह्निव्याप्यधूमवान्पर्वत इति निर्णयेच्छा, ततो वह्निव्याप्यधूमाभाववान्पर्वत इति निर्णयस्ततः प्रतियोगितासम्बन्धावच्छिन्नवह्निव्याप्यधूमत्वावच्छिन्नप्रतियोगिताकाभावव्याप्यवानभावो वह्निव्याप्यधूमवांश्च पर्वत इति समूहालम्बनात्मको वह्निव्याप्यधूमवान्पर्वत इत्यंश आहार्यः, इतरांशेऽनाहार्य-

---

१. सामानाधिकरण्यसम्बन्धेनानुमितिजनकतावच्छेदकत्वविशिष्टपरामर्शत्वरूपजात्यनभ्युपगमेनेत्यर्थः । तेन परामर्शत्वस्य जातित्वेनैकस्योभयसाधारणत्वेऽपि न क्षतिः ।

२ ले० टि० इष्टसाधनत्वावगाहिनः प्रत्यक्षात्मकत्वाभावात्स्मरणात्मकेति ।

३. अनुभवं प्रति विशेषणज्ञानस्य कारणत्वेनैकक्षणविलम्ब इत्यतः स्मरणपर्यन्तानुधावनम् ।

निर्णयस्तत्रापि न वह्निव्याप्यधूमाभावभानं[1] तस्याभावांशे प्रतियोगितासम्बन्धेन वह्निव्याप्यधूमप्रकारकतया तत्प्रतिबन्धकीभूतस्य तदभावव्याप्यवत्तानिर्णयस्य कार्यकाले सत्त्वात्। एवं यत्र भाविवह्निव्याप्यधूमवान्पर्वत इति निर्णयोऽप्रमेत्यप्रामाण्यज्ञानम्, ततो वह्निव्याप्यधूमवान्पर्वत इत्यपेक्षाबु(द्)ध्यात्मकनिर्णयस्तदप्रामाण्यग्रहनाशश्च, ततो वह्निव्याप्यधूमवान्पर्वत इति निर्णयेच्छा, ततो वह्निव्याप्यधूमवान्पर्वत इत्याहार्यनिर्णयस्तत्रापि न वह्निव्याप्यधूमाभावभानं बाधनिर्णयस्य प्राक् सत्त्वात्। एवं यत्र वह्निव्याप्यधूमाभाववान्पर्वत इति निर्णयकाले वह्निव्याप्यधूमवान्पर्वत इति प्रत्यक्षेच्छासत्त्वे सत्याञ्च घटादिभिन्नविषयकानुमितिसामग्र्यां वह्निव्याप्यधूमवान्पर्वत इत्याहार्यप्रत्यक्षम्, तस्यापि न वह्निव्याप्यधूमाभावादिप्रकारकत्वं पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्यधूमाभावप्रकारकप्रत्यक्षं प्रति प्रतिबन्धकीभूतायास्तादृशप्रत्यक्षत्वप्रकारकेच्छा[2]विरहविशिष्टभिन्नविषयकानुमितिसामग्र्याः सत्त्वात्। तथा चोक्ताहार्यपरामर्शेषु वह्निव्याप्यधूमाभावाप्रकारकत्वरूपनिर्णयत्वस्य सत्त्वात्तदुत्तरमनुमित्यापत्तिरित्यनाहार्यत्वस्यानुमितिकारणतावच्छेदकत्वम्, आहार्यज्ञानस्य तत्तद्व्यक्तित्वेन पृथगनुमितिप्रतिबन्धकत्वं वाऽवश्यमुपगन्तव्यम्।

अथोक्ताहार्यपरामर्शेषु वह्निव्याप्यधूमाभावपर्वतत्वयोरेकत्र द्वयमिति रीत्या[3] धर्मिविशेषणतया भानमुपेयते, न तु[4] तयोर्विशेषणविशेष्यतावच्छेदकभावस्तादृशज्ञानस्य च निर्धर्मितावच्छेदक(क)तया तत्र बाधादिनिर्णयोऽकिञ्चित्कर[5] इत्युक्ताहार्यपरामर्शानां वह्निव्याप्यधूमाभावाप्रकारकत्वरूपनिर्णयत्वसम्भव इति चेत्, न, वह्निव्याप्यधूमाभावाप्रकारकत्वमात्रं न निर्णयत्वं किन्तु पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभावप्रकारताशून्यत्वम्। एवञ्चोक्ताहार्यपरामर्शेऽत्रैकत्र द्वयमिति रीत्या वह्निव्याप्यधूमाभावप्रकारकत्वेऽपि निर्णयत्वं दुरपवादमिति तद्वारणायानाहार्यत्वस्य कारणतावच्छेदकत्वम्, आहार्यज्ञानस्य प्रतिबन्धकत्वं वाऽऽवश्य(क)मिति केषाञ्चिन्नवीनानां मतमपि परास्तम्, उक्ताहार्यनिर्णयेषु परामर्शत्वजातिघटितानुमितिकारणतावच्छेदकाभावेनैव तेभ्योऽनुमित्यापत्तिवारणसम्भवात्। अत एवोक्तरीत्या संशयवारणेऽनुमितिकारणतावच्छे-

---

१. ले० टि० तादृशाभावभानस्य।

२. ले० टि० पर्वतविशेष्यकाभावप्रकारकप्रत्यक्षं जायतामित्याकारकेच्छा।

३. ले० टि० पर्वतविशेषणतया।

४. ले० टि० अभावस्य विशेषणत्वं पर्वतत्वस्य विशेष्यतावच्छेदकत्वम्।

५. ले० टि० एकत्र द्वयमिति रीत्या जायमानस्य ज्ञानस्य कस्यापि प्रतिबन्धकत्वाभावात् सधर्मितावच्छेदक(क)ज्ञानस्यैव सर्वत्र प्रतिबध्यत्वात् प्रतिबन्धकत्वात् (च) इति सिद्धान्तात्।

दककोटौ निश्चयत्वानिवेशात्कथं निश्चयत्वनिवेशप्रयुक्ताहार्यपरामर्शवारणमित्याशङ्काऽपि निरस्ता, संशयवारणवरमंनैवाहार्यपरामर्शवारणसम्भवादिति युक्तमुत्पश्यामः।

वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिपक्षविशेषणकपरामर्शादनुमितेरनुदयेन कारणतावच्छेदकघटकपक्षविशेष्यतायां मुख्यत्वमपि निवेशनीयम्। विशेष्यतागतं मुख्यत्वञ्च विषयतात्वव्याप्यविशेष्यतात्ववद्विशेष्यतात्वव्याप्यस्वरूपसम्बन्धविशेषरूपमखण्डोपाधिविशेषरूपं वा। तत्तु वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शीयपक्षविशेष्यतायामेवास्ति, तत्रैव पक्षमुख्यविशेष्यत्वव्यवहारात्। न तूक्तपक्षविशेषणकपरामर्शीयपक्षविशेष्यतायां तत्र पक्षमुख्यविशेष्यकत्वव्यवहाराभावादिति न तस्मादनुमितिः।

केचित्तु प्रकारताभिन्नत्वमेव मुख्यत्वं पक्षविशेषणकपरामर्शीयहेतुनिष्ठप्रकारतानिरूपितविशेष्यतायाश्च देशादिवृत्तिविशेष्यतानिरूपितप्रकारतात्मकत्वेन[1] मुख्यत्वाभावान्न तस्मादनुमितिः। अथ तस्याः प्रकारकतात्मकत्वे किं मानमिति चेद् वह्निव्याप्यधूमवान्पर्वतः पर्वतवान्देश इत्यादिसमूहालम्बनात्पक्षविशेषणकपरामर्शस्य वैलक्षण्यानुपपत्तिरेव। अन्यथोभयत्रैव वह्निव्याप्यधूमप्रकारकत्व-पर्वतविशेष्यकत्वयोः पर्वतप्रकारकत्वदेशविशेष्यकत्वयोश्च सत्त्वेन वैलक्षण्यानुपपत्तिः। तस्याः प्रकारतात्मकत्वे च पक्षविशेषणकपरामर्शस्य देशादिनिष्ठविशेष्यतानिरूपितप्रकारतात्मिकायाः(काया) हेतुनिष्ठप्रकारतानिरूपितपक्षविशेष्यता, तच्छालित्वेनोक्तसमूहालम्बनस्य च देशादिनिष्ठविशेष्यतानिरूपितप्रकारताभिन्नाया हेतुनिष्ठप्रकारतानिरूपितपक्षविशेष्यता, तच्छालित्वेन तयोर्वैलक्षण्योपपत्तिः सम्भवत्येव। अत एवोक्तसमूहालम्बनस्यानुमितिजनकत्वमपि सुघटमित्याहुः, तदसत्, पक्षविशेषणकपरामर्शस्योक्तसमूहालम्बनाद्वैलक्षण्यानुपपत्त्या देशादिनिष्ठविशेष्यतानिरूपितप्रकारतात्मिका या हेतुनिष्ठप्रकारतानिरूपितपक्षविशेष्यता, तच्छालित्वेऽपि देशादिनिष्ठविशेष्यतानिरूपितप्रकारताभिन्नतया हेतुनिष्ठप्रकारतानिरूपितपक्षविशेष्यता वह्निव्याप्यधूमवान्पर्वत इत्यादिपक्षमुख्यविशेष्यकपरामर्शसाधारणी तन्नियामकसामग्रीसत्त्वा(त्)तच्छालित्वेऽपि बाधकाभावेन तस्मादनुमित्यापत्तेर्दुरुद्धरत्वात्, पूर्वोक्तरीत्या समूहालम्बनात्मकैकज्ञानानभ्युपगमेन तद्वैलक्षण्यानुपपत्तेरभावात्। प्रकारताभिन्नत्वाप्रतिसन्धानदशायामपि विशेष्यतायां मुख्यत्वप्रत्ययव्यवहारयोः सर्वजनसिद्धत्वेन विशेष्यतागतमुख्यत्वस्य प्रकारताभिन्नत्वरूपत्वासम्भवाच्च। एतेन प्रकारताभिन्नत्वं न मुख्यत्वं विशेष्यतात्वप्रकारतात्वयोर्विरुद्धतया तस्याव्यावर्तकत्वात्; किन्तु प्रकारतानवच्छिन्नत्वम्[2]। पक्षविशेषणकपरामर्शस्योक्तसमूहालम्बनाद्वैलक्षण्यानुपपत्त्या देशनिष्ठविशेष्यतानिरूपितप्रकारतावच्छिन्ना या

---

१. समानाधिकरणविषयतयोरभेद इति मतेनेदम्।

२. समानाधिकरणविषयतयोरवच्छेद्यावच्छेदकभाव इति मतेनेदम्।

हेतुनिष्ठप्रकारतानिरूपितपक्षनिष्ठविशेष्यता, तच्छालित्वेन न तस्मादनुमितिः। उक्तसमूहालम्बनस्य तु देशादिनिष्ठविशेष्यतानिरूपितप्रकारतानवच्छिन्नाया हेतुनिष्ठप्रकारतानिरूपितपक्षनिष्ठविशेष्यता, तच्छालित्वादनुमितिजनकत्वं सुघटकमित्यपि परास्तम्, उक्तदोषापत्तेः।

अथानुमितिजनकतावच्छेदकपरामर्शत्वानभ्युपगमादेव पक्षविशेषणकपरामर्शादनुमितेरसम्भवेन कारणतावच्छेदककोटौ मुख्यविशेष्यतानिवेशे प्रयोजनाभाव इति चेत्, न, एवमपि पक्षनिष्ठविशेष्यतात्वेन तादृशविशेष्यतासामान्यस्य निवेशापेक्षया पक्षनिष्ठमुख्यविशेष्यतानिवेशनस्यैव समुचितत्वात्। अथ पक्षविशेषणकनिर्णयादनुमितिसन्देहेन व्यभिचारसन्देहात् तादृशनिर्णये परामर्शत्वमभ्युपेत्य कारणतावच्छेदककोटौ मुख्यविशेष्यताञ्चानिवेश्य तत्साधारणरूपेण कारणत्वमेवोचितमिति चेत्, न, लाघवतर्कविरहविशिष्टस्यैव व्यभिचारसन्देहस्य कारणताविघटकतयोक्तलाघवसत्त्वेन व्यभिचारसन्देहस्याप्रयोजकत्वात्। पाकानुमाने पक्षमुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वं कण्ठरवेणोक्तवतां पक्षधरमिश्राणामप्ययमेवाशयः।

केचित्त्वाहार्यत्वस्यैकस्याभावेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वमेवानाहार्यत्वमनुमितिकारणतावच्छेदकम्। एवञ्च पक्षविशेषणकपरामर्शस्याप्यनुमितिहेतुत्व आहार्यतादृशपरामर्शादनुमितिवारणायानन्ततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदानां कारणतावच्छेदककोटौ निवेशेन तेषां परस्परविशेष्यविशेषणभावे विनिगमनाविरहेण चातीवगौरवम्, पक्षमुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वे च नोक्तरीत्या गौरवमिति पक्षमुख्यविशेष्यकपरामर्शस्यैवानुमितिहेतुत्वमिति पक्षधरमिश्राणामाशये(यं) वर्णयन्ति, तदसत्, पूर्वोपदर्शितरीत्या[1]ऽनुगतानाहार्यस्यैवानुमितिकारणतावच्छेदकत्वात्। अनाहार्यत्वस्य कारणतावच्छेदकत्वमेव नेत्यस्याप्यावेदितत्वाच्च।

एतेन पक्षमुख्यविशेष्यत्वं नानुमितिकारणतावच्छेदकम्, अप्रामाण्यज्ञानास्कन्दितपरामर्शादनुमितिस्वीकारेऽनुभवविरोधवत्पक्षविशेषणकपरामर्शादनुमितिस्वीकारे तदभावेन तस्मादनुमितिस्वीकारे बाधकाभावात्। अथानुभवविरोधाभावेऽपि लाघवादिरूपसाधकविरहेण तस्मादनुमितिस्वीकारस्य निर्युक्तिकतया साधकाभाव एव बाधक इति चेत्, न, वक्ष्यमाणरीत्या लाघवरूपसाधकस्यापि सत्त्वात्। तथा हि—पक्षविशेषणकपरामर्शादनुमितिस्वीकारे तादात्म्यादिसम्बन्धेन वह्निव्याप्यधूमवत्पर्वतत्वाद्यवच्छिन्नलिङ्गकपर्वतत्वाद्यवच्छिन्नपक्षकवह्न्यादिविधेयकानुमितिसामग्र्याभिन्नविषयकप्रत्यक्षादिकं प्रत्यतिरिक्तप्रतिबन्धकत्वेन(त्वं न) कल्प्यते, तादृशानुमितिजनकीभूतवह्निव्याप्यधूमवत्

---

१. ले० टि० वस्तुतस्त्वित्यादिनाऽऽहार्यत्वस्य जातित्वखण्डनोक्तरीत्या।

पर्वतवान्पर्वत इत्याद्याकारकपरामर्शघटितवह्निव्याप्यधूमवत्पर्वतत्वाद्यवच्छिन्नलिङ्ग-कानुमितिसामग्रीकाले पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमादिप्रकारता-शालिपरामर्शघटितधूमत्वाद्यवच्छिन्नलिङ्गकपर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्यादिविधेय-कानुमितिसामग्र्या आवश्यकत्वेन क्लृप्तप्रतिबन्धकत्वेनैवोपपत्तेरिति लाघवम्। पक्षमुख्यविशेष्यकपरामर्शादेवानुमितिस्वीकारे च तादृशानुमितिसामग्रीकाले पर्वत-त्वाद्यवच्छिन्नमुख्यविशेष्यतानिरूपितवह्निव्याप्यधूमादिप्रकारतादिशा लिङ्गपरामर्शघटित-धूमत्वाद्यवच्छिन्नलिङ्गकानुमितिसामग्र्या अभावेनानन्तगुरुतरतादृशानुमितिसामग्र्या भिन्नविषयकप्रत्यक्षादिकं प्रत्यतिरिक्तप्रतिबन्धकत्वमवश्यं कल्पनीयमिति गौरवम्। तस्मात्पक्षविशेषणकपरामर्शादप्यनुमित्युदयेन पक्षमुख्यविशेष्यकपरामर्शत्वस्य न कारणतावच्छेदकत्वम्। न चैवं पाकानुमानस्थलीयपक्षधरमिश्रग्रन्थविरोध इति वाच्यम्, तर्कनिर्ण(र्णे)येऽर्थे ग्रन्थविरोधस्य तार्किकैरनादरणीयत्वादिति केषाञ्चिन्नवीनानां मतमपास्तम्, पक्षमुख्यविशेष्यकपरामर्शादेवानुमितिस्वीकारेऽपि मुख्यविशेष्यताति-रिक्तानामनन्तविशेष्यतानां कारणतावच्छेदककोटावनिवेशेन महालाघवसम्भवात्।

किञ्च, हेतुतावच्छेदकभेदेनानुमितिसामग्र्या न विभिन्नं प्रतिबन्धकत्वम्। एवञ्च पर्वतत्वाद्यवच्छिन्नमुख्यविशेष्यतानिरूपितवह्निव्याप्यत्वाद्यवच्छिन्नप्रकारताशालि-परामर्शत्वेन धूमत्वाद्यवच्छिन्नलिङ्गकपरामर्शं निवेश्यावश्यक्लृप्ततया भिन्नविषयक-प्रत्यक्षादिकं प्रति धूमत्वाद्यवच्छिन्नलिङ्गकानुमितिसामग्र्याः प्रतिबन्धकत्वात्तयैवोपपत्तौ पक्षमुख्यविशेष्यकपरामर्शादेवानुमितिस्वीकारेऽपि तादृशानुमितिसामग्र्या भिन्नविषयक-प्रत्यक्षादिकं प्रत्यतिरिक्तप्रतिबन्धकत्वं न कल्प्यते, क्लृप्तस्थलतरीयप्रतिबन्धकतयैवो-पपत्तेरिति दिक्।

ननु तथापि पक्षमुख्यविशेष्यकत्वस्यानुमितिकारणतावच्छेदकत्वं न विचारसहम्, वह्निव्याप्यधूमः पर्वते इत्यादिव्याप्यविशेष्यकपरामर्शादपि पर्वतो वह्निमानित्याद्यनु-मित्युत्पादेन तदसङ्ग्रहप्रसङ्गात्। न च तस्यापि पर्वतत्वाद्यवच्छिन्नप्रकारतानिरूपित-वह्निव्याप्यत्वाद्यवच्छिन्नविशेष्यताशालिपरामर्शत्वेन पृथक् कारणत्वं कल्पनीयम्। परामर्शद्वयस्यापि कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिसम्बन्धेन वैशिष्ट्यनिवे-शादेव च न परस्परजन्यानुमितौ व्यभिचार इति वाच्यम्, गौरवापत्तेः। न च मुख्यविशेष्य-त्वमनिवेश्य विशेष्यतामात्रनिवेशेऽपि कथं तत्सङ्ग्रहस्तस्य वह्निव्याप्यत्वाद्यवच्छिन्न-प्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यताशालित्वाभावादिति वाच्यम्, प्रकारतात्वेन प्रकारतां विशेष्यतात्वेन विशेष्यताञ्चानिवेश्य वह्निव्याप्यत्वाद्यवच्छिन्नविषयतानिरूपित-पर्वतत्वाद्यवच्छिन्नविषयताशालिपरामर्शत्वेनोभयपरामर्शसाधारणरूपेणैव कारणत्वाभ्युप-गमात्।

अथाप्रामाण्यज्ञानाभावादिनिवेशानुरोधान्नोक्तानुगतरूपेण परामर्शद्वयस्य कारणत्वसम्भवः। तथा ह्येकरूपेण परामर्शद्वयस्य हेतुत्वे वह्निव्याप्यधूमाभाववति पर्वते वह्निव्याप्यधूमप्रकारकमिदं ज्ञानमित्याद्याकारकपक्षविशेष्यकपरामर्शीयाप्रामाण्यज्ञानाभावस्य पर्वताभाववति पर्वतप्रकारमिदं ज्ञानमित्याद्याकारकव्याप्यविशेष्यकपरामर्शीयाप्रामाण्यज्ञानाभावस्य चे(चै)कत्र निवेशो वाच्यः। तथा चैकविधपरामर्शीयाप्रामाण्यज्ञानसत्त्वेऽन्यविधपरामर्शादप्यनुमित्यनुत्पादापत्तिर्द्विविधाप्रामाण्यज्ञानाभावस्यासत्त्वात्। एवं वह्निव्याप्यधूमाभावाद्यप्रकारकत्वरूपपक्षविशेष्यकपरामर्शीयनिश्चयत्वस्य पर्वताभावाद्यप्रकारकत्वरूपव्याप्यविशेष्यकपरामर्शीयनिश्चयत्वस्य चैकत्र निवेशो वाच्यः। तथा च पर्वतो वह्निव्याप्यधूमवान्न वा वह्निव्याप्यधूमः पर्वते इत्यादि परामर्शाद् वह्निव्याप्यधूमः पर्वते न वा वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शाच्चानुमित्यनुदयप्रसङ्गस्तत्रोक्तनिश्चयाभावात्। एवं तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वरूपानाहार्यत्वस्य कारणतावच्छेदकतया पक्षविशेष्यकाहार्यपरामर्शव्यक्तिभेदकूटस्य चैकत्र निवेशनीयतया तेषां भेदानां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकार्यकारणभावापत्तिः। तस्मात्परामर्शद्वयस्यैकैकविधाप्रामाण्यज्ञानाभावादिकं निवेश्य भिन्नरूपेण पृथक् कारणत्वकल्पनमेव समीचीनमिति चेत्, न, पूर्वोपदर्शितरीत्याऽप्रामाण्यज्ञानाभावानाहार्यत्वनिश्चयत्वानां कारणतावच्छेदककोटावनिवेशेनैव बाधकाभावात्। अत एव दीधितिकारस्य "किञ्च व्याप्यविशेषकात्पक्ष्य(क्ष) विशेष्यकाच्च परामर्शादनुमित्युदयात्"[1] इत्यादिना ग्रन्थेन परामर्शद्वयस्यानुगतरूपेण कारणताप्रतिपादनमपि सङ्गच्छत इति चेत्, मैवम्, वक्ष्यमाणदोषेण परामर्शद्वयस्यानुगतरूपेण कारणत्वासम्भवात्। अगत्या व्याप्यविशेष्यकपरामर्शस्य पृथक् कारणत्वकल्पनाया आवश्यकतया मुख्यविशेष्यकत्वघटितेन पक्षविशेष्यकपरामर्शनिष्ठानुमितिकारणतावच्छेदकेन तदसङ्ग्रहस्यादोषत्वात्। तथा हि—परामर्शद्वयस्योक्तानुगतरूपेण हेतुत्वे पक्षविशेष्यकपरामर्शकाले सिद्धिसत्त्वे व्याप्यविशेष्यकपरामर्शजन्यानुमितिर्जायतामित्याकारकेच्छासत्त्वेऽनुमित्यापत्तिर्व्याप्यविशेष्यकपरामर्शकालेऽनुमित्युत्पादकस्य व्याप्यविशेष्यकपरामर्शजन्यानुमितित्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावादिसहकृतस्य व्याप्यविषयतानिरूपितपक्षविषयताशालिपरामर्शत्वावच्छिन्नस्य तदानीमपि सत्त्वात्। एवं व्याप्यविशेष्यकपरामर्शकाले सिद्धिसत्त्वे पक्षविशेष्यकपरामर्शजन्यानुमितिर्जायतामित्याकारकेच्छासत्त्वेऽनुमित्यापत्तिः, पक्षविशेष्यकपरामर्शकालेऽनुमित्युत्पादकस्य पक्षविशेष्यकपरामर्शजन्यानुमितित्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावादिसहकृतस्य व्याप्यविषयतानिरूपितपक्षविषयताशालिपरामर्शत्वावच्छिन्नस्य च तदानीमपि सत्त्वात्। परामर्शद्वयस्य भिन्नरूपेण पृथक् कारणत्वे तु नोक्तानुपपत्तिः, व्याप्यविशेष्यकपरामर्शकालेऽनुमित्युत्पादकस्य व्याप्यविशेष्यकपरामर्शजन्यानुमितित्वप्रकारकेच्छाविरहविशिष्ट-

---

१. 'अनुमितिदर्शनात्' इति पाठः समुपलभ्यते।

सिद्धयभावादिसहकृतस्य पक्षप्रकारतानिरूपितव्याप्यविशेष्यताशालिपरामर्शत्वावच्छिन्नस्य एवं ( एवं ? ) पक्षविशेष्यकपरामर्शकालेऽनुमित्युत्पादकस्य पक्षविशेष्यकपरामर्शजन्यानुमितित्वप्रकारकेच्छाविरहविशिष्टसि[द्]ध्यभावादिसहकृतस्य व्याप्यप्रकारतानिरूपितपक्षविशेष्यताशालिपरामर्शत्वावच्छिन्नस्य च क्रमेणोक्तस्थलद्वयेऽभावात्। परामर्शद्वयस्यैकरूपेण कारणत्वेऽप्युक्तरीत्याऽऽपत्तिर्वारणीयेति तु नाशङ्कनीयम्, कारणतावच्छेदकावच्छिन्नस्यैव कार्योत्पादकतयैकरूपेण कारणत्व उक्तरीतेरसम्भवात्।

न च परामर्शद्वयस्य भिन्नरूपेण कारणत्वे परामर्शद्वयस्यैकरूपेण कारणताप्रतिपादकस्य किञ्च व्याप्यविशेष्यकादो(दि)त्यादिदीधितिकारग्रन्थस्यासङ्गतिरिति वाच्यम्। एतदस्वरसेनैव "व्याप्यविषयकत्वेन वा जन्यं ज्ञानं विशेषणीयम्"[1] इति दीधितिकारस्य कल्पान्तरानुसरणात्। न च तथापि विभिन्नरूपेण कारणत्वे परस्परजन्यानुमितौ व्यभिचारवारणाय कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशे गौरवापत्तिरिति वाच्यम्, अन्यथानुपपत्त्या प्रामाणिकगौरवस्यादोषत्वात्। तदुक्तं सर्वथो( तो ) बलवती ह्यन्यथानुपपत्तिरिति। वस्तुतस्तु सर्वत्र पक्षविशेष्यकपरामर्शदेवानुमितिर्न तु व्याप्यविशेष्यकपरामर्शादपीति व्याप्यविशेष्यकपरामर्शस्य विभिन्नकारणत्वमपि न कल्पनीयम्। न च विनिगमनाविरहः, सर्वत्र व्याप्यविशेष्यकपरामर्शादेवानुमितिर्न तु पक्षविशेष्यकपरामर्शादित्यस्यापि वक्तुं शक्यत्वादिति वाच्यम्, लाघवस्यैव विनिगमकत्वात्। तथा हि—पक्षविशेष्यकपरामर्शस्य कारणत्वे धूमाभावधूमवद्भेदादिकोटिकसंशयभेद एव कारणतावच्छेदककोटौ निवेशनीय इति लाघवम्। व्याप्यविशेष्यकपरामर्शस्य कारणत्वे तु पर्वताभावपर्वतवद्भेदादिकोटिकसंशयभेदः कारणतावच्छेदककोटौ निवेशनीयः। एवं वह्निव्याप्यधूमो वह्निव्याप्यधूमाभावो वा पर्वते इत्याद्याकारककोटिद्वयविशेष्यकः संशयभेदोऽप्यधिको निवेशनीयस्तादृशसंशयकालेऽप्यनुमित्यनुत्पादस्यानुभवसिद्धत्वादिति गौरवम्। न च कोटिद्वयविशेष्यकः संशय एव नास्तीति वाच्यम्, तस्यापि सकलाभियुक्तसम्मतत्वेनानुभवसिद्धत्वादिति वाच्यम्, तस्यापि सकलाभियुक्तसम्मतत्वेनानुभवसिद्धत्वेन चापलापयितुमशक्यत्वात्।

न च पक्षविशेष्यकपरामर्शस्य कारणत्वेऽपि वह्निव्याप्यधूमवान्पर्वतः पर्वतभिन्नो वेत्याद्याकारककोटिद्वयविशेष्यकसंशयभेदस्य कारणतावच्छेदककोटिनिवेशेन साम्यमिति वाच्यम्, तादृशसंशयस्य पक्षे साध्यव्याप्याभावाद्यनवगाहित्वेन तस्मादनुमित्यङ्गीकारेऽनुभवविरोधाभावात् तादृशसंशयभेदस्य कारणतावच्छेदककोटावनिवेशात्। तादृशसंशयभेदस्य कारणतावच्छेदककोटिप्रवेशेऽपि नाभिषिक्तस्य वह्निव्याप्यधूमस्तद्भिन्नो वा पर्वत इत्याद्याकारककोटिद्वयविशेष्यकसंशयस्य व्याप्यविशेष्यकपरामर्शकारणतावच्छेदककोटिनिवेशेन साम्याभावात्। एवं पक्ष-

---

१. अ० गा०, ८६।

विशेष्यकपरामर्शस्यानुमितिकारणत्वे पर्वतविशेष्यकवह्न्याद्यभावप्रकारकप्रत्यक्षादौ पर्वतो वह्निमानित्याद्यनुमितिसामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इति लाघवम्। तादृशानुमितिसामग्रीकाले तद्घटकस्य वह्निव्याप्यधूमादिप्रकारकपर्वतविशेष्यक-परामर्शस्यावश्यकतया तस्यास्त( स्य त )दभावव्याप्यवत्तानिर्णयमुद्रया क्लृप्तप्रतिबन्ध-कतयैवोपपत्तेः। व्याप्यविशेष्यकपरामर्शस्य कारणत्वे तु तादृशप्रत्यक्षादौ तादृशा-नुमितिसामग्र्या( ऽ ? )अतिरिक्त प्रतिबन्धकत्वकल्पनमावश्यकम्। तादृशानुमिति-सामग्रीकाले तद्घटकस्य पर्वतादिप्रकारकवह्निव्याप्यधूमादिविशेष्यकपरामर्शस्य सत्त्वेऽपि तस्य तादृशप्रत्यक्षादिसामान्यविशेष्यकत्वाभावेन तदभावव्याप्यवत्तानिर्णयमुद्रया क्लृप्त-प्रतिबन्धकतयाऽनिर्वाहादिति गौरवम्। न च व्याप्यविशेष्यकपरामर्शस्य कारणत्वेऽपि पर्वते न वह्निव्याप्यधूम इत्याद्याकारकवह्निव्याप्यधूमादिविशेष्यकपर्वताभावादि-प्रकारकप्रत्यक्षादौ तादृशानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन लाघवमिति वाच्यम्, पक्षविशेष्यकपरामर्शस्य कारणत्वेऽपि वह्निव्याप्यधूमाभाववान्पर्वत इत्याद्याकारक-पर्वतादिविशेष्यकवह्निव्याप्यधूमाभावादिप्रकारकप्रत्यक्षादौ तादृशानुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेन तदंशे साम्यात् ?

अथ घटपटादिप्रत्यक्षादौ तादृशानुमितिसामग्र्या अतिरिक्तप्रतिबन्धकत्व-मुभयवादिसिद्धम्। एवञ्च तत्रैव घटादिरूपविषयविशेषमनिवेश्य सामान्यतो वह्निभिन्न-विषयकप्रत्यक्षत्वाद्यवच्छिन्नं प्रति तादृशानुमितिसामग्र्या एकमेव प्रतिबन्धकत्वं कल्प्यत इति व्याप्यविशेष्यकपरामर्शत्वेन कारणत्वेऽपि नोक्तातिरिक्तप्रतिबन्धकतायाः कल्पनमिति चेत्, न, इच्छानामुत्तेजकत्वानुरोधेनैकप्रतिबन्धकत्वकल्पनासम्भवात्। तथा हि—तादृशानुमितिसामग्रीकालेऽपि घटप्रत्यक्षं जायतां पटप्रत्यक्षं जायतामित्या-कारकेच्छासत्त्वे घटपटादिरूपभिन्नविषयकप्रत्यक्षाद्युत्पत्त्या तासामुत्तेजकत्वमवश्यं वाच्यम्, एकप्रतिबन्धकत्वे च तत्तदिच्छाविरहकूटमप्येकत्रैव निवेशनीयम्। एवञ्च तादृशानुमितिसामग्रीकाले घटप्रत्यक्षं जायतामित्याद्याकारकेच्छासत्त्वे घटप्रत्यक्षादि-सामग्र्यसत्त्वे पटादिप्रत्यक्षसामग्रीसत्त्वे पटादिप्रत्यक्षाद्यापत्तिस्तदानीं घटप्रत्यक्षं जायतामित्याकारकेच्छाविरहाभावेन तद्घटितेच्छाविरहकूटविशिष्टतादृशानुमिति-सामग्र्या अभावात्। एवं तत्तदिच्छाविरहकूटस्य परस्परं विशेऽग्रविशेषणभावे विनि-गमनाविरहेणानन्तकार्यकारणभावापत्तिश्चेति घटपटादिरूपविषयविशेषं निवेश्य घट-प्रत्यक्षत्वाद्यवच्छिन्नं प्रति घटप्रत्यक्षं जायतामित्याद्याकारकेच्छाविरहविशिष्ट-तादृशानुमितिसामग्र्या अतिरिक्तं (पृथक् ? )प्रतिबन्धकत्वमावश्यकम्।

अथात्र व्याप्यविशेष्यकपरामर्शस्य कारणत्व उक्तरीत्या वह्न्याद्यभावप्रत्यक्षादौ तादृशप्रत्यक्षादिच्छाविरहविशिष्टतादृशानुमितिसामग्र्या अतिरिक्तप्रतिबन्धकत्वकल्पन-

प्रयुक्तगौरवं दुरुद्धरमेव । एवं [1]पक्षविशेष्यकपरामर्शस्य कारणत्वे समानविशेष्यकत्वमपि विनिगमकम्, अनुमितेः पक्षविशेष्यकत्वनियमेन [2]तस्य पर्वतो वह्निमानित्याद्यनुमितिसमानविशेष्यकत्वात् । ननु समानविशेष्यकत्वस्य विनिगमकत्वे मानाभावः । न चावच्छेदकधर्मनिष्ठलघुपदार्थघटितत्वस्येव समानविशेष्यकत्वस्यापि लाघवत्वेन विनिगमकत्वमिति वाच्यम्, तस्य लाघवत्व एव मानाभावात् । न च व्याप्यविशेष्यकपरामर्शस्य पर्वताद्युद्देश्यकवह्न्यादिविधेयकानुमितिं प्रति वह्निव्याप्यधूमादिविशेष्यकपर्वतादिप्रकारकपरामर्शत्वेन कारणत्वेऽनन्तपक्षभेदेन कारणताभेदापत्त्या गौरवम् । पक्षविशेष्यकपरामर्शस्य तु वह्न्यादिविधेयतानिरूपितविशेष्यतासम्बन्धेनानुमितिं प्रति वह्निव्याप्यधूमादिप्रकारतानिरूपितविशेष्यतासम्बन्धेन परामर्शत्वेन कारणत्वे पक्षभेदेन कारणताभेदाभावाल्लाघवमिति लाघवमूलकतया समानविशेष्यकत्वस्य विनिगमकत्वमिति वाच्यम्, व्याप्यविशेष्यकपरामर्शस्यापि वह्न्यादिविधेयतानिरूपितविशेष्यतासम्बन्धेनानुमितिं प्रति वह्निव्याप्यधूमादिविशेष्यतानिरूपितप्रकारतासम्बन्धेन परामर्शत्वेन कारणत्वे पक्षभेदेन कारणताभेदाभावादिति चेत्, न, अणुरपि विशेषोऽध्यवसायक इति न्यायेन समानविशेष्यकत्वस्यापि ज्ञानादिकारणताया लाघवादिव स्वातन्त्र्येणैव विनिगमकत्वात् । तस्माद् व्याप्यविशेष्यकपरामर्शादनुमितेरेवानुदयेन पक्षमुख्यविशेष्यकत्वस्यानुमितिकारणतावच्छेदकत्वे न कोऽपि दोष इत्यलमतिविस्तरेण ।

नन्वत्र कारणतावच्छेदककोटिप्रविष्टस्वत्वव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तेः स्वत्वघटिततया हेतुतावच्छेदकभेदेन भेदाद्वह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वाद्यवच्छिन्नविशेष्यकपरामर्शत्वादिना विशेषरूपेणैव कारणत्वं वाच्यम्, न तु सामान्यतो वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकपरामर्शत्वानां (त्वेन)[3] । तथा च वह्निव्याप्यालोकवान्पर्वत इत्याद्यालोकादिलिङ्गकपरामर्शजन्यायां पर्वतो वह्निमानित्याद्यनुमितौ व्यभिचारस्तस्याः पर्वतोद्देश्यक-वह्निविधेयकानुमितित्वादिरूपकार्यतावच्छेदकाक्रान्तत्वेन तदव्यवहितपूर्वक्षणावच्छेदेन तदधिकरणे[4]

---

१. तद्विशेष्यकपरामर्शस्तद्विशेष्यकानुमितिं प्रत्येव कारणमिति भावः ।

२. पक्षविशेष्यकपरामर्शस्य ।

३. अत्र परामर्शत्वानामिति पाठः प्रमादादायातः । यतः षष्ठ्यन्तस्य पूर्ववर्तिकारणत्वमित्यनेनान्वयः । परामर्शत्वानान्तु न कारणत्वमपि तु तदवच्छेदकत्वम् । परामर्शत्वेनेति पाठे तु तृतीयार्थोऽवच्छेदकत्वम् । तथा च परामर्शनिष्ठकारणता न सामान्यतो वह्निव्याप्यत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकपरामर्शत्वावच्छिन्नेत्याशयः । अथवा कारणतावच्छेदकत्वमिति शिष्टः पाठः । तथा च यथाश्रुतमपि साधुः ।

४. धूमत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिपरामर्शत्वरूपकारणतावच्छेदकावच्छिन्नस्यासत्त्वात् । तत्रालोकत्वावच्छिन्नप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिपरामर्शो वर्तत इत्याशयः ।

निरुक्तकारणतावच्छेदकावच्छिन्नस्यासत्त्वात् । न च विशिष्य हेतुतावच्छेदकमनिवेश्यं सामान्यतो यत्किञ्चिद्व्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिविशिष्टवत्तानिश्चयत्वेन धूमालोकादिलिङ्गकनिखिलपरामर्शानामेकरूपेण हेतुत्वस्य कल्पनान्न व्यभिचार इति वाच्यम्, तथा सति वह्नावालोकव्यापकत्वावगाहिनः, पर्वते च धूमसम्बन्धावगाहिन आलोकव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इत्यादिनिश्चयादनुमित्यापत्तेरिति चेत्—

अत्र केचित्—धूमादि(आदि?)लिङ्गकानुमितित्वावच्छिन्नं प्रति धूमलिङ्गकपरामर्शत्वेन कारणत्वस्याभ्युपगमान्नान्यलिङ्गकानुमितौ व्यभिचारः । धूमादिलिङ्गकत्वं चाव्यवहितत्वे सत्युत्तरत्वम् । तत्र धूमादिलिङ्गकपरामर्शाव्यवहितपूर्वक्षणोत्पन्नान्यलिङ्गकानुमितौ व्यभिचारवारणाय विशेष्यमुत्तरत्वम् । तच्च स्वाधिकरणसमयध्वंसाधिकरणत्वम् । अन्यलिङ्गकानुमित्युत्पत्त्यधिकरणधूमपरामर्शाव्यवहितपूर्वक्षणे च नैतादृशं धूमपरामर्शनिरूपितमुत्तरत्वमतो न तत्र व्यभिचारः । धूमपरामर्शानन्तरोत्पन्नान्यलिङ्गकानुमितौ व्यभिचारवारणायाव्यवहितत्वविशेषणम् । तच्च स्वाधिकरणसमयध्वंसाधिकरण-समयध्वंसानधिकरणत्वं क्षणद्वयसाधारणाव्यवधानरूपम् । उक्तानुमित्युत्पत्त्यधिकरणधूमपरामर्शचतुर्थक्षणे च धूमपरामर्शाधिकरणसमयध्वंसाधिकरणीभूतो यो द्वितीयक्षणात्मकसमयस्त[द्]ध्वंसाधिकरणीभूतो यस्तृतीयक्षणात्मकः समयस्त[द्]ध्वंसानधिकरणत्वाभावान्नैतादृशं धूमपरामर्शनिरूपितमव्यवधानमतो न तत्र व्यभिचारः । न च लाघवात् स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वरूपैकक्षणसाधारणाव्यवधानमेवास्तु क्षणविशेषणम् । तावताऽप्युक्तव्यभिचारवारणसम्भवादिति वाच्यम्, तथा सति धूमपरामर्शतृतीयक्षणोत्पन्नानुमितेरसङ्ग्रहप्रसङ्गात् ।

यत्तु क्षणद्वयसाधारणनिरुक्ताव्यवधाननिवेशेऽप्यपेक्षात्मकबुद्धेः क्षणत्रयावस्थायित्वेनायमेको घटः, अयमेको घटो वह्निव्याप्यधूमवांश्च पर्वत इत्याद्याकारकसमूहालम्बनोया(म्बनात्मिका)पेक्षाबु[द्]ध्यात्मकधूमपरामर्शाच्च चतुर्थक्षणोत्पन्नधूमलिङ्गकानुमितेरसङ्ग्रहो दुर्वारः । न च स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वरूपक्षणत्रयसाधारणमव्यवधानं निर्वाच्यमतो नोक्तानुमितेरसङ्ग्रह इति वाच्यम्, तथा सत्यपेक्षाबु[द्]ध्यानात्मकधूमपरामर्शचतुर्थक्षणोत्पन्नान्यलिङ्गकानुमितौ व्यभिचारापत्तेरिति तदविचारिताभिधानम् । अपेक्षाबु[द्]ध्यात्मकपरामर्शे मानाभावात् । भावे वा तस्माच्चतुर्थक्षणेऽनुमितेरसम्भवेन तदसङ्ग्रहासम्भवात् । तथा ह्यादावपेक्षाबुद्धिस्ततो द्वित्वम्, ततो द्वित्वत्वनिर्विकल्पकम्,[1] ततो द्वित्वत्वप्रकारकद्वित्वप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततोऽपेक्षाबुद्धिनाशस्य द्वित्वनाशहेतुतया द्वित्वनाश इति क्रमः । तत्रापेक्षाबुद्धेस्तृतीयक्षण एवेतरज्ञानवत् स्वाव्यवहितोत्तरक्षणोत्पन्नेन स्वसमानाधिकरणविशेषगुणेन नाशे तन्नाशस्य द्वित्वनाशहेतुतया चतुर्थक्षणे द्वित्वनाशापत्त्या तत्प्रत्यक्षानुपपत्तिः, विषयस्य कार्यसहभावेनैव-

१. द्वित्व-द्वित्वत्वविषयकं निर्विकल्पकं ज्ञानम् ।

प्रत्यक्षहेतुत्वादित्यपेक्षाबु[ द् ]ध्युत्पत्तिद्वितीयक्षणे स्वसमानाधिकरणविशेषगुणानुत्पादमभ्युपेत्यापेक्षाबुद्धिनाशे द्वित्वनिर्विकल्पकस्य स्वातन्त्र्येण कारणत्वमभ्युपेत्य वा चतुर्थक्षण एव नाशोऽभ्युपेयत इत्यपेक्षाबुद्धेः क्षणत्रयावस्थायित्वं द्वित्वप्रत्यक्षान्यथानुपपत्त्या कल्प्यत इति सिद्धान्तसरणिः। अपेक्षाबु[द्]ध्यात्मकपरामर्शस्थले यदि चतुर्थक्षणे द्वित्वप्रत्यक्षोत्पत्तिस्तदाऽनुमितिरेव जायते क्व तदसङ्ग्रहः। यदि च न तदुत्पत्तिस्तदा तदन्यथानुपपत्तेरभावेन तस्य क्षणत्रयावस्थायित्वे मानाभावेन द्वितीयक्षण एवानुमितिर्जायते, न तु चतुर्थक्षणे। तस्यास्तु क्षणद्वयसाधारणनिरुक्ताव्यवधानविशिष्टक्षणोत्पत्तिकत्वान्नासङ्ग्रह इत्युभयथाप्यपेक्षाबु[द्]ध्यात्मकपरामर्शाच्चतुर्थक्षणेऽनुमितेरसम्भवेन न तदसङ्ग्रहः।

वस्तुतस्त्वपेक्षाबुद्धिमात्रस्यैव क्षणत्रयावस्थायित्वे मानाभावः, विषयस्य कार्यसहभावेन प्रत्यक्षहेतुत्वे मानाभावेन द्वित्वप्रत्यक्षानुपपत्त्यभावात्। भवतु तावत्, तथापि न द्वित्वप्रत्यक्षानुपपत्तिः, स्ववृत्तिप्रागभाव(गभा)प्रतियोगित्वसम्बन्धेनैवापेक्षाबुद्धिनाशस्य द्वित्वनाशहेतुतया तृतीयक्षणेऽपेक्षाबुद्धिनाशेऽपि निरुक्तसम्बन्धेनापेक्षाबुद्धिनाशस्य चतुर्थक्षण एव सत्त्वेन पञ्चमक्षण एव द्वित्वनाशात्। सम्बन्धघटकं वृत्तित्वं प्रतियोगित्वञ्च कालिकसम्बन्धेन। अथवाऽपेक्षाबुद्धिनाशस्य न द्वित्वनाशहेतुता; किन्तु द्वित्वं सविकल्पकस्यैवेति तृतीयक्षणेऽपेक्षाबुद्धिनाशेऽपि चतुर्थक्षणे द्वित्वनाशाभावान्न तत्प्रत्यक्षानुपपत्तिः। युक्तञ्चानयैव रीत्या द्वित्वप्रत्यक्षोपपादनम्। अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गीकृत्य द्वित्वप्रत्यक्षोपपादनेनापेक्षाबुद्धेः स्वसमानाधिकरणविशेषगुणरूपसामान्यसामग्रीबलात् तृतीयक्षणे नाशवारणायापेक्षाबुद्ध्युत्पत्तिक्षणादेरननुगतस्यस्व समानाधिकरणविशेषगुणं प्रति प्रतिबन्धकत्वकल्पनेनापेक्षाबुद्धिनाशे द्वित्वनिर्विकल्पकस्य स्वातन्त्र्येण कारणत्वकल्पनेन वा गौरवापत्तिः। एवमनन्तापेक्षाबुद्धीनामनन्ततृतीयक्षणसम्बन्धकल्पनेनापि गौरवं द्रष्टव्यमिति दिक्। धूमपरामर्शनाशोत्पत्तिसमयनष्टानां घटिकाद्यात्मकस्थूलसमयानामपि धूमपरामर्शादिनिरूपितनिरुक्ताव्यवहितोत्तरत्वाक्रान्ततया तदुत्पन्नानां(यां) धूमपरामर्शादिपूर्वकालीनान्यलिङ्गकानुमितौ व्यभिचारवारणाय क्षणेति। पर्वतो वह्निमान् वह्निव्याप्यधूमवांश्चेत्याकारकान्यलिङ्गकानुमितौ धूमादिपरामर्शाव्यवहितोत्तरक्षणवृत्तित्वेन व्यभिचारवारणाय तदुत्पत्तिनिवेशः।

अथाव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन धूमादिपरामर्शविशिष्टत्वस्य कार्यतावच्छेदककोटिप्रवेशेऽपि चैत्रीयधूमपरामर्शाव्यवहितोत्तरक्षणोत्पन्नायां मैत्रीयान्यलिङ्गकानुमितौ व्यभिचारो दुर्वारस्तस्या अप्यव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन धूमपरामर्शविशिष्टत्वरूपधूमपरामर्शकार्यतावच्छेदकाक्रान्तत्वेन तदव्यवहितपूर्वक्षणावच्छेदेन तदधिकरणे मैत्रात्मनि धूमपरामर्शाभावादिति चेत्, न, अव्यवहितोत्तरक्षणोत्पत्तिकत्वसामानाधिकरण्योभयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वस्यैव कार्यतावच्छेदकत्वात्। उपदर्शितान्यलिङ्गकानुमितौ च सामानाधिकरण्यसम्बन्धेन धूमपरामर्शाभावात्, नोभयसम्बन्धेन धूमपरामर्शविशिष्टत्वमतो न व्यभिचार इति वदन्ति।

दीधितिकारानुयायिनस्त्वव्यवहितोत्तरक्षणोत्पत्तिकत्वसामानाधिकरण्योभयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वमेव धूमलिङ्गकत्वम्; परन्तु सम्बन्धघटकाव्यवधानं नोक्तरूपम् ; किन्तु स्वध्वंसाधिकरणसमयध्वंसानधिकरणत्वरूपमपेक्षाबुद्धयात्मकपरामर्शस्थले क्षणत्रयसाधारणं तदनात्मकपरामर्शस्थले च क्षणद्वयसाधारणम् । एवञ्चापेक्षाबुद्धयात्मकपरामर्शचतुर्थक्षणोत्पन्नधूमलिङ्गकानुमितेरपि नासङ्ग्रहस्तदुत्पत्त्यधिकरणचतुर्थक्षणस्य स्वध्वंसाधिकरणीभूतो यश्चतुर्थक्षणस्तद्ध्वंसानधिकरणत्वात् । यदि चोक्तरीत्याऽपेक्षाबुद्धयात्मकपरामर्शाच्चतुर्थक्षणे नानुमितिः सम्भवतीति विभाव्यते, तदापि नोक्तरूपाव्यवधानं सम्बन्धघटकम्; किन्तु स्वध्वंसेत्यादिरूपमेव लाघवात् ।

यत्त्वत्र स्वपदं धूमादिपरामर्शसामान्यपरं तत्तद्व्यक्तिपरं वा ? नाद्यः, सर्वस्यैव समयस्यातीतधूमादिपरामर्शध्वंसाधिकरणसमयध्वंसाधिकरणत्वेन निरुक्ताव्यवधानासिद्धेः । न द्वितोयः, तथा सति कार्यकारणभावस्य तत्तद्व्यक्तिविश्रान्तत्वावश्यकत्वेन तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुतयैवोपपत्तावव्यवहितोत्तरत्वघटितोभयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वं कार्यतावच्छेदककोटौ निवेश्य कार्यकारणभावस्यैवाभावेनाव्यवधानादिनिर्वचनवैयर्थ्यापत्तेरिति, तन्न, अन्यदीयाव्यवधानादेरन्यनिरूपितसम्बन्धत्वाभावेनैवानतिप्रसङ्गे स्वत्वस्य परिचायकतया सम्बन्धघटकाव्यवधानादिशरीरेऽनिवेशेनोक्तविकल्पानवकाशात् ।

एतेनात्र स्वपदेन तत्तद्व्यक्तिविवक्षणेऽननुगमापत्त्या स्वपदेन धूमपरामर्शसामान्यमेव विवक्षणीयम् । एवञ्च धूमपरामर्शाव्यवहितत्वे सति धूमपरामर्शोत्तरत्वमेव दलद्वयार्थः पर्यवसन्नः । तथा च धूमपरामर्शाव्यवहितपूर्वक्षणोत्पन्नान्यलिङ्गकानुमितौ व्यभिचारो दुर्वारः, तदुत्पत्त्यधिकरणक्षण एतद्धूमपरामर्शाव्यवधानस्यातीतधूमपरामर्शोत्तरत्वस्य व्यक्तिद्वयमादाय दलद्वयसत्त्वादित्यपि परास्तम्, स्वत्वस्याप्रवेशेनान्यव्यक्तिनिरूपिताव्यवधानस्यान्यव्यक्तिनिरूपितोत्तरत्वस्य चान्यव्यक्तिनिरूपितसम्बन्धाघटकतयैकव्यक्तिनिरूपितदलद्वयघटितस्यैव सम्बन्धत्वपर्यवसानेनोक्तानुमित्यधिकरणक्षण एकव्यक्तिनिरूपितदलद्वयाभावेन व्यभिचाराभावात् । न च तथाप्यत्राव्यवहितोत्तरत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयापत्तिः, सम्बन्धतावच्छेदकगौरवापत्तिश्चेति वाच्यम्, स्वाव्यवहितत्व-स्वोत्तरत्वोभयसम्बन्धेन धूमादिपरामर्शविशिष्टक्षणोत्पत्तिकत्वस्यैव सम्बन्धतयोक्तदोषाभावादिति वदन्ति[1] ।

केचित्त्वव्यवहितोत्तरत्व-सामानाधिकरण्योभयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वमेव धूमादिलिङ्गकत्वं लाघवात् । अनुमितिनिष्ठाव्यवहितोत्तरत्वमव्यवहितत्वे सत्युत्तरत्वम् । अव्यवहितत्वञ्च स्वाधिकरणसमयध्वंसोत्पत्त्यधिकरणक्षणवृत्तित्वम् । धूमादिपरामर्शद्वितीयक्षणोत्पन्नानुमितेः प्रथमक्षणात्मकस्वाधिकरणसमयध्वंसोत्पत्य-

---

१. दीधितिकारानुयायिन इत्यनेनान्वयः ।

धिकरणद्वितीयक्षणवृत्तित्वेन तृतीयक्षणोत्पन्नानुमितेश्च द्वितीयक्षणात्मकस्वाधिकरणसमयध्वंसोत्पत्त्यधिकरणतृतीयक्षणवृत्तित्वेन सङ्ग्रहः। एवमन्यत्रापि। धूमादिपरामर्शचतुर्थक्षणोत्पन्नान्यलिङ्गकानुमितौ स्वाधिकरणसमयध्वंसाधिकरणचतुर्थक्षणवृत्तित्वेन व्यभिचारवारणायोत्पत्तीति। तस्यामेव स्वाधिकरणसमयध्वंसोत्पत्त्यधिकरणस्थूलकालवृत्तित्वेन व्यभिचारवारणाय क्षणेति। अथवा स्वाधिकरणध्वंसोत्पत्त्याधिकरणत्वमेवाव्यवहितत्वम्। अधिकणत्वं च कालिकसम्बन्धेन। नन्वत्रोत्तरत्वनिवेशो व्यर्थः, धूमपरामर्शाव्यवहितपूर्वक्षणोत्पन्नान्यलिङ्गकानुमितौ धूमपरामर्शाधिकरणसमयध्वंसोत्पत्त्यधिकरणत्वाभावादेव व्यभिचाराप्रसक्तेः। अथापेक्षाबुद्ध्यात्म(त्मि)कायां तस्यां व्यभिचारः, तस्या धूमपरामर्शद्वितीयक्षणेऽपि सत्त्वेन प्रथमक्षणात्मकधूमपरामर्शाधिकरणसमयध्वंसोत्पत्त्यधिकरणत्वात्। न च तदनुमितिपूर्वं यदि सन्निकर्षादिघटितघटादिप्रत्यक्षसामग्रीसमवधानं तदा घटादिगतैकत्वस्यापि प्रत्यक्षसामग्रीसत्त्वेन समानविषयकप्रत्यक्षसामग्र्या बलवत्त्वादेकत्वविषयकत्वासम्भवेन तस्यानापेक्षाबु(द्)ध्यात्मकत्वम्। यदि च न तादृशसामग्रीसमवधानं तदा द्वित्वप्रत्यक्षसामग्र्यभावेनाग्रे द्वित्वप्रत्यक्षानुत्पत्त्या तदन्यथानुपपत्त्यभावेन न तस्याः क्षणत्रयावस्थायित्वमतो न व्यभिचार इति वाच्यम्, यत्र तदनुमितिपूर्वं न तादृशसामग्रीसमवधानं किन्तु तदुत्पत्तिक्षणे तदुत्तरक्षणे(वा ?)तत्राग्रे वा द्वित्वप्रत्यक्षोत्पत्त्या तस्याः क्षणत्रयावस्थायित्वरूपावश्यकत्वेन व्यभिचारात्। यदि चोक्तरीत्यापेक्षाबुद्धेः क्षणत्रयावस्थायित्वे मानाभावेन तदात्मिकानुमितौ न व्यभिचार इति विभाव्यते, तदापि धूमपरामर्शात्मिकायां पर्वतो वह्निमान् वह्निव्याप्यधूमवाँश्चेत्याकारकानुमितौ व्यभिचारो दुर्वारस्तस्या धूमपरामर्शद्वितीयक्षणे सत्त्वेनोक्ताव्यवधानस्य तत्र सत्त्वादिति चेत्, न, उत्तरत्वनिवेशेऽपि तत्र व्यभिचारवारणात्। तथा हि उत्तरत्वं हि स्वाधिकरणसमयध्वंसाधिकरणत्वम्। अधिकरणत्वञ्च कालिकसम्बन्धेन। एवञ्चोक्तानुमितेर्धूमपरामर्शद्वितीयक्षणे सत्त्वेन प्रथमक्षणात्मकधूमपरामर्शाधिकरणसमयध्वंसाधिकरणत्वस्य तत्रानपाय इति व्यभिचारावारकतयाऽव्यावर्तकत्वेनोत्तरत्वनिवेशस्य व्यर्थत्वमेवेति, मैवम्, कालिकसम्बन्धेन स्ववृत्तिप्राग्भा(गभा)वप्रतियोगित्वरूपोत्तरत्वस्यात्र निवेशेनोक्तानुमितिप्राग्भा(गभा)वस्य कालिकसम्बन्धेन धूमपरामर्शावृत्तितया तत्र व्यभिचाराभावात्। न चोक्तरूपाव्यवहितोत्तरत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयापत्तिः, सम्बन्धतावच्छेदकगौरवञ्चेति पृथक्सम्बन्धत्वमेवोचितमिति वाच्यम्, इष्टत्वात्। एवञ्च स्वाधिकरणसमयध्वंसोत्पत्त्यधिकरणत्व-स्ववृत्तिप्रागभावप्रतियोगित्व-स्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वमेव धूमलिङ्गकत्वं पर्यवसितमित्याहुः।

अपरे त्वव्यवहितत्वादित्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वमेव धूमादिलिङ्गकत्वम्; परन्त्वव्यवहितत्वं न स्वाधिकरणसमयेत्यादिरूपं तस्योत्पत्तिघटितत्वेन गुरुत्वात्; किन्तु स्ववृत्तिप्रागभावप्रतियोगित्वसम्बन्धावच्छिन्नस्वनाशत्वावच्छिन्न-

प्रतियोगिताकाभाववत्त्वम्। प्रथमं स्वपदं धूमादिपरामर्शनाशपरम्। द्वितीयं स्वपदं धूमादिपरामर्शपरम्। धूमादिपरामर्शनाशोत्तरोत्पन्नान्यलिङ्गकानुमितौ च स्ववृत्तिप्रागभावप्रतियोगित्वसम्बन्धेन धूमादिपरामर्शस्य नाशत्वेन नोक्तरूपाव्यवहितत्वमतो न तत्र व्यभिचारः। धूमपरामर्शनाशान्यलिङ्गकानुमितिनाशोभयत्वावच्छिन्नधूमपरामर्शनाशवृत्तिप्रतियोगिताकाभावमादायोक्तानुमितौ व्यभिचारतादवस्थ्यमतः स्वनाशवृत्तिप्रतियोगिताकेत्यपहाय स्वनाशत्वावच्छिन्नप्रतियोगिताकेत्यभिहितम्। न च तथाप्यन्यलिङ्गकानुमितिद्वितीयक्षणवृत्तित्वविशिष्टधूमपरामर्शनाशत्वावच्छिन्नप्रतियोगिताकाभावमादायान्यलिङ्गकानुमितौ व्यभिचारो दुर्वार इति वाच्यम्, स्वनाशत्वनिष्ठावच्छेदकत्वस्य निरवच्छिन्नत्व(त्व ?)स्य विवक्षितत्वाद् धूमपरामर्शनाशत्वनिष्ठस्योक्ताभावीयप्रतियोगितावच्छेदकत्वस्य चान्यलिङ्गकानुमित्यधिकरणक्षणवृत्तित्वाद्यवच्छिन्नतयाऽदोषात्। न च तत्र प्रागभावघटितस्याव्यवहितत्वस्योत्तरत्वस्य[1] च सम्बन्धत्वं न सम्भवति, प्रागभावे मानाभावात्। न च घटादिरूपकार्यानुत्पाददशायां घटो नास्तीत्यादिप्रतीत्या तत्सिद्धिरिति वाच्यम्, तस्या[2] अत्यन्ताभावेनैवोपपत्तेः। न च घटो भविष्यतीति प्रतीत्या तत्सिद्धिर्भविष्यत्वस्य वर्तमानप्रागभावप्रतियोगित्वरूपत्वादिति वाच्यम्, वर्तमानकालोत्तरकालोत्पत्तिकत्वरूपभविष्यत्वविषयकत्वेनैव तदुपपत्तेः।

यत्तु सहस्रतन्तुकपटादिस्थले प्रागभावस्वीकार आवश्यकस्तत्पटासमवाई(यि)तन्त्वन्तरेषु पटोत्पत्त्यापत्तिरूपदैशिकातिप्रसङ्गवारणाय समवायेन तत्पटं प्रति विशेषणताविशेषेण तत्पटप्रागभावस्य हेतुत्वात्[3]। न च तत्तत्तन्तुसंयोगानामेव तत्तद्व्यक्तित्वेन तत्तत्पटं प्रति हेतुत्वान्नोक्तापत्तिरिति वाच्यम्, समवायेन तत्तत्तन्तुसंयोगानधिकरणतत्पटसमवायितन्त्वन्तरेष्वपि तत्पटोत्पत्त्या व्यभिचारेण तेषां समवायसम्बन्धेन हेतुत्वासम्भवेन कालिकादिसम्बन्धेनैव हेतुत्वस्य वाच्यतया तेनोक्तापत्तिवारणासम्भवात्। न च तत्पटसमवायितन्तुमात्रवृत्त्यन्यतमत्वघटितेन स्वसमानाधिकरणान्यतमत्वविशेषसम्बन्धेन तेषां हेतुत्वकल्पनान्नोक्तापत्तिरिति वाच्यम्, तथापि बहुविधतत्तत्तन्तुसंयोगानां तत्तद्व्यक्तित्वेन बहुविधहेतुताम(मु)पेक्ष्य तत्पटप्रागभावस्यैक(स्य)हेतुत्वे लाघवेन तस्यैवोचितत्वात्। अथ तत्पटप्रागभावहेतुत्वेऽपि तत्पटं प्रति चरमतन्तुसंयोगस्य हेतुत्वमावश्यकम्। अन्यथा तत्पटप्रागभावाधिकरणेषु तत्पटसमवायितन्तुष्वेव केषुचित्तन्तुसंयोगेषूत्पन्नेषु केषुचिच्चागतेषु तत्पटोत्पत्त्यापत्तेः। एवञ्च कालिकातिप्रसङ्गवारणायावश्यकल्पनीयेन चरमतन्तुसंयोगहेतुत्वेनैव तत्पटासमवायितन्त्वन्तरेषु तत्पटोत्पत्त्यापत्तिरूपदैशिकातिप्रसङ्गस्यापि वारणसम्भवात् प्रागभावहेतुत्व-

---

१. कालिकसम्बन्धेन स्ववृत्तिप्रागभावप्रतियोगित्वरूपस्य पूर्वोक्तस्य।

२. तस्याः–घटादिरूपकार्यानुत्पाददशायां घटो नास्तीति प्रतीतेः।

३. हेतुत्वात्–हेतुत्वाङ्गीकारात्।

मनर्थकमिति चेत्, न, तत्पटं प्रति चरमतन्तुसंयोगस्य समवायेन हेतुत्वे तत्पटसमवायिषु सर्वेषु तन्तुषु तदभावेन व्यभिचारप्रसङ्गात्। कालिकसम्बन्धेन हेतुत्वस्यैव वाच्यतया तेन दैशिकातिप्रसङ्गवारणासम्भवात् तत्पटप्रागभावहेतुत्वस्यावश्यकत्वात्। एवमन्यत्रापीति, तन्न, तत्पटजनकेषु सकलतत्तन्तुसंयोगेषु तत्पटजनकतावच्छेदकतया वैजात्यमपेत्य तत्पटं प्रति समवायसम्बन्धेन विजातीयसंयोगत्वेनैकहेतुत्वकल्पनयैव दैशिकातिप्रसङ्ग-वारणासम्भवेन तत्पटप्रागभावहेतुत्वस्य व्यर्थत्वात्।

अथ तत्पटजनकसंयोगेषु जनकतावच्छेदकतया वैजात्यकल्पनमसम्भवि, क्रियादिजन्यतावच्छेदकतया सिद्धेन संयोगनिष्ठवैजात्येन साङ्कर्यात्। कथं तदिति चेत्? तत्पटाजनकक्रियाजन्यसंयोगे तत्पटजनकसंयोगजन्यसंयोगे च परस्परव्यभिचारेग वर्तमानयोर्वैजात्ययोस्तत्पटजनकक्रियाजन्यसंयोगे सामानाधिकरण्यात्। न च क्रिया-जन्यतावच्छेदकसंयोगनिष्ठवैजात्यव्याप्यविरुद्धभेदेन तत्पटजनकतावच्छेदकवैजात्यस्य नानात्वान्न साङ्कर्यमिति वाच्यम्, तथा सति परस्परव्यभिचारेण तेन रूपेण कारणत्वा-नुपपत्त्या कार्यकारणभावद्वयापत्त्या[१] च तत्पटप्रागभावस्यैकविधहेतुत्वस्यैवोचितत्वादिति चेत्, तथापिकालिकातिप्रसङ्गवारणायावश्यकल्पनीयहेतुताकस्य चरमतन्तुसंयोगस्य स्वसमानाधिकरणान्यतमत्वविशेषसम्बन्धेनैकविधहेतुत्वकल्पनेनैव द्वयोरपि कालिक-दैशिकातिप्रसङ्गयोर्वारणसम्भवात् तत्पटप्रागभावहेतुत्वकल्पनं व्यर्थमेव।

[२]किञ्च, कार्यतावच्छेदकभेदेन कारणतावच्छेदकभेदेन च कारणत्वस्य भेदा-च्चरमतन्तुसंयोगस्य तत्पटत्वावच्छिन्नकारणतास्थले कार्याधिकरणयत्किञ्चिद्व्यक्ति-निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपव्यापकत्वमेव कारणताघटकम्, न तु यावद्व्यक्तिगर्भं गौरवात्। एवञ्च तत्पटं प्रति चरमतन्तुसंयोगस्य समवायसम्बन्धेन हेतुत्वस्य सम्भवात् तेनैव द्विविधातिप्रसङ्गवारणसम्भवे प्रागभावहेतुत्वमनर्थकमेव। न च चरमत्वस्य दुर्वचत्वाच्चरमतन्तुसंयोगत्वेन हेतुत्वस्यासम्भव इति वाच्यम्, तत्तद्व्य-क्तित्वेनैव चरमतन्तुसंयोगस्य हेतुत्वात्[३]। अपि चोक्तयुक्त्या सावयवपटादिप्रागभाव-सिद्धावप्यनुमितिप्रागभावासिद्ध्या न प्रकृतनिर्वाहः, अनुमितिप्रागभावसिद्धाविवाव्यव-हितत्वादिसम्बन्धेन धूमादिपरामर्शविशिष्टत्वस्य कार्यतावच्छेदकतानिर्वाहात्।

एतेनैकक्षणोत्पन्नानां समनियतरूपरसादीनां वैलक्षण्यानुपपत्त्या प्रागभावसिद्धिः। अन्यथा कारणवैलक्षण्यस्यैव कार्यवैलक्षण्याधायकतया तेषां चाविलक्षणघटादिरूपकारण-जन्यतया वैलक्षण्यानुपपत्तेः। न च तत्रासमवाइ(यि)कारणस्यावयवगतरूपरसादेर्वैलक्ष-

---

१. ले० टि० अन्यतमत्वसम्बन्धेन कारणत्वे परस्परव्यभिचारादाह।

२. ले० टि० अन्यतमत्वेन सम्बन्धस्याप्रामाणिकत्वात्कालिकसम्बन्धेन हेतुत्वस्य वाच्यतया दैशिकातिप्रसङ्गवारणाय प्रागभावहेतुत्वमावश्यकमत आह—किञ्चेति।

३. ले० टि० कारणत्वस्य पदार्थान्तरत्वेन नानात्वादाह—अपि चेति।

ण्यादेव कार्यवैलक्षण्यमिति वाच्यम्, तावता कारणगुणपूर्वकाणामपाकजरूपरसादीनां वैलक्षण्योपपादनेऽपि पाकजरूपरसादीनामविलक्षणपाकासमवायिकारणकत्वेन वैलक्षण्यानुपपत्तेरपरिहारात्। प्रागभावाङ्गीकारे तु प्रतियोगिभेदेन तद्भेदस्य धर्मिग्राहकमानसिद्धतया निमित्तकारणरूपरसादिप्रागभाववैलक्षण्येन रूपरसादीनां वैलक्षण्योपपत्तिरित्यपि परास्तम्, तावता रूपरसादिप्रागभावसिद्धावप्यनुमितिप्रागभाव(वा)सिद्धेरिति चेत्, मैवम्, अनुमितिप्रागभावानङ्गीकारेऽनुमितिसामग्रीकाले भिन्नविषयकप्रत्यक्षादीनामुत्पत्तिवारणाय भिन्नविषयकप्रत्यक्षादौ सिद्धयभावादिसहकृतपरामर्शरूपगुरुतरानुमितिसामग्र्या[1] अनन्तविषयभेदेन प्रतिबन्धकत्वकल्पने गौरवम्। अनुमितिप्रागभावाङ्गीकारे तूक्तापत्तिवारणायानुमित्यन्यज्ञानमात्रे स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिविशिष्टस्यानुमितिप्रागभावमात्रस्यैव प्रतिबन्धकत्वमेकं कल्प्यते, न त्वनन्तविषयभेदेन प्रत्यक्षादिज्ञानभेदेन[2]चोक्तानुमितिसामग्र्याः प्रतिबन्धकत्वमिति लाघवमिति युक्त्याऽनुमितिप्रागभावसिद्धेः। अनुमितिसामग्रीशून्यकालेऽविभाव्यानुमितिप्रागभावरूपप्रतिबन्धकसत्त्वेन भिन्नविषयकप्रत्यक्षाद्यनुपपत्तिरतोऽनुमितिप्रागभावे स्ववृत्तिप्रतियोगिताकत्वसम्बन्धेन वृत्तिविशिष्टत्वनिवेशनम्। वृत्तित्वञ्च कालिकसम्बन्धेन। भाव्यनुमितिप्रागभावश्च न स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिविशिष्टः, कृतेर्द्विक्षणमात्रस्थायितया[3]तत्प्रतियोगिभावानुमितेस्तत्कालीनकृतिवृत्तित्वाभावेन तस्य तत्कालीनकृतिवृत्तिप्रतियोगिकत्वाभावादतो नानुमितिसामग्रीशून्यकाले भिन्नविषयकप्रत्यक्षाद्यनुपपत्तिः। अनुमितिसामग्रीकालीनस्तदव्यवहितोत्तरक्षणोत्पत्तिकानुमितिप्रागभावस्तु स्ववृत्तिप्रतियोगिकत्वसम्बन्धेन कृतिविशिष्ट एव तत्कालीनकृतेस्तदनुमित्युत्पत्तिक्षणे सत्त्वेन तत्प्रतियोग्यनुमितेस्तत्कालीनकृतिवृत्तित्वेन[4]तस्य तत्कालीनकृतिवृत्तिप्रतियोगिकत्वादतोऽनुमितिसामग्रीकाले न भिन्नविषयकप्रत्यक्षाद्युपपत्तिः। न च सर्वदा कृतिसत्त्वे मानाभावेन कृतिशून्यकालीनानुमितिसामग्रीदशायां भिन्नविषयकप्रत्यक्षाद्यापत्तिः, तदाऽनुमितिप्रागभावस्योक्तसम्बन्धेन कृतिविशिष्टत्वाभावादिति वाच्यम्, अन्ततो जीवनयोनियत्नस्यैव सर्वदा सत्त्वेनानुमितिप्रागभावस्योक्तसम्बन्धेन कृतिविशिष्टत्वसम्भवात्।

यत्तु भिन्नविषयकप्रत्यक्षादावुक्तानुमितिसामग्र्याः प्रतिबन्धकत्वमावश्यकम्। अन्यथा स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिविशिष्टस्यानुमितिप्रागभावस्य प्रतिबन्धकत्वे प्रत्यक्षसामग्रीकाले समानविषयकानुमितिवारणाय तुल्ययुक्त्या समानविषयकानुमितौ

---

१. अनन्तविषयभेदः प्रतिबन्धकत्वकल्पनागौरवे हेतुः। तथा चानन्तविषयभेदेन भिन्नस्य प्रतिबन्धकत्वस्य कल्पने गौरवमित्याशयः।

२. भेदेनेति–भिन्नाया इति शेषः। उक्तेति—सिद्धयभावसहकृतपरामर्शरूपसामग्र्याः।

३. तत्प्रतियोगी–भाव्यनुमितिप्रागभावप्रतियोगी।

४. तस्य—तादृशप्रागभावस्य।

स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिनिष्ठस्य प्रत्यक्षप्रागभावमात्रस्यैव प्रतिबन्धकत्वस्य वक्तव्यतया(यत्र) वह्न्यनुमितिसामाग्री, वह्निप्रत्यक्षसामग्रि(ग्री) घटानुमितिसामग्री, घटप्रत्यक्षसामग्री चेति सामग्रीचतुष्टयसंवलनदशायामनुमितिप्रत्यक्षयोरेव युगपदुत्पत्तिप्रसङ्गः, तत्रानुमितेः प्रत्यक्षस्य चानुत्पादेन प्रतिबन्धकीभूतस्योक्तसम्बन्धेन कृतिविशिष्टानुमितिप्रागभावस्य चासत्त्वादिति चेत्, न, उपदर्शितसामग्रीचतुष्टयसंवलनदशायां वह्न्यादिप्रत्यक्षोत्पादाभ्युपगमेन प्रतिबन्धकीभूतस्योक्तसम्बन्धेन कृतिविशिष्टप्रत्यक्षप्रागभावस्य सत्त्वाद्वह्न्याद्यनुमित्युत्पादासम्भवेनानुमितिप्रत्यक्षयोर्यौगपद्यप्रसङ्गाभावात्। न च तदानीं वह्न्यादिप्रत्यक्षमुपेयते, वह्न्याद्यनुमितिर्वेत्यत्र विनिगमकाभावाद्वह्न्यादिप्रत्यक्षोत्पादाभ्युपगमो न सम्भवतीति वाच्यम्, समानविषये प्रत्यक्षसामग्र्याः बलवत्त्वस्यैव विनिगमकत्वात्। तस्मादुपदर्शितयुक्त्याऽनुमितिप्रागभावसिद्ध्या प्रागभावघटिताव्यवहितत्वादित्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वस्य कार्यतावच्छेदकत्वे न कोऽपि दोष इत्याहुः।

अन्ये त्वव्यवहित्व(त्वं)स्वाधिकरणकृतिमत्त्वम्। उत्तरत्वन्तु पूर्वनिरुक्तमेवेति वदन्ति। तेषाञ्चायमाशयः—अव्यवहितत्वं नोक्तरूपम्; किन्तु स्वाधिकरणकृतिमत्त्वमेव, प्रागभावाद्यघटितत्वेन लघुत्वात्। स्वाधिकरणत्वं कृतिमत्त्वञ्च कालिकसम्बन्धेन। धूमपरामर्शचतुर्थक्षणोत्पन्नान्यलिङ्गकानुमितौ न धूमपरामर्शाधिकरणकृतिमत्त्वं कृतेः क्षणद्वयमात्रावस्थायित्वादतो न व्यभिचारः। न च स्वाधिकरणज्ञानत्वमेवाव्यवहितत्वमस्त्विति वाच्यम्, अपेक्षाबुद्ध्या क्षणत्रयस्थायित्वेन धूमपरामर्शद्वितीयक्षणोत्पन्नापेक्षाबुद्ध्यात्मकं यध्धु(द्धू)मपरामर्शाधिकरणज्ञानं तद्वत्त्वस्य धूमपरामर्शचतुर्थक्षणोत्पन्नान्यलिङ्गकानुमितौ सत्त्वेन तत्र व्यभिचारापत्तेः। न च तथापीच्छानिवेशमादाय विनिगमनाविरह इति वाच्यम्, सर्वदेच्छोत्पत्तौ मानाभावेन यादृशपरामर्शकाल इच्छाया नोत्पत्तिस्तत्परामर्शजन्यानुमितेरसङ्ग्रहापत्तेः। अत एव सुखादिनिवेशमादायापि न विनिगमनाविरहः, सर्वदा सुखाद्युत्पत्तौ मानाभावात्। न च सर्वदा कृतेरुत्पत्तावपि मानाभाव इति वाच्यम्, अन्ततः सार्वदिकजीवनयोनिकृतेरेव परामर्ष(र्श)काल उत्पादसम्भवात्। ननु जीवनयोनियत्ने मानाभावः। न च भस्त्राद्यन्तर्नयनविशेषजनकप्रमाणक्रियायत्नजन्या[1] वायुक्रियात्वाद्[2] भस्त्रोदीरितवायुक्रियावदित्यनुमानमेव तत्र मानमिति वाच्यम्, बाह्यवायुक्रियायां व्यभिचारेण तादृशानुमानस्य दुष्टत्वात्।

---

१. ले० टि० यत्ननिष्ठकारणतानिरूपितकार्यताशालि[नो]। कारणता च कार्यत्वावच्छी-(च्छि)न्ना ग्राह्या; [तेन] वायुक्रियायामीश्वरीयकृतिजन्यत्वा(त्व)मादाय व्यभिचारवारणम्।

२. भस्त्रा—अग्निदीपकचर्मनिर्मितयन्त्रविशेषः।

अथ ज्ञानादीनां क्षणिकतावारणाय विभुसमवेतयोग्यविशेषगुणनाशं प्रति स्वोत्तरोत्पन्नस्वसमानाधिकरणविशेषगुणस्य कारणत्वमवश्यं वाच्यम्। तथा च सुषुप्तिपूर्वकालीनज्ञाननाशार्थं जीवनयोनियत्नस्वीकारो(र)आवश्यकस्तदानीमात्मसमवेतविशेषगुणान्तराभावात्। न च स्वत्वस्याननुगततयोक्तरीत्या कारणत्वासम्भवेन विशिष्य कारणताविश्रामे यदुत्तरं यस्य नाशोऽनुभवसिद्धस्तस्यैव तन्नाशे कारणत्वं कल्प्यत इति न जीवनयोनियत्नसिद्धिरिति वाच्यम्, प्रतियोगितासम्बन्धेन विभुसमवेतयोग्यविशेषगुणनाशत्वावच्छिन्नं प्रति स्वपूर्ववृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन विशेषगुणत्वेन कारणत्वेऽननुगमाभावात्। अत्र स्मृत्यादिनाश्यसंस्कारस्य स्वर्गादिनाश्यादृष्टस्य चासङ्ग्रहाय योग्येति। न च योग्यत्वस्य लौकिकप्रत्यक्षविषयत्वस्य निर्विकल्पकेऽभावात्तस्य तृतीयक्षणे नाशो न स्यादिति वाच्यम्, योगत्वस्य प्रत्यक्षविषयजातिमत्वरूपस्यात्रानिवेशेन ज्ञानत्वादिकमादाय निर्विकल्पकसाधारण्यात्। नन्वेवं संस्कारत्वजातिमादाय संस्कारस्यापि योगत्वात्तृतीयक्षणे नाशः स्यादिति वाच्यम्, संस्कारत्वजातौ मानाभावात्[1]। भावे वा वेगावृत्तित्वेन जातेर्विशेषणीयत्वादिति चेत्, न, मुक्त्यव्यवहितपूर्ववर्त्यात्मसमवेतयोग्यविशेषगुणनाशे व्यभिचारेणोक्तानुगतकार्यकारणभावासम्भवेनागत्या विशिष्यैव नाश्यनाशकभावस्य वाच्यतया सुषुप्तिपूर्वकालीनज्ञाननाशानुरोधेन जीवनयोनियत्नासिद्धेः। तदनुरोधेन सुषुप्तिपूर्वकालीनस्य कस्यचिदात्मसमवेतविशेषगुणस्य सिद्धावपि तस्येच्छात्वेनाप्युपपत्त्या यत्नत्वासिद्धेश्च। कादाचित्कस्य सुषुप्तिकालीनस्य सिद्धावपि सार्वदिकस्य जीवनयोन्याख्ययत्नस्यासिद्धया स्वाधिकरणकृतिमत्त्वादिघटितत्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वस्य कार्यतावच्छेदकत्वासम्भवाच्चेति चेत्, मैवम्, जीवनयोनियत्नानङ्गीकारे विरुद्धजातीयज्ञानद्वयसामग्रीदशायां तद्योगपद्यापत्तिवारणायैकविधज्ञानं प्रति गुरुभूताया अन्यविधज्ञानसामग्र्या यथानुभवमनन्तविषयभेदेनानन्तप्रतिबन्धकत्वकल्पने गौरवम्, तदङ्गीकारे त्वेकविधज्ञानं प्रति स्ववृत्तिप्रतियोगिकत्वसम्बन्धेन कृतिविशिष्टस्यान्यविधज्ञानप्रागभावस्यैवोपदर्शितरीत्या प्रतिबन्धकत्वे लाघवमिति युक्त्या सार्वदिकजीवनयोनियत्नसिद्धेः। अनया युक्त्या चानुमितिप्रागभावस्यापि सिद्धिः। तेन तद्घटितस्य न कार्यतावच्छेदकताघटकसम्बन्धत्वानुपपत्तिः। न चोक्तसम्बन्धेन कृतिविशिष्टत्वमनुमित्याद्यनुत्पादाधीनमनुमित्याद्यनुत्पादश्चोक्तसम्बन्धेन कृतिविशिष्टत्वाधीन [2]इत्यन्योन्याश्रयान्नोक्तयुक्त्या जीवनयोनियत्नप्रागभावयोः सिद्धिरिति वाच्यम्, उत्पत्तिज्ञप्त्योरेवान्योन्याश्रयस्य दोषतयोक्तरीत्याऽन्योन्याश्रयस्य कार्यकारणभावाविघटकतयाऽदोषत्वात्। अत एव गुरुत्वाद्यतीन्द्रियलौकिक-

---

१. संस्कारत्वस्य वेग-भावना-स्थितिस्थापकेषु समवेतत्वाज्जातित्वमस्त्येवेत्यत आह—भावेति। मानसत्त्व इत्यर्थः।

२. स्वज्ञप्त्यधीनज्ञप्त्यधीनज्ञप्तिकत्वमन्योन्याश्रयः।

प्रत्यक्षवारणाय लौकिकप्रत्यक्षे विषयत्वेन हेतुत्वमिति सिद्धान्तः सङ्गच्छते। अन्यथा विषयत्वस्य लौकिकविषयताशालित्वरूपस्य लौकिकप्रत्यक्षोत्पादाधीनतया लौकिकप्रत्यक्षोत्पादस्य च लौकिकविषयताशालित्वाद्यधीनतयाऽन्योन्याश्रयेण तादृशहेतुतोच्छेदापत्तेः।

किञ्च, प्राणपञ्चकसञ्चारान्यथानुपपत्त्याऽपि जीवनयोनियत्नसिद्धिः। तथा हि—पूरकरेचकादिप्राणायामस्थले प्राणक्रियाविशेषस्य यत्नविशेषजन्यत्वदर्शनाद् धावनाद्यनुकूलयत्नविशेषवतः प्राणक्रियाविशेषरूपश्वासोत्कर्षस्य दर्शनाच्च प्राणक्रियात्वावच्छिन्नं प्रति यत्नत्वेन कारणत्वमवश्यं वाच्यम्। तथा च सर्वदा प्राणपञ्चकसञ्चारात्मकप्राणक्रियाविशेषकारणत्वेन सार्वदिकजीवनयोनियत्नाभ्युपगम आवश्यकः। अत एव जीवनं प्राणपञ्चकसञ्चारात्मकः प्राणक्रियाविशेषस्तस्य योनिः कारणमित्यर्थानुसारेण तस्य जीवनयोनिरिति व्यवहारः सर्वेषामपि[1] सङ्गच्छते। न च सर्वदा प्राणायामकालीनप्राणक्रियाविशेषस्य श्वासोत्कर्षस्य च वारणाय तत्तत्क्रियाविशेषे तत्तद्यत्नविशेषस्य हेतुताया अवश्यं वाच्यतया प्राणक्रियात्वावच्छिन्ने यत्नत्वेन सामान्यहेतुत्वे मानाभावः। यद्विशेषयोरित्यादिनियमस्य चाप्रयोजकत्वादिति वाच्यम्, कार्याभावाधिकरणत्वे कारणाभावाधिकरणत्वस्य प्रयोजकतया यत्नसामान्यशून्यकालवर्ति प्राणक्रियात्वावच्छिन्नाभावाधिकरणत्वे तत्तद्यत्नविशेषाभावकूटाधिकरणत्वस्य प्रयोजकत्वकल्पने गौरवाल्लाघवेन यत्नत्वावच्छिन्नाभावाधिकरणत्वस्य प्रयोजकत्वमिति युक्त्या सामान्यहेतुतासिद्धेः। एवं जीवनयोनियत्नसत्त्वे चैत्रः श्वसितीत्यादिप्रयोगोऽपि लक्षणां विनैवोपपद्यते, आख्यातस्य यत्नवाचकत्वेन प्राणक्रियारूपश्वासानुकूलस्य जीवनयोनियत्नस्य सर्वदा चैत्रे सत्त्वात्। अन्यथा सर्वदा श्वासानुकूलयत्नान्तराभावेन तादृशप्रयोगानुपपत्त्याऽऽख्यातस्य श्वाश्रयसंयोगित्वसम्बन्धावच्छिन्नाश्रयत्वे लक्षणामुपगम्यैव तादृशप्रयोगस्योपपादने गौरवापत्तेः। अत एव विधिवादे जीवनयोनियत्नसाध्ये प्राणपञ्चकसंचारादा(?)वृत्त्यापत्तिवारणाय चिकीर्षाधीनकृतिसाध्यताज्ञानस्य प्रवृत्तिं प्रति हेतुत्वं चिन्तामणिकारोक्तं सङ्गच्छते। अन्यथा तदसङ्गतमेव स्यात्।

एतेन स्वाधिकरणकृतिमत्त्वस्य न धूमादिपरामर्शनिष्ठकार्यतावच्छेदकताघटकसम्बन्धत्वं सम्भवति, जीवनयोनिसत्त्वे मानाभावात्। न च प्राणपञ्चकसञ्चारान्य-

---

१. अत्रापिकारो यथाश्रुतापेक्षया व्यवहार इत्यनेन सह युक्तः।

थानुपपत्त्या तत्सिद्धिरिति वाच्यम्, अदृष्टवदात्मसंयोगादेव तदुपपत्तेः । न च जीवनयोनियत्नानङ्गीकार आत्मसमवेतत्वावच्छिन्नं प्रत्यात्मत्वेन हेतुतायां सर्वदात्मरूपकारणसत्त्वाद् आत्मसमवेतापत्तिवारणायात्मरूपकारणेन फलजनन इतरकारणस्य सहकारित्वं कल्पनीयमिति गौरवम् । तदङ्गीकारे तु सर्वदाऽऽत्मसमवेतस्य तस्यैवोत्पत्त्याऽऽत्मसमवेतापत्तौ विशिष्टापत्त्या नेतरकारणस्य सहकारित्वं कल्प्यत इति लाघवात् तत्सिद्धिरिति वाच्यम्, तदनङ्गीकारेऽपि सर्वदाऽऽत्मसमवेतस्य सततपरिस्पन्दमानपवनात्मसंयोगतादृशपरमाण्वात्मसंयोगादेरेवोत्पत्त्येतरकारणस्य सहकारित्वाकल्पनेन तदङ्गीकारस्य व्यर्थत्वादिति केषाञ्चित्प्रलपितमपास्तम्, उक्तयुक्तिसिद्धस्य जीवनयोनियत्नस्य गीर्वाणगुरुणाप्यपलपितुमशक्यत्वात् ।

एवं जीवनयोनियत्नानुमितिप्रागभावयोः सिद्धौ युक्त्यन्तरमस्ति । तथा हि—पर्वतो वह्निमानित्यादिसिद्धिदशायां पर्वतो वह्निमानित्याद्यनुमितेरनुदयात्पक्षताया अनुमितिहेतुत्वेन पर्वताद्युद्देश्यकवह्न्यादिविधेयकानुमितिं प्रति पर्वतादिविशेष्यकवह्न्यादिप्रकारकनिर्णयाभावस्य हेतुत्वं सर्वसिद्धम् । तत्रानुमित्सासत्त्वे सिद्धिसत्त्वेऽप्यनुमित्युदयादनुमिच्छो(त्सो)त्तेजिका वाच्या । एवञ्च[1] तयोरनङ्गीकारे पर्वतोद्देश्यकवह्निविधेयकानुमितिर्जायतामित्याद्यनुगतेच्छानां पर्वतोद्देश्यकवह्निविधेयकानुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणोत्तेजकत्वसम्भवेऽप्यनुमितिर्जायतामित्याद्यनन्तानुगतेच्छानामनुगतरूपेणोत्तेजकत्वासम्भवादननुगततत्तद्व्यक्तित्वेनोत्तेजकत्वकल्पने[2] गौरवम् । न च [3]तासामनुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणैवोत्तेजकत्वं सम्भवतीति वाच्यम्, तथा सत्यनुमितिर्जायतामितीच्छासत्त्वे, पर्वतो वह्निमानिति सिद्धिसत्त्वे, घटानुमितिसामग्रीसत्त्वे पर्वतो वह्निमानित्यनुमित्यापत्तेः[4] । न चेष्टापत्तिः, तदानीं तादृशसिद्ध्यप्रतिबध्यीभूतघटानुमित्यु-

---

१. तयोः—प्रागभावजीवनयत्नयोः ।

२. पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितिविषयकेच्छात्वेनोत्तेजकत्वकल्पनम् । द्रव्ये वह्न्यनुमितिर्जायताम्, पर्वते द्रव्यानुमितिर्जायतामित्यादीच्छावारणायोद्देश्यताविधेयतयोः पर्वतत्वावच्छिन्नत्व-वह्नित्वावच्छिन्नत्वोपादानम् ।

३. तासाम्—इच्छानाम् ।

४. तत्र घटानुमितेरेव स्वीकारात् ।

त्पत्त्याऽपीच्छाविषयसिद्धि[1]सत्त्वेनेष्टापत्तेरसम्भवात्[2]। तयोरङ्गीकारे तु तासां स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिविशिष्टपर्वतत्वा[द्य]वच्छिन्नोद्देश्यतानिरूपितवह्नित्वाद्यवच्छिन्नविधेयताशून्यानुमितिप्रागभावविरहविशिष्टानुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेणैवोत्तेजकत्वकल्पने लाघवम्। न चोक्तदोष इदानीं घटाद्यनुमितेरेवोदयेन निरुक्तघटानुमितेः स्वाव्यवहितपूर्वोत्पन्नजीवनयोनियत्ने कालिकविशेषणतासम्बन्धेन वर्तमानतया तत्प्रागभावस्य स्ववृत्तिप्रतियोगित्वसम्बन्धेन कृतिविशिष्टतया कृतिविशिष्टतथाविधप्रागभावसत्त्वेन तद्विरहविशिष्टानुमितित्वप्रकारकेच्छाया असत्त्वेन तादृशेच्छाविरहविशिष्टसिद्धिरूपप्रतिबन्धकसत्त्वात्। न चोक्तरूपेण तत्रेच्छाया उत्तेजकत्वेऽन्योन्याश्रयः। उपदर्शितस्थले च पर्वतो वह्निमानित्यनुत्पादप्रयुक्ततथाविधविशिष्टप्रागभावसत्त्वं तथाविधविशिष्टप्रागभावप्रयुक्तश्चानुमित्यनुत्पादः, तदैव तदानीं तत्प्रतिबन्धकीभूततथाविधप्रागभावविशिष्टेच्छाविरहविशिष्टसिद्धिरूपप्रतिबन्धकसमवधानसम्भवादिति वाच्यम्, पूर्वोपदर्शितरीत्योत्पत्तिज्ञप्त्योरेवान्योन्याश्रयस्य दोषतयैतादृशान्योन्याश्रयस्यादोषात्। नन्विदं तदैव सम्भवति यदि(दा) सिद्ध्यभावहेतुत्वे प्रमाणमस्ति। तदेव[तु] नु सिद्धिकालेऽनुमित्यङ्गीकारे क्षतिविरहादिति चेत्, अत्राचार्यमतानुयायिनः —अनुमितौ लिङ्गोपहित-

१. अत्रेच्छाविषयत्वं सिद्धौ परम्परया न तु साक्षादिच्छाया अनुमितिविषयकत्वात्। तथा च तादृशेच्छाविषयविषयकसिद्धिसत्त्वेनेति यथाश्रुताभिप्रायः। इच्छाविषयोऽनुमितिस्तद्विषयो वह्निमान् पर्वतस्तद्विषयिणी च सिद्धिः। एवञ्चानुमितिर्जायतामितीच्छाया घटानुमित्युत्पत्त्या चरितार्थतया न तया वह्न्यनुमित्युत्पादसम्भवः। न च तत्र वह्न्यनुमितिरेवास्तु न घटानुमितिरिति वाच्यम्, पर्वतो वह्निमानिति सिद्धेर्घटानुमितिं प्रत्यविरोधितया घटानुमितिसामग्रीसत्त्वे घटानुमितिर्मा स्त्विति कथनं कस्य स्यादिति न जानीमहे। अनुमितौ च कस्यामप्युत्पन्नायामनुमितीच्छाया विश्रान्ततया न तया पुनरनुमित्यन्तरोत्पत्तिस्तदर्थमिच्छान्तरस्यापेक्षितत्वात्। न चानुमितिद्वयं युगपदुत्पद्यतामिति वाच्यम्, ज्ञानयौगपद्यनिषेधात्। तथा च पर्वतो वह्निमान् घटवांश्चेति समूहालम्बनानुमितिस्तत्रोत्पद्यत इति वाच्यम्, तत्र घटवत्तांश एवानुमितित्वाङ्गीकारात्। अत एव दीधितिकारेण पर्वतोद्देश्यकवह्निविधेयकानुमितीच्छाया एवोत्तेजकत्वमङ्गीकृतं पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नविषयताशालीच्छात्वेनोत्तेजकत्वमिति व्याख्यातं जगदीशेन (जागदीशी-पक्षता, पृ० ३७)। तथा चोक्तस्थल इच्छाचतुष्टयसत्त्वदशायां पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नविषयताकेच्छाविरहविशिष्टसिद्धेरेव सत्त्वेन तस्याश्च वह्न्यनुमितिं प्रति प्रतिबन्धकत्वेन न वह्न्यनुमितिः। सामग्रीसत्त्वाच्च घटानुमित्युत्पादः।

२. ले० टि० यादृशानुमितिं विना यदीच्छाविषयसिद्धिर्नास्ति सेच्छा तत्रानुमितावुत्तेजिकेति भावः।

लैङ्गिकभावस्य प्रमाणसिद्धतया सिद्ध्यभाव[स्य]हेतुत्वमावश्यकम्, अन्यथा सकलानुमितीनामेव परामर्शरूपतयाऽ[1]नुमितिकालेऽनुमितिसामग्र्या[2]मियमतः सत्त्वादनुमितिधारापत्तेरिति वदन्ति। तेषामयमाशयः–लिङ्गानुपधानमतेऽन्यलिङ्गकानुमितौ व्यभिचारवारणाय तत्तल्लिङ्ग[क]परामर्शजन्यतावच्छेदककोटौ गुरुतरशरीर[क]तत्तल्लिङ्ग[क]परामर्शाव्यवहितोत्तरत्वनिवेशाद्गौरवम्। लिङ्गोपधानमते तु वह्निव्याप्यधूमपर्वतत्वोभयाद्यवच्छिन्नविशेष्यताकज्ञानत्वस्य लघुशरीर[क]स्य धूमादिपरामर्शजन्यतावच्छेदककोटौ निवेशेनैव व्यभिचारवारणं सम्भवतीत्यव्यवहितोत्तरत्वं न निवेश्यत इति लाघवादनुमितौ लिङ्गोपधानसिद्धिः।

ननु लिङ्गानुपधानमतेऽव्यवहितोत्तरत्वनिवेशे पर्वतो वह्निव्याप्यधूमाभाववान् स्यादित्याद्यापत्तित्वावच्छिन्नं प्रति वह्निव्याप्यधूमवान्पर्वत इत्याद्याकारकापाद्यव्यतिरेकनिर्णयस्य स्वातन्त्र्येण हेतुत्वं न कल्प्यत इति लाघवम्। अव्यवहितोत्तरत्वादिसम्बन्धेन तत्तल्लिङ्गकपरामर्शविशिष्टानुमितिं प्रति तत्तल्लिङ्गकपरामर्शस्य हेतुत्वे कल्पनोयेऽनुमितित्वमनिवेश्य तत्तल्लिङ्[क]परामर्शविशिष्टज्ञानत्वावच्छिन्नं प्रति तत्तल्लिङ्[क]मर्शहेतुत्वकल्पनेनैव निर्वाहात्। लिङ्गोपधापरानमते तु तादृशापत्तिं प्रति तादृशापाद्यव्यतिरेकनिर्णयस्य स्वातन्त्र्येण हेतुत्वकल्पनस्यावश्यकतया गौरवमिति नोक्तयुक्त्या लिङ्गोपधानसिद्धिरिति चेत्, सत्यम्, इदं तदेव शक्यते वक्तुं यदि लिङ्गोपधानमते तादृशापत्तिं प्रति तादृशापाद्यव्यतिरेकनिर्णयस्य स्वातन्त्र्येण हेतुत्वमावश्यकं स्यात्, तदेव न, तन्मतेऽपि क्लृप्तेनैव निर्वाहात्। तथा हि–आपत्तावापाद्यव्यतिरेकस्य धर्मितावच्छेदकतया भानाभ्युपगमेन वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमाभाववान् स्यादित्याकारिकाया एवापत्तेरभ्युपगमात्तस्याश्च लिङ्गोपधानमतेऽप्यापाद्यव्यतिरेकनिर्णयात्मकधूमादिपरामर्शजन्यतावच्छेदकवह्निव्याप्यधूमपर्वतत्वोभयाद्यवच्छिन्नविशेष्यताशालिज्ञानत्वाक्रान्ततया क्लृप्तेनैव निर्वाहात्। न चापाद्यव्यतिरेकस्यापत्तौ धर्मितावच्छेदकतया भानाभ्युपगमे आपाद्यव्यतिरेकमापादयामीत्यनुव्यवसायापत्तिः। आपत्तावापाद्यव्यतिरेकांशे आपत्तित्वानङ्गीकारे च तस्यांशिकत्वापत्त्या सर्वसिद्धमानसत्वव्याप्यजातिरूपत्वासम्भव इति वाच्यम्, लिङ्गानुपधानमतेऽप्यांशिकत्वापत्तिभियाऽनुमितौ पर्वताद्यंशेऽनुमितित्वसत्त्वेन पर्वतादिकमनुमिनोमीत्याकारकानुव्यवसायापत्तेः सम्भवात्। यदि च पर्वताद्यंशेऽनुमितिविषयतासत्वेऽपि विधेयताख्यातिरिक्तविषयताया अभावादेव न पर्वतादिकमनुमिनोमीत्यनुव्यवसायापत्तिरित्युच्यते, तदा ममाप्यापाद्यव्यतिरेकांशे आपत्तिविषयतासत्त्वेऽप्यापाद्यताव्यतिरिक्तविषयताया अभावादेव नापाद्यव्यतिरेकमापादयामीत्यनुव्यवसायापत्तिरिति तुल्यम्।

---

१. आचार्यमते सर्वदैवानुमितेर्लिङ्गविषयकत्वेन साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकत्वात्।

२. सिद्ध्यभावस्याकारणतया तदतिरिक्तपरामर्शादिरूपनिखिलसामग्र्याः।

एतेन लिङ्गमनुमिनोमीत्यनुव्यवसायापत्त्या लिङ्गस्यानुमित्यविषयत्वेन लिङ्गोपधानासम्भव इति प्रयुक्तम्। न च यत्रादावलौकिकापाद्यनिश्चयस्ततः आपाद्यव्याप्यापादकवत्तानिश्चयात्मकापाद्यव्यतिरेकांशे लौकिकापाद्यव्यतिरेकनिश्चयस्ततः आपत्तिस्तत्रापाद्यनिश्चयस्य प्रतिबन्धकस्य सत्त्वेनापाद्यव्यतिरेकस्य धर्मितावच्छेदकतया भानं न सम्भवति, मानसापाद्याभावविशिष्टबुद्धावापाद्यनिश्चयसामान्यस्यैव प्रतिबन्धकत्वादिति वाच्यम्, तत्र क्षणविलम्बेनापाद्यनिश्चयनाशानन्तरमेवापत्तिस्वीकारात्। अत एव यत्रादावलौकिकपक्षे लिङ्गाभावनिश्चयस्ततो लिङ्गांशे लौकिकः परामर्शस्ततोऽनुमितिस्तत्र लिङ्गाभावनिश्चयस्य प्रतिबन्धकस्य सत्त्वेनानुमितौ लिङ्गभानासम्भवेन लिङ्गोपधानासिद्धिः प्रयुक्ता, तत्रापि क्षणविलम्बेन लिङ्गाभावनिश्चयनाशानन्तरमेवानुमितेरङ्गीकारात्। न चैवं रीत्या क्षणविलम्बकल्पनायां मानाभाव इति वाच्यम्, तत्तल्लिङ्गकपरामर्शस्यानन्तलिङ्गभेदेनाव्यवहितोत्तरत्वं निवेश्यानन्तकारणत्वकल्पनापेक्षया लाघवेन क्षणविलम्बकल्पनाया एवोचितत्वात्। एवं क्षणविलम्बकल्पनामङ्गीकृत्य लिङ्गोपधानाङ्गीकारे प्रकारान्तरेणापि लाघवं सम्भवति। तथा हि—लिङ्गानुपधानमते वह्निव्याप्यधूमाभाववान्पर्वत इत्याद्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयघटितानां वह्निव्याप्यधूमाभाववत्पर्वतवानयं देश इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षादि[1]सामग्रीणामिच्छाविशेषविशिष्टानां वह्न्याद्यनुमितौ प्रतिबन्धकताकल्पनाधिक्याद् गौरवम्। लिङ्गोपधानमते तु तादृशसामग्रीघटकस्य तथाविधविशेषणतावच्छेदकादिप्रकारकनिर्णयस्य बाधविधया[2]क्लृप्तप्रतिबन्धकत्वेनैवोपपत्तेस्तदकल्पनाल्लाघवम्। एवं तादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे तादृशेच्छाविरहविशिष्टवह्न्याद्यनुमितिसामग्र्याः प्रतिबन्धकत्वाकल्पनेनापि लाघवम्, लिङ्गोपधानमते तादृशविशेषणतावच्छेदकप्रकारकादिनिर्णयघटितप्रत्यक्षसामग्र्यास्तादृशविशेषणतावच्छेदकप्रकारकनिर्णयाभावादिरूपबाधाभावादिघटितवह्न्यनुमितिसामग्र्याश्च संवलनस्यैवाभावात्। न च लिङ्गानुपधानमतेऽपि शाब्दबोधसाधारणप्रतिबन्धकतया विषयान्तरसाधारणप्रतिबन्धकतया वा[3] निर्वाहान्नोक्तस्थले[4] सामग्रीप्रतिबन्धकताकल्पनाधिक्यमिति वाच्यम्, इच्छाविशेषाणां पृथक् पृथगुत्तेजकत्वानुरोधेनानुमित्यादिभेदेन विषयभेदेन च प्रतिबन्धकताभेदस्यावश्यकत्वात्।

---

१. ले० टि० लौकिकालौकिकभेदेन प्रत्यक्षानुमितिसामग्र्योरेकदोत्पत्तौ बाधकविरहादिति भावः।

२. तदभाववत्तामुद्रया।

३. ले० टि० अनुमित्यन्यज्ञानत्वावच्छिन्नं प्रत्यनुमितिसामग्रीत्वेन प्रतिबन्धकत्वमिति प्रतिबध्यप्रतिबन्धकभावेनैव निर्वाहात्।

४. ले० टि० अव्यवहितपूर्वेच्छादिनोक्तस्थले।

अथैतादृशलाघवानुरोधेन पदार्थान्तरविषयकत्वमप्यनुमितेः स्यादिति चेत्, न, अनुपस्थितपदार्थविषयकत्वस्यानुभवविरोधेनानङ्गीकारात्, लिङ्गस्यानुमितिपूर्वं नियमत उपस्थित्या तद्विषयकत्वेऽनुभवविरोधाभावेन तस्यैवाभ्युपगमात्। नन्वेतादृशयुक्तिभिः लिङ्गोपधानस्य प्रमाणसिद्धत्वेऽपि सिद्ध्यभावस्य हेतुत्वे प्रमाणाभावः। अनुमितिधारापत्तिवारणाय तद्विशेष्यकतत्प्रकारकानुमितिं प्रति तद्विशेष्यकतत्प्रकारानुमितित्वावच्छिन्नाभावत्वेन हेतुत्वस्यैवोचितत्वं न तु प्रत्यक्षसाधारणनिर्णयत्वघटितसिद्धत्वावच्छिन्नाभावत्वेन। तत्र कारणतावच्छेदककोटौ निर्णयत्वनिवेशे गौरवापत्तेरिति चेत्,न, इष्टापत्तेः। तावतापि तत्रैवानुमित्साया उत्तेजकत्वस्यावश्यकतयोक्तरीत्या[१] जीवनयोनियत्नानुमितिप्रागभावयोः सिद्धिसम्भवादिति।

वस्तुतस्तु लिङ्गोपधानानङ्गीकारेऽपि सिद्ध्यभाव[स्य]हेतुत्वमावश्यकम्। तथा हि—आहार्यपरामर्शादनुमितेरनुदयेन परामर्शनिष्ठानुमितिजनकतावच्छेदककोटावनाहार्यत्वमवश्यं निवेश्यम्। तच्च तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वरूपं न त्वनुगतमाहार्यत्वस्यानुगतस्य दुर्वचत्वात्। तथा च सिद्धिकालेऽनुमितिमङ्गीकृत्यानुमितिं प्रति सिद्ध्यभावत्वेनाहेतुत्वे सिद्धिसत्त्व आहार्यपरामर्शादनुमित्यापत्तिवारणायानुमितिं प्रति परामर्शजनकतावच्छेदककोटौ सिद्धिकालीनतत्तदनन्ताहार्यपरामर्शव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटमवश्यं निवेशनीयम्। तथा च तेषां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाहार्यभेदान्तराप्रामाण्यज्ञानाभावादिभिः सह विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकार्यकारणभाववृद्ध्या गौरवं दुष्परिहरमेव। अनुमितिं प्रति सिद्धेः प्रतिबन्धकत्वे तु तदा सि[द्]ध्यभावरूपकारणाभावादनुमित्यनुत्पादे तदापत्तिविरहेण सिद्धिकालीनाहार्यपरामर्शानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदानां परामर्शनिष्ठानुमितिजनकतावच्छेदककोटौ निवेशाभावेन नोपदर्शितगौरवावकाश इति।

किञ्चानुमितिं प्रति सिद्ध्यभावस्य हेतुत्वे सिद्धिकालीनाहार्य-बाध-आहार्य-तदभावव्याप्यवत्ताज्ञानादीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदान् निवेश्य बाधतदभावव्याप्यवत्ताज्ञानादीनामप्यनुमितिप्रतिप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवमक्षुण(ण्ण)मेव। तथाविधसिद्धिप्रतिबन्धकतावादिमतेऽपि सिद्धिकालीनाहार्य-बाधबुद्ध्यादिसत्त्वेऽनुमितेरनुदयेनानुमितिं प्रति बाधाभावादिकारणतायां[२]व्यभिचाराभावात् तत्तदाहार्यव्यक्तिभेदानां

---

१. ले० टि० स्ववृत्तिप्रतियोगिकत्वसम्बन्धेन कृतिविशिष्टपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वाद्यवच्छिन्नविधेयताशून्यानुमितिप्रागभावविरहविशिष्टानुमितित्वप्रकारकेच्छात्वाद्यनुगतरूपेण।

२. बाधज्ञानाभावादिकारणतायाम्। बाधज्ञानाभावः कारणं न तु बाधाभावः। बाधज्ञानस्यानुमितिं प्रति प्रतिबन्धकतया तदभावस्य प्रतिबन्धकाभावमुद्रया कारणत्वमिति भावः।

तत्र[1] बाधादिप्रतिबन्धकतावच्छेदककोटौ निवेशे प्रयोजनाभावादित्युपदर्शितलाघव-बलादनुमितिं प्रति सिद्धयभावत्वेन हेतुत्वं युक्तमेवेति ।

एतेन पूर्वोपदर्शितरीत्याऽऽहार्यपरामर्शेऽनुमितिकारणतावच्छेदककोटिप्रविष्टपरा-मर्शत्वजात्यनङ्गीकारादेव तस्मादनुमितिवारणे[2] परामर्शनिष्ठानुमितिजनकतावच्छेदक-कोटावनाहार्यत्वनिवेश एव नास्ति, क्वोपदर्शितलाघवं एन(क्व च) सिद्धयभाव[स्य]हेतु-तासिद्धिरिति परास्तम्, तावताप्य[3]नङ्गीकारोक्ताव्यवहितपूर्वं किञ्चेत्यादिनोक्तलाघ-वेन सिद्धयभावहेतुत्वस्य ब्रह्मणा[ऽपि] वारयितुमशक्यत्वादित्यलमनल्पजल्पेन ।

परे तु कालिकविशेषणता-स्ववृत्तिप्रागभावप्रतियोगित्व-स्वसामानाधिकरण्यैत-त्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टत्वमेव धूमादिलिङ्गकत्वमिति वदन्ति, तत्र परेषामयमाशयः प्रतिभाति—स्वाधिकरणकृतिमत्त्वरूपाव्यवहितत्वनिवेशे स्वाधिकरण-त्वस्य कृतिमत्त्वस्य च कालिकसम्बन्धेनैव वाच्यतया द्विधा कालिकसम्बन्धप्रवेशेऽनन्त-कृतिप्रवेशे च गौरवात्कालिकसम्बन्धरूपाव्यवहितत्वस्यैव कार्यतावच्छेदकसम्बन्धत्व-मुचितम् । धूमपरामर्शचतुर्थादिक्षणोत्पन्नान्यलिङ्गकानुमितौ च न कालिकसम्बन्धेन धूमपरामर्शविशिष्टत्वं विभिन्नकालीनयोराधाराधेयभावविरहात् । अतो न तत्र व्यभिचारः । न चैवं धूमपरामर्शाव्यवहितपूर्वक्षणोत्पन्नान्यलिङ्गकानुमितावप्युत्पत्तिक्षणा-वच्छेदेन कालिकसम्बन्धेन धूमपरामर्शविशिष्टत्वाभावादेव व्यभिचाराप्रसक्तौ स्ववृत्ति-प्रागभावप्रतियोगित्वरूपोत्तरत्वस्य निवेशो व्यर्थ इति वाच्यम्, पर्वतो वह्निमान् वह्नि-व्याप्यधूमवांश्चेत्याकारकधूमपरामर्शात्मिकान्यलिङ्गकानुमितौ व्यभिचारवारणायैव तन्निवेशात् ।

यत्त्वेवं सति परामर्शतृतीयक्षणोत्पन्नाया[4] विनश्यदवस्थपरामर्शजन्यानुमितेर-सङ्ग्रहः । तत्र कालिकसम्बन्धेन परामर्शवैशिष्ट्याभावादिति, तन्न, परामर्शस्यानुमितिं प्रति कार्यसहभावेन कारणतया विनश्यदवस्थपरामर्शादनुमितेरेवानुदयात् । युक्तञ्चैतत्, परामर्शस्य पूर्वभावेन कारणत्वे पक्षताहेतुत्वानङ्गीकर्तृनवीनमत उत्पन्नानुमितिव्यक्तेः पुनरुत्पादवारणाय तत्तदनुमितिं प्रति तत्तदनुमितिप्रागभावस्य तत्तद्व्यक्तित्वेन हेतुत्वम्, तत्तदनुमितिव्यक्तेस्तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वं वा कल्पनीयमिति गौरवम् । परामर्शस्य कार्यसहभावेन कारणत्वे तु कार्यकाले परामर्शाभावादेवोत्पन्नानुमितेः पुनरुत्पादवारणे न तत्कल्पनमिति लाघवम् । न च कार्यसहभावेन कारणत्वेऽप्य-

१. ले० टि० सिद्धिकालीने ।

२. परामर्शनिष्ठा याऽनुमितिजनकता तदवच्छेदककोटावित्यभिप्रायः ।

३. ले० टि० लाघवेन ।

४. विनश्यदवस्थपरामर्शः – उत्पन्नविनष्टपरामर्शः ।

पेक्षाबुद्ध्यात्मकपरामर्शजन्यानुमितेः पुनरुत्पादो दुर्वारस्तत्र कार्यकालेऽपि परामर्शसत्त्वादिति तत्कल्पनमावश्यकमिति वाच्यम्, तत्र तदनुमितिप्रागभावव्यक्तेस्तदनुमितिव्यक्तेर्वा तत्तद्व्यक्तित्वेन कारणत्वस्य प्रतिबन्धकत्वस्य वा[1] कल्पनेऽप्यपेक्षाबुद्ध्यनात्मकानन्तपरामर्शस्थले तदकल्पनेन लाघवानपायात्। पक्षताहेतुत्वानङ्गीकर्तृमतेऽपि पूर्वभावेन हेतुत्वे यत्र प्रथममनुमित्सापरामर्शौ, ततोऽनुमितिस्तत्र, यत्र वा प्रथममपेक्षाबुद्ध्यात्मकपरामर्शस्ततोऽनुमित्सा, ततोऽनुमितिस्तत्रोत्पन्नपुनरुत्पादस्य[2] दुर्वारतयोक्तरीत्या कारणत्वस्य प्रतिबन्धकत्वस्य वा[3] कल्पने गौरवम्। कार्यसहभावेन हेतुत्वे तु कार्यकाले परामर्शाभावादेव तद्वारणे न तत्कल्पनमिति लाघवम्। एवं सिद्धिप्रतिबन्धकतायां पर्वते वह्न्यनुमितिर्जायतामित्याद्यनुगतेच्छानामनुगतरूपेणोत्तेजकत्वेऽप्यनुमितिर्जायतां वह्निज्ञानं जायतामित्याद्यननुगतेच्छानामननुगत[5] तत्तद्व्यक्तित्वेनैवोत्तेजकत्वमनुगतरूपेणोत्तेजकत्वासम्भवादिति सिद्धान्तः। तथा च परामर्शस्य पूर्वभावेन हेतुत्वेऽननुगतेच्छासत्त्वे सिद्धिकालीनविनश्यदवस्थपरामर्शादनुमित्युपपत्तये तासां[4] तत्तद्व्यक्तित्वेन सिद्धिप्रतिबन्धकतायामुत्तेजकत्वकल्पने गौरवम्। कार्यसहभावेन हेतुत्वे तु तत्रानुमित्यनुदयेनानुमित्युपपत्त्यर्थमनन्तानुगतेच्छानां न तत्तद्व्यक्तित्वेनोत्तेजकत्वमिति लाघवम्। एवमाहार्यपरामर्शादनुमितिवारणायाहार्यपरामर्शानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वरूपानाहार्यत्वस्यानुमितिकारणतावच्छेदकत्वम्, तत्तद्व्यक्तित्वेनानुमितिप्रतिबन्धकत्वं वा स्वीकरणीयम्, अनुगताहार्यत्वस्य दुर्वचत्वात्। तथा च परामर्शपूर्वभावेन हेतुत्वे विनश्यदवस्थादाहार्यपरामर्शादनुमितिवारणायानन्ततादृशपरामर्शानां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यानुमितिकारणतावच्छेदकत्वे तत्तद्व्यक्तित्वेनानुमितिप्रतिबन्धकत्वे गौरवम्। कार्यसहभावेन हेतुत्वे तु तत्र कार्यकाले परामर्शाभावादेवानुमितिवारणे न तत्कल्पनमिति लाघवम्। न च कार्यसहभावेन हेतुत्वेऽपि तस्मादेवाहार्यपरामर्शात् स्वाधिकरणक्षणेऽनुमित्यापत्तिस्तत्कार्यकाले परामर्शसत्त्वादिति तत्कल्पनमावश्यकमिति वाच्यम्, तथापि यादृशाहार्यपरामर्शेन स्वाधिकरणक्षणे विनश्यदवस्थसिद्धिबाधादिरूपानुमितिप्रतिबन्धकान्तरसमवधानवशादेव नानुमितिर्जातेति तत्रोक्तरीत्या लाघवस्य दुरपवादत्वात्।

---

१. तदनुमितिप्रागभावस्य कारणत्वं तदनुमितिव्यक्तेर्वा प्रतिबन्धकत्वमित्यन्वयः।

२. उत्पन्नानुमितेः पुनरुत्पादस्य।

३. तदनुमितिप्रागभावस्य कारणत्वं तदनुमितिव्यक्तेर्वा प्रतिबन्धकत्वम्।

४. पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्न-विषयताशालीच्छात्वेन।

५. अननुगतेच्छानाम्।

किञ्च, परामर्शस्य पूर्वभावेन हेतुत्वे कार्यतावच्छेदककोटौ ज्ञानत्वनिवेश आवश्यकः। अन्यथा परामर्शद्वितीयक्षणोत्पन्नघटात्मसंयोगादौ व्यभिचारापत्तेः, उक्तत्रितयसम्बन्धेन परामर्शविशिष्टस्य तस्याधिकरणे घटादौ परामर्शाभावात्।

अथ कार्यतावच्छेदकविशिष्टकार्याधिकरणे कारणासत्त्वमेव व्यभिचारः। विशिष्टाधिकरणत्वञ्च तत्रैव स्वीक्रियते यत्र वैशिष्ट्यनियामकसामानाधिकरण्यघटकीभूताभ्यां विशेषणविशेष्यसम्बन्धाभ्यां विशेषणविशेष्योभयाधिकरणत्वम्। यथा गुणकर्मान्यत्वविशिष्टसत्ताधिकरणत्वं द्रव्य एव, तत्र वैशिष्ट्यनियामकसामानाधिकरण्यघटकीभूताभ्यां विशेषणताविशेष-समवायसम्बन्धाभ्यां गुणकर्मान्यत्वसत्त्वयोः सत्त्वात्। न च गुणे कर्मणि वा तत्र विशेषणताविशेषसम्बन्धेन गुणकर्मान्यत्वाभावात्(वः)। तथा च प्रकृते कार्यतावच्छेदकपरामर्शविशिष्टघटात्मसंयोगाधिकरणत्वं घटादौ, तत्र वैशिष्ट्यनियामकसामानाधिकरण्यघटकीभूतेन समवायसम्बन्धेन परामर्शरूपविशेषणाभावात्, किन्त्वात्मन्येव। तत्र परामर्शोऽप्यस्तीति न घटात्मसंयोगादौ व्यभिचार इति चेत्, न, विनश्यदवस्थपरामर्शजन्यानुमिते[1]रसङ्ग्रहापत्त्या परामर्शस्य [2]विशेषणत्वासम्भवेनोपलक्षणत्वस्यैव वाच्यतया घटात्मसंयोगादौ व्यभिचारस्य दुर्वारत्वात्। न चोक्तव्यभिचारवारणाय कार्यतावच्छेदककोटौ ज्ञानत्वं निवेश्यतेऽनुमितित्वं वेत्यत्र विनिगमनाविरहः, अनुमितित्वनिवेशेऽपि व्यभिचारवारणसम्भवादिति वाच्यम्, अनुमितित्वनिवेशे यदि पर्वतो वह्निव्याप्यधूमसामाग्र्यभाववान्स्यात्तदा वह्निव्याप्यधूमाभाववान् स्यादित्याद्यापत्तौ वाऽऽपाद्यव्यतिरेकनिर्णयमुद्रया वह्निव्याप्यधूमवत्पर्वतवान् देशः, वह्निव्याप्यधूमवान् पर्वतो द्रव्यमित्यादिविशिष्टवैशिष्ट्यबोधे च विशेषणतावच्छेदकप्रकारकनिर्णयादिविधया वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानामतिरिक्तकारणत्वकल्पने[3] गौरवम्। ज्ञानत्वनिवेशे तु तस्यापत्त्यादिसाधारणतयाऽनुमितिपरामर्शस्थलीयक्लृप्तकारणतयैव निर्वाहान्न तत्कल्पनमित्यादि-बहुतरलाघवेन ज्ञानत्वनिवेशस्यैवोचितत्वात्।

यत्तु कैश्चित्पर्वतो यदि धूमवान् स्यात् तदा वह्निमान् स्यादित्याद्यापत्तौ वाऽऽपाद्यव्याप्यवत्तानिर्णयविधया वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानामतिरिक्तकारणत्वाकल्पनरूपं लाघवम्। ज्ञानत्वनिवेशे विनिगमकमुक्तम्, तदसत्, अनुमितिं प्रति परामर्शस्यानाहार्याप्रामाण्यज्ञानानास्कन्दितवह्निव्याप्यधूमवत्तानिश्चयत्वादिना हेतुत्वम्। आपत्तावापाद्यव्याप्यवत्तानिश्चयस्य तु पक्षधर्मतांशेऽप्रामाण्यज्ञानास्कन्दिताहार्यसंशयनिश्चयसाधारणवह्निव्याप्यधूमवत्ता ज्ञानत्वादिना, तादृशापाद्यव्याप्यवत्ताज्ञाना-

---

१. तृतीयक्षणोत्पन्नानुमितेः।

२. ले० टि० [ विशेषणं ] विद्यमानं सद्व्यावर्तकम्।

३. विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणत्वात्।

दापत्तेरुदयादित्यापत्तावापाद्यव्याप्यवत्ताज्ञानस्यातिरिक्तकारणत्वकल्पनस्यावश्यकतयोक्तलाघवस्य ज्ञानत्वनिवेशे विनिगमकत्वासम्भवात् । अत एव[१]तर्कस्याहार्यापादकसंशयनिरासफलकत्वं तत्र तत्रोक्तं सङ्गच्छते[२]। तथा हि—अनिष्टप्रसञ्जनात्मकतर्केणापादकज्ञान आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननेनापादकज्ञाने द्वेषोत्पत्त्या तत्रेच्छानुत्पत्ताविच्छारूपकारणाभावेनाहार्यसंशयानुदयात् तर्के तन्निवर्तकत्वसिद्धिः[३]। आपादकनिर्णयस्यैव हेतुत्वे कारणीभूत आपादकनिर्णय एव तर्कात्मकद्विष्टसाधनताज्ञानसम्भवेऽपि संशये द्विष्टसाधनताज्ञानाभावेन तत्रेच्छोत्पत्तौ बाधकाभावेनाहार्यशङ्कानिवर्तकत्वासम्भवादाहार्यसंशयनिरासफलकत्वं न सम्भवति[४]। न च तर्कस्यानाहार्यापादकसंशयनिरासफलकत्वमेवास्त्विति वाच्यम्, तर्ककारणीभूतस्यापाद्यव्यतिरेकनिश्चयस्य तर्कात्पूर्वं नियमतः सत्त्वेन तस्यापादकज्ञाने व्यावर्तकधर्मदर्शनविधया प्रतिबन्धकत्वे नानाहार्यापादकसंशयासम्भवेन तन्निरासफलकत्वस्यासम्भवादिति[५]। तथा च त्वदुक्तलाघवस्य ज्ञानत्वनिवेशे विनिगमकत्वासम्भवेन मदुक्तपूर्वोपदर्शितलाघवस्यैव ज्ञानत्वनिवेशे विनिगमकत्वं सम्भवति। तथा च परामर्शस्य पूर्णभावेन हेतुत्व उपदर्शितरीत्या कार्यतावच्छेदककोटौ ज्ञानत्वस्याधिकस्य निवेशेन गौरवम्। कार्यसहभावेन हेतुत्वे तु न ज्ञानत्वनिवेशः। विनश्यदवस्थपरामर्शादनुमित्यनुदयेन तदसङ्ग्रहापत्त्यभावात्परामर्शस्य विशेषणत्वे बाधकाभावेनोक्तरीत्या कार्यतावच्छेदकपरामर्शविशिष्टघटात्मसंयोगरूपकार्याधिकरणत्वस्य घटादावभावेन घटात्मसंयोगादौ व्यभिचाराभावादिति लाघवम्। तस्मात्कालिकविशेषणताघटितत्रितयसम्बन्धेन धूमादिपरामर्शविशिष्टस्य धूमलिङ्गकत्वे न कोऽपि दोष इत्यलमत्यावेशेन।

केचित्तु धूमादिलिङ्गपरामर्शजन्यतावच्छेदकतया सिद्धो जातिविशेष एव धूमादिलिङ्गकत्वम्, न तु धूमादिपरामर्शविशिष्टत्वं कार्यतावच्छेदकधर्मस्य जातित्वे बाधकसत्त्व एवोपाधित्वाङ्गीकारात्।

अथ धूमलिङ्गकत्वं न जाति (रा)आलोकलिङ्गकत्वादिना साङ्कर्यात्। तथा हि—धूमलिङ्गकत्वाभाववत्यालोक[मात्र]लिङ्गकानुमितावालोकलिङ्गकत्वम्, आलोकलिङ्गकत्वाभाववति धूममात्रलिङ्गकानुमितौ धूमलिङ्गकत्वम्, समूहालम्बनात्मकधूमालोकोभयलिङ्गकानुमितौ[च] धूमलिङ्गकत्वालोकलिङ्गकत्वयोः समावेशः। एवमन्यत्रापीति

---

१. ले० टि० तर्कसंशयनिश्चयसाधारणापाद्यव्याप्यापादकवत्ताज्ञानस्य हेतुत्वादेव।

२. ले० टि० ननु तर्कस्याहार्यज्ञानरूपस्य कथमाहार्यशङ्काप्रतिबन्धकत्वम्? आहार्यज्ञानस्याप्रतिबध्यकत्वावप्रतिबन्धकत्वाच्चेत्यतस्तत्प्रकारमाह—तथा हीत्यादिना।

३. ले० टि० तथा चेच्छारूपकारणविघटकत्वेन, अर्थादाहार्यशङ्कानिवर्तकत्वं लब्धमिति भावः।

४. ले० टि० तथा च तर्कस्य वैयर्थ्यमेव स्यादिति भावः।

५. ले० टि० तथा चाहार्यसंशयनिरासफलकत्वमेव तस्य वाच्यमित्याशयः।

चेत्, न, उपाधिसाङ्कर्यवज्जातिसाङ्कर्यस्याप्यदोषत्वात् । दोषत्वे वा सजातीयज्ञानद्वयस्य युगपदुत्पत्त्यभ्युपगमे बाधकाभावेन सर्वत्र समूहालम्बनस्थले ज्ञानद्वयस्यैवोत्पत्त्या समूहालम्बनात्मिकाया एकस्या उभयलिङ्गकानुमितेरभावात् । प्रकृते साङ्कर्याभावेन धूमलिङ्गकत्वादीनां जातित्वे बाधकाभावादिति प्राहुः ।

अत्रेदमवधेयम्—परामर्शविशिष्टत्वादिकं न कार्यतावच्छेदककोटौ निवेशनीयम्, धूमालोकादिलिङ्गकसकलपरामर्शानामेकरूपेण हेतुत्वोपगमादेवान्यलिङ्गकानुमितौ व्यभिचारवारणात् । न चैवमालोकव्यापकवह्निसमानाधिकरणधूमवान्पर्वत इति ज्ञानादप्यनुमित्यापत्तिरित्युक्तमेवेति वाच्यम्, भावानवबोधनात् । न हि वयं यत्किञ्चिद्व्यापकवह्निसामानाधिकरण्यविशिष्टवत्ता निर्णयत्वादिनाऽनुगतरूपेण कारणतां वदामो येनोक्तापत्तिः स्यात्; अपि तु स्वावच्छिन्नव्यापकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नप्रकारतानिरूपितसामानाधिकरण्यत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकीभूत - स्वावच्छिन्नत्वसम्बन्धेनावच्छेदकविशिष्टा या पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसांसर्गिकीविषयतानिरूपितप्रकारता तच्छालिनिर्णयत्वादिनैव । तत्र च नोक्तापत्तिस्तादृशज्ञानीयधूमादिनिष्ठप्रकारतानामुक्तसम्बन्धेन धूमत्वाद्यवच्छेदकविशिष्टत्वाभावात् । धूमव्यापकवह्निसमानाधिकरणधूमवानित्यादिज्ञानीयधूमादिप्रकारतानां तूक्तसम्बन्धेन धूमत्वाद्यवच्छेदकविशिष्टत्वमस्त्येवेति ततो नानुमित्यनुपपत्तिः । ननु धूमालोकादिलिङ्गकसकलपरामर्शो नानुक्तानुगतरूपेण कारणतामुपगम्यान्यलिङ्गकानुमितौ व्यभिचारवारणेऽप्यन्यसंसर्गकपरामर्शजन्यानुमितौ व्यभिचारो दुर्वारः । तथा हि संयोगादिसम्बन्धेन वह्निव्याप्यत्वावगाहिनः समवायादिसम्बन्धेन पर्वते हेतुमत्तावगाहिनः परामर्शादनुमितिवारणाय संयोगसंसर्गावच्छिन्नाधिकरणताघटितव्यापकत्वम्, संयोगसंसर्गावच्छिन्नाधेयताघटितसामानाधिकरण्यं संयोगसंसर्गावच्छिन्नप्रकारताञ्च निवेश्य संयोगसंसर्गकवह्निव्याप्यवत्तापरामर्शस्य कारणत्वं वाच्यम् । एवं समवायादिसंसर्गावच्छिन्नाधिकरणघटितव्यापकत्वादिकं निवेश्य समवायादिसंसर्गकवह्निव्याप्यवत्तापरामर्शैरविलक्षणतयाऽनुमितेरुत्पादनादतस्तत्तत्संसर्गकवह्निव्याप्यवत्तापरामर्शजन्यतावच्छेदककोटावव्यवहितोत्तरत्वादिसम्बन्धेन तत्तत्संसर्गकवह्निव्याप्यवत्तापरामर्शादिवैशिष्ट्यमवश्यं निवेशनीयमिति चेत्, न, स्वावच्छिन्नसंसर्गावच्छिन्नाधिकरणताघटितव्यापकत्वप्रकारतानिरूपितवह्नित्वावच्छिन्नप्रकारतानिरूपिताधिकरणत्वावच्छिन्नप्रकारतानिरूपितस्वावच्छिन्नसंसर्गावच्छिन्नाधेयत्वस्वावच्छिन्नप्रकारतानिरूपितत्व-स्वावच्छिन्न[illegible]भयसम्बन्धेनावच्छेदकविशिष्टत्वस्य पक्षविशेष्यतानिरूपितसांसर्गिकविषयताय[illegible]प निवेशेन संयोगसमवायादिसंसर्गकवह्निव्याप्यवत्तापरामर्शानामप्येकरूपेणैव हेतुत्वात् । संयोगादिसम्बन्धेन वह्निव्याप्यत्वावगाहिसमवायसम्बन्धेन हेतुमत्तावगाहिपरामर्शीयपक्षविशेष्यतानिरूपितसमवायादिनिष्ठसांसर्गिकविषयतानामुक्तोभयसम्बन्धेनावच्छेदकविशिष्टत्वाभावान्न तस्मा-

दनुमितिः। एकसम्बन्धेन व्याप्यत्वहेतुमत्त्वोभयावगाहिपरामर्शीयपक्षविशेष्यतानिरूपित-सांसर्गिकविषयतानां तूक्तोभयसम्बन्धेन सम्बन्धतावच्छेदकविशिष्टत्वान्न तस्मा-दनुमित्यनुपपत्तिः।

वस्तुतस्तु संयोगसमवायादिसंसर्गकधूमालोकादिलिङ्गकसकलपरामर्शानां वह्नि-व्याप्यत्वावच्छिन्नप्रकारताशालिपरामर्शत्वेनैव हेतुत्वम्। आलोकव्यापकवह्निसमाना-धिकरणधूमवान्पर्वत इत्यादिनिश्चये संयोगादिसम्बन्धेन व्याप्यत्वावगाहिनि समवायादि-सम्बन्धेन हेतुमत्तावगाहिनि च निश्चयेऽनुमितिकारणतावच्छेदकपरामर्शरूपजात्यनभ्यु-पगमादेव तस्मादनुमितिवारणसम्भवादिति तत्त्वम्। अन्यथाऽनुमितिं प्रति परामर्शस्यैक-रूपेण हेतुत्वे वह्निव्याप्यधूमाभाववान् स्यात् पर्वत इत्याद्यापत्तौ वह्निव्याप्यधूमवत्पर्वत-वान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे च वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानामापाद्य-व्यतिरेकनिर्णयविधया विशेषणतावच्छेदकप्रकारकनिर्णयादिविधया च लिङ्गभेदेन कारणत्वे गौरवम्। तत्र तेषामेकरूपेण हेतुत्वे वह्निव्याप्यालोकवान्पर्वत इत्यादिनिर्णयाद्वह्नि-व्याप्यधूमाभाववान् स्यात् पर्वत इत्यापत्तेर्वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्ट-वैशिष्ट्यबोधस्य चापत्तेः। अनुमितिं प्रति परामर्शस्य लिङ्गभेदेन संसर्गभेदेन हेतुत्वे तु क्लृप्तकारणतयैव निर्वाहेऽतिरिक्तकारणत्वाभावेन लाघवमिति परामर्शस्यानुमितावव्यव-हितोत्तरत्वादिसम्बन्धेन परामर्शविशिष्टत्वं कार्यतावच्छेदककोटौ निवेश्य लिङ्गभेदेन हेतु-तावच्छेदकसंसर्गभेदेन कारणताकल्पनमेव समुचितमिति चेत्, न, परामर्शस्य लिङ्गभेदेन संसर्गभेदेन कारणत्वे भिन्नविषयकप्रत्यक्षादौ विषयभेदेन भिन्नायां वह्न्यनुमितिसामग्री-प्रतिबन्धकतायां तस्य तद्भेदेन निवेशनीयतया तद्भेदानन्तसामग्रीप्रतिबन्धकताबाहुल्ये गौरवम्। एकरूपेण कारणत्वे सामग्रीप्रतिबन्धकतायामप्येकरूपेणैव निवेशान्न तद्भेदेन सामग्रीप्रतिबन्धकताबाहुल्यमिति लाघवेनापत्तिविशिष्टवैशिष्ट्यबोधस्थलीयोक्तकारणत्व-प्रयुक्तगौरवस्याकिञ्चित्करत्वात्।

अत्र केचित्—आपत्तिस्थल एवोक्तरीत्याऽतिरिक्तकारणत्वम्, वह्निव्याप्यधूमवान्प-(वत्प)र्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे तु वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधया नातिरिक्तकारणत्वं कल्पनीयम्, वह्निव्याप्यधूम-वान् स्यात् पर्वत इत्याद्यापत्तावापाद्यव्यतिरेकनिर्णयविधयोक्तनिर्णयस्य कारणत्वे कल्पनीये तत्रैव कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिसम्बन्धेन तादृशनिर्णयवैशिष्ट्यं निवेश्यापत्तित्वमनिवेश्यैककारणतयैवोपपत्तेः। न च कार्यतावच्छेदककोटौ तादृशनिर्णय-वैशिष्ट्यनिवेशे गौरवमिति वाच्यम्, तादृशनिर्णयस्य विशेषणतावच्छेदकनिर्णयविधयाऽ-तिरिक्तानन्तकारणताकल्पनम(मु)पेक्ष्य तादृशनिर्णयवैशिष्ट्यनिवेश एव लाघवात्।

यत्तु तादृशनिर्णयवैशिष्ट्यस्य कार्यतावच्छेदककोटौ निवेशनमावश्यकम्। अन्यथा तादृशनिर्णयादिव वह्निव्याप्यधूमाभावाभाववान् पर्वत इत्यादि निर्णयादप्युक्तापत्त्युदयेन

तत्र व्यभिचारापत्तेरिति, तन्न, लाघवेन वह्निव्याप्यधूमत्वावच्छिन्नप्रकारकनिर्णयत्वेनैव हेतुतया वह्निव्याप्यधूमाभावाभाववान्पर्वत इत्यादिनिर्णयस्यापत्त्यजनकत्वेन व्यभिचाराभावात्। न च तस्यापत्त्यजनकत्वे तदुत्तरमापत्त्यनुदयप्रसङ्ग इति वाच्यम्, इष्टापत्तेः, क्षणविलम्बेन वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयमुपेत्यापत्त्युपपादनसम्भवाच्चेत्याहुः। तन्न, वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधयैवातिरिक्तकारणत्वं कल्प्यते, तेनैवोक्तरीत्याऽऽपाद्यव्यतिरेकनिर्णयस्य कारणत्वोपपत्तिरित्यस्यापि वक्तुं शक्यत्वात्।

वस्तुतस्तूभयथाऽप्यतिरिक्तकारणत्वं न कल्प्यते। तथा हि—रक्तपर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे पर्वतो रक्त इत्यादिनिर्णयस्य विशेषणतावच्छेदकप्रकारकनिर्णयविधया हेतुत्वमा(म)वश्य(श्यं)(कं ?) कल्पनीयम्। तत्र विशेषणतावच्छेदकभेदेन हेतुत्वे गौरवेण पर्वतत्वावच्छिन्नविशेषणतानिरूपितावच्छेदकतासम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन निर्णयत्वेनैकमेव हेतुत्वं कल्प्यत इति वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयस्य नातिरिक्तकारणत्वम्, क्लृप्तेनैव निर्वाहात्। एवं वह्निव्याप्यधूमाभाववान्पर्वत इत्याद्यापत्तावपि वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानामतिरिक्तकारणत्वे मानाभावः। वह्न्यभाववान्पर्वत इत्याद्यापत्तौ वह्निमान् पर्वत इत्यादिनिर्णयानामापाद्यव्यतिरेकनिर्णयविधया कारणत्वे कल्पनीये वह्न्यभावादिविषयभेदेन कारणत्वे गौरवापत्त्या सकलाभावापाद्यकापत्तिसाधारण्येन पर्वतत्वावच्छिन्नविशेष्यतानिरूपिताभावत्वावच्छिन्नप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकतासम्बन्धेनापत्तिं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितप्रकारतावच्छेदकतासम्बन्धेन निर्णयस्यापाद्यप्रतियोगितावच्छेदकनिष्ठप्रत्यासत्त्यैकमेव हेतुत्वं कल्प्यते लाघवादिति क्लृप्तेनैवात्रापि निर्वाहसम्भवात्। न चोक्तरीत्याऽऽपाद्यप्रतियोगितावच्छेदकनिष्ठप्रत्यासत्त्या कारणत्वं कल्प्यते, उत वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेनापत्तिं प्रति वह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन निर्णयत्वेन विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कारणत्वं कल्प्यत इत्यत्र विनिगमकाभावः, विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कारणत्वेऽपि विशेष्यतावच्छेदकभेदेन कारणत्वभेदाभावेन लाघवसम्भवादिति वाच्यम्, विशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या कारणत्वे विशेष्यविशेषणतावच्छेदकभेदेन कारणताभेदाभावेऽपि वह्न्यभावाद्यापाद्यभेदेन कारणताभेदस्यावश्यकतया वह्निव्याप्यधूमाभाववान्पर्वत इत्याद्यापत्तौ वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानां लिङ्गभेदेन संसर्गभेदेनानन्तातिरिक्तकारणतापत्त्या गौरवम्। आपाद्यप्रतियोगितावच्छेदकनिष्ठप्रत्यासत्त्या कारणत्वे तु विशेष्यतावच्छेदकभेदेन कारणताभेदेऽप्यापाद्यभेदेन कारणताभेदाभावादुक्तापत्तावुक्तनिर्णयानां लिङ्गभेदेन संसर्गभेदेनातिरिक्तकारणत्वा-

भावेन लाघवमित्याद्यापाद्यप्रतियोगितावच्छेदकनिष्ठप्रत्यासत्त्यैव कारणत्वस्योचितत्वादिति ।

एतेन वह्निव्याप्यधूमाभाववान् पर्वत इत्याद्यापत्तौ वह्निव्याप्यधूमवान्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे च वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानां लिङ्गभेदेन संसर्गभेदेनातिरिक्तकारणत्वस्यावश्यकत्वेन तादृशनिर्णयजन्यतावच्छेदककोटावेवापत्तित्वादिकमनिवेश्य तादृशवैशिष्ट्यनिवेशनेनैवोपपत्तावनुमितिं प्रति परामर्शस्यैकरूपेण हेतुत्वेऽपि मानाभावः, आपत्तिस्थलीयक्लृप्तकारणतयैवोपपत्तेरित्यपि परास्तम् । उक्तरीत्या वह्निव्याप्यधूमाभाववान्पर्वत इत्याद्यापत्तौ वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबोधे च वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानामतिरिक्तकारणत्वस्यैवाभावेन क्लृप्तकारणतयैवोपपत्त्यभावात् ।

केचित्तु वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयानां वह्निव्याप्यधूमाभाववान्पर्वत इत्याहार्यप्रत्यक्षेऽतिरिक्तकारणत्वस्यावश्यकतया तेनैव निर्वाहादापत्तौ विशिष्टवैशिष्ट्यबोधे च नातिरिक्तकारणत्वम् । तथा हि—वह्निव्याप्यधूमाभाववान्पर्वत इत्यादिविशिष्टवैशिष्ट्यबुद्धौ वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयस्य बाधनिर्णयविधया प्रतिबन्धकत्वं सर्वसिद्धम् । तत्राहार्यप्रत्यक्षे व्यभिचारवारणायेच्छानामुत्तेजकत्वे तासामप्रामाण्यग्रहाभावादिभिः समं विशेषणविशेष्यभावे विनिगमनाविरहेणानन्तप्रतिबन्धकत्वप्रयुक्तगौरवापत्तिरिति जन्यतासम्बन्धेन वह्निव्याप्यधूमवान्पर्वत इत्यादिनिर्णयविशिष्टान्यत्वमेव प्रतिबन्धकतावच्छेदकं वाच्यम् । आहार्यप्रत्यक्षञ्च जन्यतासम्बन्धेन तादृशनिर्णयविशिष्टमेवेति न तत्र व्यभिचारः । न चाहार्यप्रत्यक्षे तादृशनिर्णयस्य जनकत्वे मानाभाव इति वाच्यम्, उक्तगौरवभियाऽऽहार्यप्रत्यक्षे तादृशनिर्णयस्य कारणत्वे कल्पनीये आपत्तिविशिष्टवैशिष्ट्यबोधसाधारणस्याव्यवहितोत्तरत्वादिसम्बन्धेन तादृशनिर्णयविशिष्टत्वस्यैव कार्यतावच्छेदकत्वं स्वीक्रियत इति तेनैव निर्वाहान्न तत्र तादृशनिर्णयस्यातिरिक्तकारणत्वमिति परामर्शस्य लिङ्गभेदेन संसर्गभेदेन कारणत्वाभावेऽप्यापत्त्यादावप्यतिरिक्तकारणताप्रयुक्तगौरवाभावः । न चैवमनुमितिपरामर्शस्यैकरूपेण हेतुत्वे मानाभावः, उक्तकारणतयैव निर्वाहादिति वाच्यम्, इष्टापत्तेरिति प्राहुरिति कृतं पल्लवितेन ।

अत्र वदन्ति—साध्याभाववदवृत्तित्वरूपव्याप्तेरेव लाघवादनुमित्युपयोगित्वम् । परामर्शस्यापि लिङ्गभेदेन संसर्गभेदेन न हेतुताभेदः । साध्याभाववदवृत्तित्वञ्च साध्याभाववन्निरूपितसम्बन्धाभाव एव । एवञ्च पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति वह्न्यभाववन्निरूपितसम्बन्धाभावरूपव्याप्तिविशिष्टवत्तानिश्चयत्वेन हेतुत्वकल्पनान्नान्यलिङ्गकपरामर्शजन्यानुमितावन्यसंसर्गकपरामर्शजन्यानुमितौ च व्यभिचारः । अथ लाघवादुक्तव्याप्तेरनुमित्युपयोगित्वाङ्गीकारे परामर्शस्य लिङ्गभेदेन हेतुताभेदाभावेऽपि हेतुतावच्छेदकसंसर्गभेदेन हेतुताभेद आवश्यकः । हेतौ साध्याभाववन्निरूपितैकसम्बन्धाभावपक्षे

हेतुनिरूपितसम्बन्धान्तरमवगाहमानात्परामर्शादनुमितिवारणाय साध्याभाववन्निरूपित-तत्तत्सम्बन्धाभावविशिष्टा या तत्तत्सम्बन्धावच्छिन्ना प्रकारता तच्छालिनिर्णयत्वेन हेतुताया आवश्यकत्वादिति चेत्, न, पर्वतोद्देश्यकसंयोगसंसर्गकवह्निविधेयकानुमित्यादिकं प्रति स्वावच्छेदकावच्छिन्नत्वस्वनिरूपितविषयतानिरूपिताभावनिष्ठविषयतानिरूपितत्वोभयसम्बन्धेन[1] पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसांसर्गिकविषयताविशिष्टा या प्रतियोगितासम्बन्धावच्छिन्ना विषयता तन्निरूपिताधिकरणविषयतानिरूपिताभावविषयता-निरूपितसंयोगसम्बन्धावच्छिन्नप्रतियोगितासम्बन्धावच्छिन्नवह्निप्रकारताशालिनिर्णय-त्वादिना परामर्शस्य हेतुताकल्पनात्। उक्तपरामर्शीयैकसम्बन्धनिष्ठायां प्रतियोगितासम्बन्धावच्छिन्नविषयतायामुक्तोभयसम्बन्धेन निरुक्तसांसर्गिकविषयताविशिष्टत्वाभावेन न तस्मादनुमित्यापत्तिरिति।

अत्रेदं विचार्यते—संयोगादिसम्बन्धभाने संयोगत्वादिरूपसम्बन्धतावच्छेदकभानाङ्गीकारा(र)एवायं प्रकारः सम्भवति, तदंशे विशेषणतया भासमानस्य तन्निष्ठविषयतावच्छेदकत्वेन संयोगादिविशेषणतया भासमानस्य संयोगत्वादेः संयोगादिनिष्ठसांसर्गिकविषयतायामवच्छेदकत्वसम्भवात्। तत्रैव च मानाभावः, सर्वत्र विशिष्टबुद्धौ संयोगादिसंसर्गस्य स्वरूपत एव भानेन संयोगत्वादिभाने मानाभावात्। न चैवं प्रकारविशेष्ययोरपि स्वरूपत एव भानमस्त्विति वाच्यम्, घटवद्भूतलमित्यादिविशिष्टबुद्धीनां घटत्वादिविशिष्टविषयकत्वे घटवद्भूतलमहं जानामीत्याद्यनुव्यवसायस्यैव भानत्वात्। न ह्येवं संयोगत्वादिसम्बन्धतावच्छेदकविशिष्टविषयकत्वेऽनुव्यवसायो मानमस्ति। न चैवं संयोगादिसंसर्गस्य स्वरूपतोऽपि भाने मानाभाव इति वाच्यम्, बाधप्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोरत्र सम्बन्धविशेषावच्छिन्नप्रकारताघटितत्वेन घटवद्भूतलमित्यादिविशिष्टबुद्धीनां बाधप्रतिबध्यतायाः प्रमात्वभ्रमत्वयोश्चानुरोधेन संयोगादिसंसर्गविषयकत्वस्यावश्यकत्वात्। सम्बन्धविशेषनिष्ठस्य प्रकारतावच्छेदकत्वस्य प्रकारतानिरूपितसांसर्गिकविषयताश्रयत्वादन्यस्य दुर्वचत्वात्। न च जात्यतिरिक्तपदार्थस्य स्वरूपतो भानं नास्तीति नियमेन संयोगादेः स्वरूपताभानं न सम्भवतीति वाच्यम्, तादृशनियमेनाभावात्। भावे वा भानं नास्तीत्यस्य प्रकारतयैव भानं नास्तीत्यस्यार्थतयाऽदोषात्। अथात्र सिद्ध्यसिद्धिव्याघातः। न च जात्यतिरिक्तपदार्थत्वस्य व्यापको विशेष्यतान्यप्रकारतानिरूपकत्वाभाव इति नियमार्थकरणान्न दोष इति वाच्यम्, अयं घट इत्याकारज्ञान इदन्त्वस्य घटादिरूपतया घटवृत्तिरूपादिस्वरूपतया वेदन्त्वे जात्यतिरिक्तपदार्थे विशेष्यत्वान्यप्रकारतानिरूपकत्वसत्त्वेन व्यभिचारादिति चेत्, न, जात्यतिरिक्तपदार्थत्वे किञ्चिद्धर्मानवच्छिन्नविशेष्यतानिरूपितप्रकारतान्यनिरवच्छिन्नप्रकारतानिरूपकत्वाभावव्याप्यत्वस्य नियमार्थत्वात्।

---

१. लें० टि० उक्तदोषवारणाय प्रथमम्। द्वितीयन्तु वह्न्यभावनिरूपितसंयोगाभावविशिष्ट आलोकः संयोगेन धूमवान् पर्वत इति समूहालम्बनवारणाय।

अयं घट इत्यादिज्ञानीयेदन्त्वप्रकारता(याः)किञ्चिद्धर्मानवच्छिन्नविशेष्यतानिरूपित-प्रकारत्वान्यघटत्वावच्छिन्नप्रकारतानिरूपकत्ववति घटे जात्यतिरिक्तपदार्थ(र्थे)सत्त्वेन व्यभिचार इति प्रकारतायां निरवच्छिन्नत्वोपादानम्। तादृशप्रकारतायां निरवच्छिन्न-त्वाभावेन विशिष्टाभावसत्त्वान्न व्यभिचारः। अथ जात्यतिरिक्तपदार्थस्य स्वरूपतः प्रकारताशालिज्ञानं कथं न जायते, तादृशप्रकारताशालिज्ञानजनकसामग्रीसत्त्वात्। न ह्युक्तनियमभङ्गभिया सामग्रीकार्यं नार्जयेत्। न च निरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानं प्रति निरवच्छिन्नविषयतासम्बन्धेन ज्ञानत्वेन हेतुताकल्पनाद्घटादौ निरवच्छिन्नविषयता-सम्बन्धेन ज्ञानस्य विरहेण न निरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानापत्तिरिति वाच्यम्, तथाप्ययं घट इत्यादिविशिष्टबुद्धौ जायमानायां घटादौ निरवच्छिन्नविषयतासम्बन्धेन पूर्वोत्पन्ननिर्विकल्पकज्ञानसत्त्वेन निरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानापत्तेर्दुर्वारत्वादिति चेत्, न, किञ्चिद्धर्मानवच्छिन्नविशेष्यतानिरूपितप्रकारतान्यनिरवच्छिन्नप्रकारता-सम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन जातेर्हेतुताकल्पनात्। घटादौ तादृश-हेत्वभावान्न निरुक्तनिरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानापत्तिः। अत्रेदन्त्वादौ व्यभिचार-वारणायान्यान्तं[1] प्रकारताविशेषणम्। न चैवं घटवद्भूतलमित्यादौ निरुक्तसम्बन्धेन घटत्वादौ ज्ञानत्वापत्तिर्दुर्वारैवेति वाच्यम्, निरुक्तसम्बन्धेन ज्ञानत्वावच्छिन्नं प्रति किञ्चिद्धर्मानवच्छिन्नविशेष्यतानिरूपितप्रकारतासम्बन्धेन ज्ञानस्य प्रतिबन्धकत्वोपग-मेनादोषादित्यलमसदावेशेन।

अत्रोच्यते—सम्बन्धभाने सम्बन्धतावच्छेदकभानानङ्गीकारे सांसर्गिकविषयता-वैशिष्ट्यनियामकत्वं न स्वावच्छेदकावच्छिन्नत्वसंसर्गस्य किन्तु स्वाश्रयसम्बन्धतावच्छे-दकावच्छिन्नत्वस्य। तथा च न कोऽपि दोषः। संयोगत्वादेः संयोगादिनिष्ठसांसर्गिक-विषयताया अनवच्छेदकत्वेऽपि संयोगादिनिष्ठसम्बन्धताया अवच्छेदकत्वात्।

वस्तुतस्तु सम्बन्धभाने सम्बन्धतावच्छेदकभानानङ्गीकार आवश्यकः। तथा हि—घटवद्भूतलमित्यादिविशिष्टबुद्धौ संयोगादिसन्निकर्षघटितसामग्रीबलाद्यथा घटादिभानं यथा च संयुक्तसमवायादिसन्निकर्षघटितसामग्रीबलात्संयोगादिरूपसन्निकर्ष-भानं तथा संयुक्तसमवेतसमवायादिसन्निकर्षघटितसामग्रीबलाज्जायमानं संयोगत्वादिरूप-सम्बन्धतावच्छेदकभानं केन व वा)रणीयम्? किञ्च, सम्बन्धभाने सम्बन्धतावच्छेदक-भानानङ्गीकारे सयोगादिसंसर्गकघटवद्भूतलमित्यादिविशिष्टबुद्धीनां संयोगितादात्म्य-स्यापि संयोगरूपतया सर्वासामुक्तविशिष्टबुद्धीनां स्वरूपतः संयोगादिविषयकत्वेना-विशेषात्। तदङ्गीकारे तु संयोगत्व-संयोगितादात्म्यत्वरूपविभिन्नसम्बन्धतावच्छेदक-विषयकत्वेन वैलक्षण्योपपत्तिः। अपि च यया युक्त्या सम्बन्धस्य विशिष्टधीविषयत्वं सिद्ध्यति, तयैव युक्त्या सम्बन्धतावच्छेदकस्यापि विशिष्टधीविषयत्वं सिद्ध्यति। तथा हि

---

१. किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतान्यत्वम्।

संयोगादिसम्बन्धस्यापि विशिष्टधोविषयत्वे मानाभावः, विशिष्टधियः सम्बन्धविषयकत्वानभ्युपगमेऽपि तटस्थेन सम्बन्धेन समं प्रकारताया अवच्छेद्यावच्छेदकभावोपगमेन बाधप्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोश्च सम्बन्धविशेषावच्छिन्नप्रकारताघटितत्वोपपत्तेः। न च प्रकारतानिरूपितसांसर्गिकविषयताश्रयत्वमेव सम्बन्धस्य प्रकारतावच्छेदकत्वम्, अन्यस्य दुर्वचत्वादित्युक्तमेवेति वाच्यम्, प्रतियोगितावच्छेदकत्वादितिवत् (त्वमेव) प्रकारतावच्छेदकत्वस्यापि स्वरूपसम्बन्धरूपत्वात् पदार्थान्तरस्वरूपत्वाद्वा। अथ कम्बुग्रीवादिमान्नास्तीत्यभावविशेष्यकप्रतियोगिविशिष्टबुद्धेरन्यथानुपपत्त्या सम्बन्धस्य विशिष्टधोविषयतासिद्धिः। सा हि नाभावप्रतियोगिनः प्रमारूपा, प्रतियोग्यभावयोरन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वस्यैव सम्बन्धतया गुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या सम्बन्धविशेषावच्छिन्नप्रकारताघटितस्य प्रमात्वस्यासम्भवात्। अत एव तदंशे न भ्रमरूपाऽपि, भ्रमत्वस्यापि सम्बन्धविशेषावच्छिन्नप्रकारताघटितत्वात्; किन्तु प्रतियोगितारूपसम्बन्धांशे कम्बुग्रीवादिमत्त्वावच्छिन्नत्वरूपसम्बन्धतावच्छेदकस्य भ्रमरूपा वाच्या। एवञ्च तदभावाद्विषयताघटितभ्रमत्वानुपपत्त्या प्रतियोगितारूपसम्बन्धस्योक्तविशिष्टबुद्धिविषयतासिद्धिर्निराबाधैवेति चेत्, सिद्धं नः समीहितम्, तदभाववन्निष्ठविषयतानिरूपितवन्निष्ठविषयताशालिज्ञानत्वरूपभ्रमत्वानुपपत्त्या कम्बुग्रीवादिमत्त्वावच्छिन्नत्वरूपसम्बन्धतावच्छेदकस्यापि उक्तविशिष्टबुद्धिविषयतासिद्धेर्दुष्परिहरत्वात्।

अथ तथाप्यनुपपन्नं भ्रमत्वम्। तच्च न तदभाववन्निष्ठविषयतानिरूपिततन्निष्ठविषयताशालिज्ञानत्वम्। इदं रजतमिति ज्ञानस्येदमंशेऽपि भ्रमत्वापत्तेः, तस्येदमाभाववद्रजतत्वनिष्ठप्रकारताख्यविषयतानिरूपितेदन्निष्ठविशेष्यताख्यविषयताशालित्वात्। नापि तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठविषयताशालिज्ञानत्वम्, जातित्वेन रजतत्वविषयकस्येदं जातिमदिति ज्ञानस्य समवायरूपसम्बन्धांशे भ्रमत्वापत्तेः। तस्य समवायाभाववद्रजतत्वनिष्ठप्रकारतात्मकविशेष्यता[1]निरूपितसमवायनिष्ठसांसर्गिकविषयताशालित्वात्; किन्तु तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वम्। तच्चानुपपन्नमेव, सांसर्गिकविषयतायां प्रकारतात्वविशेष्यतात्वयोरभावादिति चेत्, न, सांसर्गिकविषयतायां प्रकारतात्वविशेष्यतात्वयोरङ्गीकारे बाधकाभावेनोक्तदोषानवकाशात्। न चैवं सति प्रतियोगितायां कम्बुग्रीवादिमत्त्वावच्छिन्नत्वाभावनिर्णयदशायां कम्बुग्रीवादिमान्नास्तीति प्रतीत्यनुपपत्तिः, भवन्मते न तस्यास्तादृशबोधप्रतिबध्यतावच्छेदकाक्रान्तत्वादिति वाच्यम्, इष्टापत्तेः, बाधप्रतिबध्यतावच्छेदककोटौ प्रकारतायां सांसर्गिकविषयताभिन्नत्वस्य वा निवेशात्। यदि च गुरुधर्मस्याप्यभावप्रतियोगितावच्छेदकत्वाङ्गीकारेण कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितायाः प्रसिद्ध्योक्तविशिष्ट-

१. ले० टि० जातित्वप्रकारतानिरूपितविशेष्यता।

बुद्धेः प्रमात्वसम्भवेन नोक्तरीत्या भ्रमत्वान्यथानुपपत्त्या सम्बन्ध-सम्बन्धतावच्छेदकयोर्विशिष्टधीविषयतासिद्धिरिति विभाव्यते, तथापि द्रव्यं रूपवदित्याकारिकाया द्रव्यत्वावच्छेदेन समवायसम्बन्धेन रूपसाध्यकानुमितेर्भ्रमत्वान्यथानुपपत्त्या सम्बन्ध-सम्बन्धतावच्छेदकयोर्विशिष्टधीविषयतासिद्धिः। तथा हि—अवच्छेदकावच्छेदेनानुमितित्वञ्च(च ?) प्रकृतपक्षतावच्छेदकावच्छिन्नप्रकृतसाध्यतावच्छेदकसम्बन्धेन[1] प्रकृतपक्षे प्रकृतसाध्यप्रकारकानुमितित्वम्। न च प्रकृतपक्षतावच्छेदकेऽवच्छेदकतासम्बन्धेन प्रकृतसाध्यप्रकारकानुमितित्वमेव तदिति वाच्यम्, पर्वतो वह्निमानित्याद्यनुमितौ पर्वतत्वाद्यंशे निष्प्रकारकत्वस्यैवानुभवात्[2] पर्वतत्वादौ वह्नेः प्रकारत्वे तादृशानुमितेर्वह्निमत्वाद् वह्निमानित्याद्याकारकतापत्तेश्च। एवं पर्वतत्वाद्यवच्छिन्नत्वविशिष्टसंयोगादिघटितव्यापकत्वावगाहिपरामर्शजन्य(न्यायां)पर्वतो वह्निमानित्याद्यनुमितौ तादृशविशिष्टसंयोगादिसंसर्गकत्वे न कस्यापि विवादः, व्यापकताघटकसम्बन्धेन पक्षे व्यापकभानस्यानुमितौ सर्वसम्मतत्वात्; किन्तु शुद्धसंयोगादिघटितव्यापकत्वावगाहिनोऽवच्छेदकावच्छेदेन हेतुमत्तापरामर्शादनुमितिरुत्पद्यते। तत्रावच्छेदकतासम्बन्धेन पक्षतावच्छेदके साध्यप्रकारतया भासते? अथवा साध्यतावच्छेदकसम्बन्धे पक्षतावच्छेदकावच्छिन्नत्वं सम्बन्धघटकतया भासत इत्येव विवादास्पदम्। तत्र च पक्षतावच्छेदकावच्छिन्नत्वं साध्यतावच्छेदकसम्बन्धे भासत इत्येव सम्यक्। पर्वतत्वाद्यवच्छिन्नसंयोगादिसम्बन्धावच्छिन्नवह्न्यादिप्रकारतायास्तत्संसर्गघटितव्यापकताज्ञानजन्य(न्यायां)पर्वतो वह्निमानित्यनुमितौ क्लृप्तत्वात् तस्या एव तत्समानाकारप्रकृतानुमितौ स्वीकर्तुमुचितत्वात्, पर्वतत्वादिपक्षतावच्छेदकेऽवच्छेदकतासम्बन्धेन वह्न्यादिप्रकारतायाश्च पर्वतो वह्निमानित्याद्यनुमितावक्लृप्तत्वात्। अवच्छेदकतासम्बन्धघटितवह्न्यादिव्यापकत्वावगाहिपरामर्शजन्यानुमितिश्च पर्वतत्वं वह्निमदित्याकारिका पर्वतत्वादिपक्षिका, न तु पर्वतो वह्निमानित्याद्याकारिका पर्वतादिपक्षिका, व्यापकताघटकसम्बन्धेन पक्षतावच्छेदके व्यापकभानस्य सर्वसम्मतत्वाभावात्। न च विषयताद्वयस्य तत्र तत्र क्लृप्तत्वे विवादास्पदं(दस्य) पर्वतो वह्निमानित्याद्यनुमितौ पक्षतावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धस्यैव संसर्गत्वे विनिगमनाविरह इति वाच्यम्, अणुरपि विशेष इति न्यायेन समानपक्षकत्वस्यैव विनिगमकत्वात्। अवच्छिन्नत्वञ्च द्विविधम्—स्वरूपसम्बन्धविशेषो व्यापकत्वञ्च। तत्र स्वरूपसम्बन्धरूपमवच्छिन्नत्वं नितम्बविशिष्टः पर्वतो वह्निमान्, उत्पत्तिकालीनो

---

१. ले० टि० पर्वतत्वव्यापकत्वविशिष्टसंयोगेन।

२. निष्प्रकारकत्वमत्र सामानाधिकरण्यसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपितविशेष्यताशून्यत्वम्। अन्यथा यद्विशिष्टे यद्भासते तत्रापि तत्सामानाधिकरण्येन भासत इति नियमानुसारेण सामानाधिकरण्यसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारतानिरूपितविशेष्यताया एव पर्वतत्वे सत्त्वेन ग्रन्थासङ्गतिः स्यात्।

घटो गन्धवानित्यादौ । व्यापकत्वरूपमवच्छिन्नत्वञ्च पर्वतो वह्निमान्, पृथिवी रूपवतीत्यादौ । एवञ्च द्रव्यं रूपवदित्यनुमितिर्न द्रव्यत्वव्यापकसमवायसम्बन्धेन द्रव्ये रूपस्य भ्रमात्मिका, तादृशविशिष्टसम्बन्धाप्रसिद्धेः[१] ; किन्तु समवायसम्बन्धेन द्रव्यत्वव्यापकरूपसम्बन्धतावच्छेदकस्य भ्रमरूपा वाच्या । तादृशभ्रमत्वञ्च समवायसम्बन्ध-द्रव्यत्वव्यापकत्वरूपसम्बन्धतावच्छेदकयोरनुमितिविषयत्वं विनोक्तरीत्या न सम्भवतीति तयोस्तादृशविशिष्टानुमितिविषयत्वस्योक्तयुक्त्याऽऽवश्यकत्वे सर्वत्र विशिष्टबुद्धौ सम्बन्ध-सम्बन्धतावच्छेदकयोः सामग्रीबलाद् भाने बाधकाभावेन सम्बन्धभाने सम्बन्धतावच्छेदकभानसिद्धिर्निराबाधैवेति दिक् ।

अत्रेदं बोध्यम्—लाघवात् साध्याभाववदवृत्तित्वरूपव्याप्तेरेवानुमित्युपयोगित्वमित्युक्तम् । व्यापकतागर्भव्याप्तौ वह्नित्वादिरूपसाध्यतावच्छेदकविशेषणस्य हेतुमन्निष्ठाभावप्रतियोगित्वावच्छेदकत्वाभावस्यैतन्मते हेतुविशेषणस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वाभावस्य च तुल्यशरीरत्वेन शरीरलाघवाभावात् । न चोभयमते विशेषणस्य तुल्यशरीरत्वेऽपि व्यापकतागर्भव्याप्तावनवच्छेदकत्वस्य विशेष्यतावच्छेदकस्य वह्नित्वादेर्निवेशने गौरवम् । एतन्मते वह्नित्वस्य स्वरूपत एव निवेशादिति वाच्यम्, हेतुसमानाधिकरणाभावीयप्रतियोगितायाः साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितानिरूपितस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताको योऽभावस्तद्वत्त्वरूपव्यापकत्वस्यैव व्याप्तिघटकतया व्यापकतागर्भव्याप्तावपि वह्नित्वादेः स्वरूपत एव निवेशात् ।

एतेन साध्याभाववदवृत्तित्वरूपव्यभिचारज्ञाने वह्नित्वं स्वरूपतः, प्रतियोगित्वं तदवच्छेदकत्वञ्च संसर्गतया भासते । साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानेऽपि तथा । अतस्तस्य व्यभिचारज्ञाने प्रतिबन्धकत्वात्तदेवानुमितिजनकत्वम् । व्यापकतागर्भव्याप्तिज्ञाने च वह्नित्वं वह्नित्वत्वेन, प्रतियोगित्वं तदवच्छेदकत्वञ्च प्रकारतया भासत इति तस्य व्यभिचारज्ञानाप्रतिबन्धकत्वान्नानुमितिजनकत्वमित्यपि परास्तम् । उक्तरीत्या व्यापकतागर्भव्याप्तिज्ञानेऽपि वह्नित्वस्य स्वरूपतः प्रतियोगित्वतदवच्छेदकत्वयोश्च संसर्गतया भानेनोक्तदोषाभावात् । न च विशेषणस्योभयमते तुल्यशरीरत्वेऽपि व्यापकतागर्भव्याप्तौ साध्यसामानाधिकरण्यरूपाधिकांशस्य निवेशेन गौरवम् । एतन्मतेऽवृत्तिगगनादिवारणाय वृत्तिमत्त्वमात्रस्य[२] निवेशेन लाघवमिति वाच्यम् । एतन्मतेऽपि पर्याप्तिसम्बन्धेन द्वित्वसाध्यकत्रित्वहेतौ द्वित्वाभाववति प्रत्येकस्मिन् त्रित्वस्य च पर्याप्तिसम्बन्धे-

---

१. लै० टि० द्रव्यत्वव्यापकत्वविशिष्टरूपनिरूपितसमवायाप्रसिद्धिः । इदञ्च समवायस्यैकत्वाभिप्रायेण ।

२. ( तु० ) निविशतां वा वृत्तिमत्त्वं साध्यसामानाधिकरण्यं वेति केवलान्वयिग्रन्थे दीधितिकृतः ।

नावृत्तित्वेन[1] वृत्तिमत्त्वेन च तत्रातिव्याप्तिवारणाय साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तिमत्त्वरूपसाध्यसामानाधिकरण्यस्यावश्यं निवेशनीयतया लाघवाभावात् । न चैतन्मतेऽवच्छेदकलाघवाभावेऽपि परामर्शस्य हेतुभेदेन हेतुतावच्छेदकभेदेन च विभिन्नहेतुताया अकल्पनात्कल्पनालाघवमस्त्येवेति वाच्यम्, व्यापकतागर्भव्याप्तिमतेऽपि पूर्वोपदर्शितरीत्या हेतुभेदेन हेतुतावच्छेदकसम्बन्धभेदेन च विभिन्नहेतुताया अकल्पनात् । न चैवं तौल्ये विनिगमकाभावादुभयोरेवानुमित्युपयोगित्वमस्तीति वाच्यम्, एतन्मते केवलान्वयिसाध्यके सर्वत्र [2]भ्रमात्मकव्याप्तिज्ञानादेवानुमितेरङ्गीकार्यतया व्यापकतागर्भव्याप्तिमते च सर्वत्र प्रमात्मकव्याप्तिज्ञानादेवानुमितिसम्भवेन केवलान्वयिसाध्यके भ्रमस्य तज्जनकदोषादेश्चाकल्पस्यैवाणुरपि विशेषोऽध्यवसायक इति न्यायेन विनिगमकत्वात् । तस्मात्पूर्वोपदर्शितरीत्या व्यापकसामानाधिकरण्यरूपव्याप्त्यवगाहिपरामर्शस्यैवानुमितिहेतुत्वं सिद्धमित्यलमतिशयविस्तरेण ।

**परामर्शस्यानुमितौ हेतुतेह निरूपिता ।**
**महादेवेन विदुषा तनोतु विदुषां मुदम् ॥**

**॥ इति श्रीमत्पण्डितमहादेवविरचितानुमितिपरामर्शयोः**
**कार्यकारणभावविचारः समाप्तिमगमत् ॥**

---

१. उभयत्वमुभयत्रैव पर्याप्तं न त्वेकत्रेति सिद्धान्तानुसारेणेदम् ।

२. साध्याभाववदवृत्तित्वरूपव्याप्तिज्ञानस्य केवलान्वयिनि भ्रमरूपत्वम् ।

परिशिष्टम्-क

# ग्रन्थे समुद्धृतानां नियमविशेषाणां सूची


| | पृष्ठाङ्काः |
|---|---|
| १. यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपि | १ |
| २. कार्यमात्रवृत्तिधर्मस्य कार्यतावच्छेदकत्वम् | १ |
| ३. कार्योत्पत्त्यभावाधिकरणत्वं कारणाभावाधिकरणत्वप्रयुक्तम् | २ |
| ४. अनुमितावाहार्यत्वाभावः | ३ |
| ५. करणस्य व्यापारसम्बन्धेन फलजनकत्वम् | ६ |
| ६. इतरबाधकालीनानुमितौ व्यापकतावच्छेदकरूपस्यैव विधेयतावच्छेदकता-पर्याप्त्यधिकरणत्वम् | ८ |
| ७. पक्षतावच्छेदकस्यैवोद्देश्यतावच्छेदकतापर्याप्त्यधिकरणत्वम् | ८ |
| ८. जनकीभूतज्ञाने उपसर्जनतया भातस्य जन्यज्ञानेऽप्युपसर्जनतया भानम् | ८ |
| ९. संशयस्य भावाभावोभयप्रकारतानिरूपितविशेष्यताद्वयवत्त्वम् | ११ |
| १०. संशयस्य प्रत्येकप्रकारतानिरूपितविशेष्यताद्वयवत्त्वम् | ११ |
| ११. वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वम् | १७ |
| १२. शास्त्रे ज्ञानमिति प्रतीतिव्यवहाराभ्यां विषयतासम्बन्धस्य वृत्त्यनियामकत्वम् | १८ |
| १३. गच्छद्गजारूढे राजादौ राजाऽयं गच्छतीति विशिष्टप्रतीतिव्यवहाराभ्याम्, रूपे एकत्वमिति प्रतीतिव्यवहाराभ्याञ्च सामानाधिकरण्यसम्बन्धस्य वृत्ति-नियामकत्वम् | १८ |
| १४. प्रतियोग्यभावाधिकरणत्वयोर्विरोधः | २१ |
| १५. आत्मविशेषगुणानां समवायेनाव्याप्यवृत्तित्वात् | २१ |
| १६. प्रतियोग्यभावाधिकरणत्वयोरेकावच्छेदेनैव विरोधः | २१ |
| १७. अवच्छेदकताया व्यासज्यवृत्तित्वानङ्गीकारः | २३ |
| १८. अवच्छेदकताया व्यासज्यवृत्तित्वाङ्गीकारोऽपि | २३ |
| १९. संशयात्स्मृत्यभावः | २६ |
| २०. गृहीताप्रामाण्यकज्ञानात् स्मृत्यभावः | २६ |
| २१. आहार्यपरामर्शादनुमित्यनुदयः | २६ |
| २२. लाघवतर्कविरहविशिष्टस्यैव व्यभिचारसन्देहस्य कारणताविघटकत्वम् | ३२ |
| २३. अप्रामाण्यज्ञानास्कन्दितपरामर्शादनुमितिस्वीकारेऽनुभवविरोधः | ३२ |
| २४. पक्षविशेषणकपरामर्शादनुमितिस्वीकारेऽनुभवविरोधाभावेन तस्मादनुमिति-स्वीकारे बाधकाभावः | ३२ |

२५. तर्कनिर्णयेऽर्थे ग्रन्थविरोधस्तार्किकैरनादरणीयः ३३

२६. विषयस्य कार्यसहभावेनैव हेतुत्वम् ३८

२७. कार्यतावच्छेदकभेदेन कारणतावच्छेदकभेदेन च कारणत्वस्य भेदः ४३

२८. कारणवैलक्षण्यस्य कार्यवैलक्षण्याधायकत्वम् ४३

२९. समवायिकारणस्यावयवगतरूपरसादेर्वैलक्षण्यादेव कार्यवैलक्षण्यम् ४३

३०. कृतेः द्विक्षणमात्रस्थायित्वम् ४४

३१. प्रत्यक्षसामग्रीकाले समानविषयकानुमितेरनङ्गीकारः ४४

३२. समानविषये प्रत्यक्षसामग्र्या बलवत्त्वम् ४५

३३. विभुसमवेतयोग्यगुणनाशं प्रति स्वोत्तरोत्पन्नस्वसमानाधिकरणविशेषगुणस्य कारणत्वम् ४६

३४. सुषुप्तिपूर्वकालीनज्ञाननाशार्थं जीवनयोनियत्नस्वीकारः ४६

३५. यदुत्तरं यस्य नाशोऽनुभवसिद्धस्तस्यैव तन्नाशे कारणत्वम् ४६

३६. प्रतियोगितासम्बन्धेन विभुसमवेतयोग्यविशेषगुणत्वावच्छिन्नं प्रति स्वपूर्ववृत्तित्व–स्वसामानाधिकरण्योभयसम्बन्धेन विशेषगुणत्वेन कारणत्वम् ४६

३७. उत्पत्तिज्ञप्त्योरेवान्योन्याश्रयदोषत्वम् ४६

३८. कार्याभावाधिकरणत्वे कारणाभावाधिकरणत्वस्य प्रयोजकत्वम् ४७

३९. विभिन्नकालीनयोराधाराधेयभावविरहः ५३

४०. कार्यतावच्छेदकविशिष्टकार्याधिकरणे कारणासत्त्वमेव व्यभिचारः ५५

४१. विशिष्टाधिकरणत्वं तत्रैव स्वीक्रियते यत्र वैशिष्ट्यनियामकसामानाधिकरण्यघटकीभूताभ्यां विशेषणविशेष्यसम्बन्धाभ्यां विशेषणविशेष्योभयाधिकरणत्वम् ५५

४२. तर्कस्याहार्यापादकनिरासफलकत्वम् ५६

४३. कार्यतावच्छेदकधर्मस्य जातित्वे बाधकसत्त्व एवोपाधित्वाङ्गीकारः ५६

४४. बाधप्रतिबध्यतावच्छेदकस्य प्रमात्वभ्रमत्वयोश्च सम्बन्धविशेषावच्छिन्नप्रकारताघटितत्वम् ६१

४५. जात्यतिरिक्तपदार्थस्य स्वरूपतो भानं नास्ति ६१

४६. जात्यतिरिक्तपदार्थत्वे किञ्चिद्धर्मानवच्छिन्नविशेष्यतानिरूपितप्रकारतान्यनिरवच्छिन्नप्रकारतानिरूपकत्वाभावव्याप्यत्वमित्युक्तनियमार्थः ६१

४७. व्यापकताघटकसम्बन्धेन पक्षे व्यापकस्य भानमनुमितौ सर्वसम्मतम् ६४

४८. तौल्ये विनिगमकाभावः ६४

परिशिष्टम्–ख

# ग्रन्थे समुद्धृतानां विवादास्पदनियमानां सूची


पृष्ठाङ्काः

१. उपाधिसाङ्कर्यस्येव जातिसाङ्कर्यस्यापि दूषकताबीजाभावेनादोषत्वम् ४
२. अव्याप्यवृत्तेरपि जातित्वे बाधकाभावः १४
३. ज्ञानयौगपद्यप्रवादस्तु प्रत्यक्षानुमित्यादिविरुद्धजातीयज्ञानद्वयस्य युगपदनुत्पत्तिपरः १६
४. परम्परासम्बन्धात्मकस्य सामानाधिकरण्यस्य सम्बन्धत्वे मानाभावः १८
५. वृत्त्यनियामकसम्बन्धस्याप्यभावप्रतियोगितावच्छेदकत्वम् १८
६. पाकरक्ते घटादौ न श्याम इति प्रतीत्या भेदस्य कालिकाव्याप्यवृत्तित्वम् १८
७. आहार्यानाहार्यांशिकसमूहालम्बनानभ्युपगमः २८
८. विशेष्यतात्वप्रकारतात्वयोर्विरोधः ३१
९. अनुमितेः पक्षविशेष्यकत्वनियमः ३७
१०. अवच्छेदकधर्मनिष्ठलघुपदार्थघटितत्वस्येव समानविशेष्यकत्वस्यापि लाघवत्वेन विनिगमकत्वम् ३७
११. व्याप्यविशेष्यकपरामर्शादनुमितेरनुदयः ३७
१२. अपेक्षाबुद्धेस्तृतीयक्षण एवेतरज्ञानवत् स्वाव्यवहितोत्तरक्षणोत्पन्नेन स्वसमानाधिकरणविशेषगुणेन नाशः ३८
१३. विषयस्य कार्यसहभावेन हेतुत्वे मानाभावः ३९
१४. प्रागभावे मानाभावः ४२
१५ संस्कारत्वजातौ मानाभावः ४६
१६. यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपीति नियमे मानाभावः ४७
१७. परामर्शस्य कार्यपूर्वभावेनाहेतुत्वम् ५३
१८. परामर्शस्य कार्यसहभावेनानुमितिं प्रति हेतुत्वम् ५३
१९. सर्वत्र विशिष्टबुद्धौ संयोगादिसंसर्गस्य स्वरूपत एव भानेन संयोगत्वादिभाने मानाभावः ६१
२०. जात्यतिरिक्तपदार्थस्य स्वरूपतो भानं नास्तीति नियमे मानाभावः ६१
२१. जात्यतिरिक्तपदार्थस्य स्वरूपतो भानं नास्तीत्यस्य प्रकारतयैव भानं नास्तीत्यर्थः ६१
२२. सांसर्गिकविषयतायां प्रकारतात्वविशेष्यतात्वयोरङ्गीकारे बाधकाभावः ६३
२३. अवच्छेदकतासम्बन्धेन पक्षतावच्छेदके साध्यं प्रकारतया भासते ६४
२४. साध्यतावच्छेदकसम्बन्धे पक्षतावच्छेदकावच्छिन्नत्वं सम्बन्धघटकतया भासते ६४

परिशिष्टम्-ग

# प्रकीर्णानि

पृष्ठाङ्काः

**(क) ग्रन्थे समुद्धृतानां न्यायानां सूची—**

१. एकत्र द्वयम् २३, ३० (द्विवारम्)

२. अणुरपि विशेषोऽध्यवसायकरः ३७, ६४, ६६

**(ख) ग्रन्थान्ते लेखककृतश्लोकौ—**

पिबतस्ते शरावेण वारिकह्लारिशीतलम् ।
केनेमौ दुर्विदग्धेन हृदये सन्निरोपितौ ॥ १ ॥
पयस्विनीनां धेनूनां ब्राह्मणः प्राप्य विंशतिम् ।
ताभ्योऽष्टादश विक्रीय गृहीत्वैकां गृहं गतः ॥ २ ॥

**(ग) लेखकस्य कानिचन विशिष्टाक्षराणि—**

त्त्व—त्त्व, च्छ—छ, त्व—स्व, ज्ञ—ज्ञ ह्न—न्ह (क्वचित्-क्वचित्), यि—ई, प्रागभाव—प्राग्भाव

**(घ) लेखे वर्तमानानि कानिचन चिह्नानि—**

= (टिप्पणी), V, + (शिष्टांशः)

**(ङ) ग्रन्थे चर्चिताः केचन विचारकाः —**

१. दीधितिकारः

२. आचार्यः (उदयनाचार्यः)

३ पक्षधरमिश्रः

४. नवीनाः

५. अतिनवीनाः

६. प्राञ्चः

परिशिष्टम्—घ

# शुद्धिपत्रम्

| अशुद्धम् | शुद्धम् | पृष्ठसंख्या | पङ्क्तिसंख्या |
|---|---|---|---|
| सि[द्]ध्य | सिद्धय | १ | ५ |
| सि[द्]ध्य | सिद्धय | २ | २८ |
| (र्तृ)र्न | (र्तृ)भिर्न | ३ | १ |
| कर्तृत्वा | कृतत्वा | ३ | ३ |
| पत्या[त्त्या] | पत्या(त्त्या) | ३ | ८ |
| स्या[न]नु | स्यानु | ३ | २५ |
| र्शने | र्शत्वे | ३ | २६ |
| तिसि | ति[त्व]सि | ४ | १५ |
| ध्यभा | ध्याभा | ४ | २४ |
| ति(त्वा) | ति[त्वा] | ५ | ६ |
| द्ध्यापू | द्धयापू | ५ | १० |
| (ये) | (ये) | ५ | १६ |
| मर्श | मर्शा | ६ | २ |
| कार | कर | ६ | २ |
| कार | कर | ६ | ५ |
| व्यापरा | व्यापार | ६ | ८ |
| व(तु)न | व[तु]न | ६ | २१ |
| [न्ना या] | (न्ना या) | १० | २८ |
| ण्य नि | ण्यनि | ११ | ४ |
| नामपेक्ष्य(या?) | ना(म?)पैक्ष्य(क्ष)या | ११ | १६–१७ |
| सति, वह्नि | सति, वह्निव्याप्यवह्नि | ११ | १९ |
| या च वह्नि | या च वह्निव्याप्यवह्नि | ११ | ३० |
| वृत्तेरे | वृत्तिरे | १४ | १ |
| वध्य | बध्य | १५ | १२ |
| च्छेदक | च्छेदकक | १६ | २ लेoटिo |
| मित्याप | मित्यनाप | १७ | २१ |
| शेषणवि | शेषवि | १८ | ५ |

| | | | |
|---|---|---|---|
| यमप्र | यवदप्र | १९ | ९ |
| र्शत्व(त्वे) | र्शत्व- | १९ | ९ |
| त्वावच्छिन्नत्वाव | त्वाव | १९ | १४ |
| (वच्छिन्न) | [वच्छिन्न] | २१ | ७ |
| न्ना[न्नप्रतियोगिताका]भा | न्न[प्रतियोगिताक]ाभा | २१ | १५ |
| न्ना[न्नप्रतियोगिताका]भा | न्न[प्रतियोगिताक]ाभा | २१ | १७ |
| (त्व) | [त्व] | २२ | ४ |
| क्तसम्भवेन | क्तसम्मतत्वात्। तथा च सर्वत्र | | |
| | परामर्शादनुमित्यसम्भवेन | २२ | ७ |
| तरता | तरकारणता | २२ | ९ |
| वेशेनानु | वेशान्नानु | २३ | १२ |
| कवि | कतावि | २३ | १४ |
| नास्मर | नात्स्मर | २६ | ११ |
| मर्शस्त | मर्शास्त | २६ | १६ |
| न्नायाम | न्ना(या?)म | २८ | १६ |
| बु(द्)ध्या | बु[द्]ध्या | २९ | १८ |
| बु(द्)ध्या | बु[द्]ध्या | ३० | ४ |
| प्यभूमा | प्यधूमा | ३० | २० |
| (काया) | (का या) | ३१ | १६ |
| न्नाया | न्ना या | ३१ | १८ |
| न्नाया | न्ना या | ३२ | २ |
| ग्याभि | ग्या भि | ३२ | ३० |
| तित्वरू | ति(त्व ?)रू | ३२ | लें०टि० |
| प्तताया | प्ताया | ३३ | १६ |
| मग्या(ऽ ?) | मग्याऽ (ऽ ?) | ३६ | ६ |
| रिक्त प्र | रिक्तप्र | ३६ | ६ |
| ध्याना | ध्यना | ३८ | २५ |
| स्वं स | स्वस | ३९ | १४ |
| त्याधि | त्यधि | ४१ | ५ |
| बु(द्)ध्या | बु[द्]ध्या | ४१ | १३ |
| क्षणे(वा ?) | क्षणे वा (वा?) | ४१ | १६ |
| (स्य) | [स्य] | ४२ | २५ |

| | | | |
|---|---|---|---|
| लेऽविभाव्या | लेऽपि भाव्य | ४४ | १२ |
| भावानु | भाव्यनु | ४४ | १७ |
| सामाग्री | सामग्री | ४५ | २ |
| योगत्व | योग्यत्व | ४६ | १० |
| योगत्वा | योग्यत्वा | ४६ | १२ |
| दिक्कस्य | दिकस्य | ४६ | १८ |
| श्वाश्रय | स्वाश्रय | ४७ | २० |
| रादा(?)वृ | रे प्रवृ | ४७ | २२ |
| त्यनुत्पा | त्यनुमित्यनुत्पा | ४९ | ९ |
| [तु] नु | [तु] न | ४९ | १३ |
| मर्शहेतु | परामर्शहेतु | ५० | १४ |
| धापरान | धान | ५० | १४ |
| किकपक्षे | किकः पक्षे | ५० | ७ |
| सिद्धस्वा | सिद्धित्वा | ५२ | ६ |
| मत्व | मत्त्व | ५३ | १० |
| मत्व | मत्त्व | ५३ | ११ |
| पूर्णं | पूर्व | ५६ | १३ |
| दुत्पत्य | दुष्पत्य | ५७ | २ |
| वता नि | वत्तानि | ५७ | ९ |
| मर्शोना | मर्शाना | ५७ | १७ |
| मर्शरु | मर्शत्वरु | ५८ | ७ |
| पत्यज | पत्त्यज | ५९ | ३ |
| वान्प | वत्प | ६० | ३ |
| (त्वमेव)पु | प्र | ६३ | ६ |
| तव | ततद्व | ६३ | १५ |
| तद्भा | तदभा | ६३ | २१ |
| ध्यप्र | ध्यं प्र | ६४ | १३ |
| कल्पस्ये | कल्पनस्यै | ६६ | ९ |

INDIAN INSTITUTE OF ADVANCED STUDY
Acc. No. 98484
Date 20-9-2001
SIMLA.